य इदं मध्वदं वेदात्मानं जीवमन्तिकात् ।
ईशानं भूतभव्यस्य न ततो विजिगुप्सते ॥ ५ ॥

He who knows the God who enjoys the essence (being present in the body), who is present near the Jīva (regulating him), who is the Lord of the past and the future (the present also), does not try to protect himself (as he knows that God is protecting him). This verily is that (God).

यः पूर्वं तपसोऽजातमद्भ्यः पूर्वमजायत ।
गुहां प्रविश्य तिष्ठन्तं यो भूतेभिर्व्यपश्यति । एतद्वै तत् ॥ ६ ॥

He (God) who created the not yet born (Chaturmukha brahmā) before tapas (Śiva) and before ap (ap etc., five elements), and who, entering into the cave (of heart), sees himself along with the other beings. This verily is that (God).

या प्राणेन संविशत्यदितिर्देवतामयी ।
गुहां प्रविश्य तिष्ठन्तीं या भूतेभिर्व्यजायत ॥ ७ ॥

He who resides with Mukhyaprāṇa (in the body), who is designated as Aditi as he eats (destroys) all, who is Supreme among deities, manifests his form, in many incarnations along with creating beings. This verily is that.

अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः ।
दिवे दिव ईड्यो जागृवद्भिः हविष्मद्भिः मनुष्येभिरग्निः ॥ ८ ॥

Agni (God Hari) the all-knower, who is placed in the teacher and pupil like the embryo well-borne by pregnant women should be daily adored by men who are God-conscious and who possess the sacrificial offerings. This, verily is that.

यतश्चोदेति सूर्यः अस्तं यत्र च गच्छति ।
तं देवाः सर्वे अर्पिताः तदु नात्येति कश्चन ॥ एतद्वै तत् ॥ ९ ॥

He from whom the Sun arises (at the time of creation), in whom the Sun sets (at the time of destruction), on whom all

deities are dependent, none can surpass him (either in respect of nature or qualities). This verily is that.

UNITY OF GOD

यदेवेह तदमुत्र यदमुत्र तदन्विह ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ १० ॥

Whatever is here, that is there. Whatever is there, that too, is here (the incarnational forms of God that are here in the body etc., are same as the original form of God that is in Vaikuṃtha and vice-versa. There is absolutely no difference between Mūla-rūpa and avatāra-rūpas). He who sees difference (between Mūla-rūpa and avatāra-rūpas) gets the death of death (i.e. Tamas).

मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन ।
मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति ॥ ११ ॥

There is nothing different here (no quality, action, etc., that are present in Mūla-rūpa or avatāra-rūpas are different from them). This should be realised by the mind (duly trained). He who sees them different (who sees the quality, actions etc., of God as different from him) will get the death of death (Tamas).

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते ॥ एतद्वैतत् ॥ १२ ॥

Puruṣa (God) of the size of a thumb resides at the heart. He regulates the past and the future. Therefore, one (who knows him) does not desire to protect himself (as he is sure of God protecting him). This, verily, is that.

अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः ।
ईशानो भूतभव्यस्य स एवाद्य स उश्वः ॥ एतद्वै तत् ॥ १३ ॥

Puruṣa (God) of the size of a thumb is like a flame without smoke. He regulates the past and present. He is today and he is tomorrow (he is ever-present). This verily, is that.

यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ।
एवं धर्मान् पृथक् पश्यन् तानेवानु विधावति ॥ १४ ॥

Just as the water rained on the peak of mountains flows down in many directions, similarly, he who sees the attributes as different from the God will go down (following the wrong knowledge of difference).

JĪVA IS SIMILAR TO GOD BUT NOT IDENTICAL

यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति ।
एवं मुनेर्विजानत आत्मा भवति गौतम ॥ १५ ॥

Just as pure water poured into pure water becomes similar to it, similarly, O Gautama! the Chief of the seers (Vāyu) who knows becomes similar (to God).

इति काठकोपनिषदि द्वितीयाध्यायस्य प्रथमावल्ली समाप्ता

द्वितीयाध्यायस्य द्वितीया वल्ली

GOD CONTROLS OUR BODY

पुरमेकादशद्वारमजस्यावक्रतेजसः ।
अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते ॥ एतद्वैतत् ॥ १ ॥

He who firmly knows that this body of eleven outlets is controlled by the unborn and of unrestricted knowledge (God), will be free from the sorrow. He attains final liberation being already freed (from the attachment to the body etc.). This, verily is that.

EXPOSITION OF THE NATURE OF GOD

हंसः शुचिषद्वसुरन्तरिक्षसद्
होता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योम सदब्जा
गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ २ ॥

He is flawless, the essence of all, present in Vāyu, blissful, present in antarikṣa, present in the senses, present on the sacrificial altar, has plenty of food, is present in the pot (of Somarasa), present in Brahmā etc. deities, present in the Vedas, present in Prakriti (Sree), present in the water-born, present in the earth-born, present in the knowledge of the liberated, present in those that are born on mountains, conveyed by the Vedas, and has an infinite number of qualities.

GOD REGULATES BREATHING

ऊर्ध्वं प्राणमुन्नयति अपानं प्रत्यगस्यति ।
मध्ये वामनमासीनं विश्वे देवा उपासते ॥ ३ ॥

He puts up the breath prāṇa upward, and the breath apāna downward. All deities adore him who is designated as Vāmana, and resides in the middle.

अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः ।
देहाद्विमुच्यमानस्य किमत्र परिशिष्यते ॥ एतद्वै तत् ॥ ४ ॥

(Nachiketa asks) when the embodied Jīva casts away the gross body, and is also freed from the subtle body, what is it that remains ? This verily, is that.

न प्राणेन नापानेन मर्त्यो जीवति कश्चन ।
इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ ॥ ५ ॥

A mortal does not live by prāṇa nor apāna (the two forms of Mukhyaprāṇa). But they (mortals) live by one who is distinct (from prāṇa, apāna, and all others), and on whom the two (prāṇa and apāna) depend.

GOD REGULATES, EVEN AFTER DEATH AND LIBERATION

हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम् ।
यथा मरणं प्राप्यात्मा भवति गौतम ॥ ६ ॥

O Gautama : I shall explain to you the mystery of eternal Brahman and how he regulates the dying (and liberated) Soul.

योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ।
स्थाणुमन्ये न संयन्ति यथाकर्म यथाश्रुतम् ॥ ७ ॥

Some, who are yet to get some more bodies, get rebirth in order to have these bodies. Others enter into non-sentients according to their deeds and knowledge.

य एषु सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः ।
तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते ।
तस्मिन् लोकाः श्रिताः सर्वे तदु नात्येति कश्चन ॥
एतद्वै तत् ॥ ८ ॥

The Puruṣa (God) creates (the dream objects) as he desires. He is declared to be flawless, possesses an infinite number of attributes, and is eternal. All beings depend upon him. None can surpass him.

BIMBA PRATIBIMBA RELATION

अग्निर्यथैको भुवनं प्रविष्टः
रूपं रूपं प्रतिरूपो बभूव ।

एकस्तथा सर्वभूतान्तरात्मा
रूपं रूपं प्रतिरूपो बहिश्च ॥ ९ ॥

Agñi (Chetana Agñi) in this world is one. He has many aṁśa forms. Corresponding to these, there are fire forms. Similarly, the God within all beings is one. He has many bimba forms. Corresponding to these there are many pratibimbas (Jīvas). These (pratibimbas) are distinct (from God).

वायुर्यथैको भुवनं प्रविष्टः
रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा
रूपं रूपं प्रतिरूपो बभूव ॥ १० ॥

Vāyu (Chetana Vāyu) in this world is one. He has many aṁśa forms. Corresponding to these, there are air forms. Similarly, the God who is present in all is one. He has many bimba forms. Corresponding to these there are pratibimbas (Jīvas). These (pratibimba) are distinct (from God-bimba).

GOD IS NOT AFFECTED BY THE DEFECTS OF OTHERS

सूर्यो यथा सर्वलोकस्य चक्षुः
न लिप्यते चाक्षुषैः बाह्यदोषैः ।
एकस्तथा सर्वभूतान्तरात्मा
न लिप्यते लोकदुःखेन बाह्यः ॥ ११ ॥

Just as the Sun who is the eye of all (present in the eye and regulates the eye of all) is not affected by external defects (by the defects of the external eye), similarly, the God who is present in all beings, who is distinct (from all), and who is one (independent) is not affected by the miseries of the world.

एको वशी सर्वभूतान्तरात्मा
एकं रूपं बहुधा यः करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीराः
तेषां सुखं शाश्वतं नेतरेषाम् ॥ १२ ॥

The God who is the in-dweller of all, who controls all, who is one (there being no equal or superior to him) makes his one form manifold. The wise who see him within attain ever manifest bliss. None else (can attain such bliss).

नित्यो नित्यानां चेतनश्चेतनानां
एको बहूनां यो विदधाति कामान् ।
तमात्मस्थं योऽनुपश्यन्ति धीराः
तेषां शान्तिः शाश्वती नेतरेषाम् ॥ १३ ॥

Eternal of eternals, sentient of sentients, the one, who bestows the desires of many. The wise who see him within will attain eternal peace. None else (can attain such peace).

INDESCRIBABLE BLISS OF GOD

तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम् ।
कथं नु तद्विजानीयां किमु भाति न भाति वा ॥ १४ ॥

They (the wise) know that it (the God described earlier) is of the nature of supreme bliss that cannot be (fully) described. (Yama exclaims). How can I know it ? (without his grace).

(Nachiketa asks) Does it shine? (fully reveal itself). (Yama replies) It does not shine. (Does not fully reveal).

न तत्र सूर्यो भाति न चन्द्रतारकम् ।
नमो विद्युतो भान्ति कुतोऽयमग्निः ॥

तमेव भान्तमनुभाति सर्वम् ।
तस्य भासा सर्वमिदं विभाति ॥ १५ ॥

The sun does not light him, nor the moon and stars. The lightnings do not. How can the fire (light him)? All these shine, deriving light from him, the shining one. All this is illuminated by him shining.

इति काठकोपनिषदि द्वितीयाध्यायस्य द्वितीयावल्ली समाप्ता

द्वितीयाध्यायस्य तृतीया वल्ली

WORLD AS ASVATTHA TREE

ऊर्ध्वमूलोऽवाक्शाख: एषोऽश्वत्थ: सनातन: ।
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ।
तस्मिन् लोका: श्रिता: सर्वे तदु नात्येति कश्चन ॥ १ ॥

This fig tree (the world tree) has the Supreme as its ground, those who are below the Supreme as its branches; it is enveloped with the Supreme and it is ever-continuing.

The supreme ground (of this tree) is flawless, has infinite number of attributes, and is immortal. All worlds depend upon this. None can surpass this. This, verily, is that.

GOD, THE THUNDERBOLT

यदिदं किञ्च जगत्सर्वं प्राण एजति निस्सृतम् ।
महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति ॥ २ ॥

The whole world functions by the direction of Prāṇa (God) and has arisen from him. He is frightening like a raised thunderbolt. Those who know this will become immortal.

भयादस्याग्निस्तपति भयात्तपति सूर्यः ।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥ ३ ॥

Agñi burns out of fear from him, the sun heats out of fear from him, Indra, Vāyu and the death-god, the fifth, briskly function.

इह चेदशकद्बोद्धुं प्राक् शरीरस्य विस्रसः ।
ततः स्वर्गेषु लोकेषु शरीरत्वाय कल्पते ॥ ४ ॥

If one is able to acquire the knowledge (of God) before the fall of body in this very birth, then, he will be able to obtain the (aprākrita) body in Vaikuntha. (He will attain liberation).

यथादर्शे तथात्मनि यथा स्वप्ने तथा पितृलोके ।
यथाप्सु परीव ददृशे तथा गन्धर्वलोके ॥
छायातपयोरिव ब्रह्मलोके ॥ ५ ॥

(The God present) In the self (Jīva) is clearly seen (by the sages) as in the mirror, at the world of manes ...(Pitṛloka)... he is seen as (the objects) in the dream, at the Gandharvaloka he is seen as (the objects reflected) in the water, at Brahmaloka he is clearly seen as (the objects) placed at the meeting point of the sunlight and shadow (during the day).

HIERARCHY OF DEITIES

इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत् ।
पृथगुत्पद्यमानानां मत्वा धीरो न शोचति ॥ ६ ॥

Knowing the gradation of the senses (the presiding deities of senses) which arise in different ways (or which function in different ways), and knowing their originisation and destruction, the wise will not grieve.

इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम् ।
सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् ॥ ७ ॥

अव्यक्तात्तु परः पुरुषो व्यापकोऽलिङ्ग एव च ।
यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति ॥ ८ ॥

The mind is higher than the senses. The satva or buddhi is higher than mind. Mahat-tatva is higher than buddhi. Avyakta is higher than Mahat. The supreme Puruṣa is higher than Avyakta. He is all-prevading and without a material body. A man gets liberated and attains immortality by knowing him.

VISION OF GOD

न संदृशे तिष्ठति रूपमस्य
न चक्षुषा पश्यति कश्चिदेनम् ।
हृदा मनीषा मनसाभिक्लृप्तो
य एतं विदुरमृतास्ते भवन्ति ॥ ९ ॥

His original form will not be within the vision of any. None can see him with his eyes (or any other senses). He is understood by the mind assisted by the knowledge and the devotion. Those who know him will attain immortality.

METHODOLOGY OF YOGA

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम् ॥ १० ॥

When the five Jñānendriyas together with the mind are withdrawn (from the worldly objects), and the buddhi is also steady, then, this (state of mind, i.e., pratyāhāra and dhāraṇā) is the highest means (for knowledge).

तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम् ।
अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ ॥ ११ ॥

The steadiness of senses (withdrawal of them from the worldly objects and fixing on God) is known as Yoga (dhyāna and samādhi since these are very closely connected with Indriya dhāranā). At this stage, one is concentrated (on God). The Yoga (Concentration) is about creation and destruction (about God as creator, destroyer etc.).

GOD IS THE SUPREME BEING

नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा ।
अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते ॥ १२ ॥

He (God) cannot be understood by the speech, the mind, or the eye. How can he be understood through a person other than one who instructs about him (God) as the Supreme Being.

अस्तीत्येवोपलब्धव्यः तत्वभावेन चोभयोः ।
अस्तीत्येवोपलब्धस्य तत्वभावः प्रसीदति ॥ १३ ॥

With the grace of God who causes the reality of both (Prakṛti and Puruṣa), he (God) has to be understood as Supreme Being. He will bestow his grace on him who realises him as the supreme being.

THE FINAL RELEASE

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥ १४ ॥

When all the desires present at the heart (at antahkarana) are released (with the grace of God), then, a mortal becomes immortal (attains liberation) and obtains Brahman.

यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः ।
अथ मर्त्योऽमृतो भवति एतावदनुशासनम् ॥ १५ ॥

When all the knots (avidhyā, ahamkāra, etc.) at the heart, here (in the human birth), are removed, then, a mortal becomes immortal, (attains liberation). This is the purpose of all teaching.

शतं चैका च हृदयस्य नाड्यः
तासां मूर्धानमभिनिस्सृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति
विष्वगन्या उत्क्रमणे भवन्ति ॥ १६ ॥

There are a hundred and one arteries of the heart. One of them (Suṣumnā) goes upto the top of head. He who goes upward through it (through suṣumnā at the time of departing from this body) will attain immortality. The other serve for going in other directions (other lokas).

REALISE THE DISTINCTION BETWEEN GOD AND SOUL

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः ।
तं स्वात् शरीरात् प्रवहेत् मुञ्जादिवेषिकां धैर्येण ।
तं विद्यात् शुक्रममृतं तं विद्यात् शुक्रममृतम् ॥ १७ ॥

Puruṣa (God) of the size of a thumb, the inner controller, is always present at the heart of the people. (He is present at the heart of body and also at the heart of Jīva-svarūpa). He should be distinguished from the self (the Jīva) who is the body of the God, like distinguishing Ishikā grass from the Munjā grass, with a firm mind. He is (God who is thus distinguished) flawless and immortal.

मृत्युप्रोक्तं नाचिकेतोऽथ लब्ध्वा
विद्यामेतां योगविधिं च कृत्स्नम् ।

ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युः
अन्योप्येवं यो विद्ध्यात्ममेव ॥ १८ ॥

Nachiketas obtaining this knowledge and the Yoga method taught by Yama entirely, being free from fláws, attained Brahman and became immortal (attained liberation). Any other person who knows God in this way will attain this.

इति काठकोपनिषदि द्वितीयाध्यायस्य तृतीयावल्ली समाप्ता

इति श्री काठकोपनिषदः आङ्ग्लभाषानुवादः पाण्डुरङ्गि तमणाचार्यसुनु कृष्णाचार्य विरचितः समाप्तः

NOTES AND EXPLANATION

प्रथमाध्यायस्य प्रथमावल्ली

[I-1-1] Expl. (1) In the Viṣvajid sacrifice, the Yajaman is required to offer all his belongings as dakṣinā. Accordingly Vājaśravasa who had undertaken Viśvajid sacrifice was giving away all his belongings. However, the cows offered as dakṣinā were of very poor quality. This made Nachiketa, the son of Vājaśravasa, who was standing by, to think whether it is worthwhile to offer such poor cows as dakṣinā. The faith that only the right thing should be done entered into his mind.

(2) उशान्-कामयमानः desirous, this adjective is given to Vājaśravasa to indicate that he had undertaken the sacrifice with a desire to obtain the fruits. This was not correct and probably was responsible for his offering poor cows. He was not above want.

(3) सर्ववेदसम्-सर्वस्वदक्षिणाम्, श्रद्धा-आस्तिक्यबुद्धिः (R.K.) पितुः हितकामप्रयुक्तास्तिक्यबुद्धिः । (V.T.)

[I-1-2] Expl. (1) Nachiketa who observed the poor quality of the cows that were being given as dakṣinā, found that they were not even in a position to drink water or eat grass. There was no strength in them. A gift of such cows, naturally, will lead to Naraka rather than Svarga.

(2) पीतमेव उदकं याभिः ताः पीतोदकाः, जग्धमेव भक्षितमेव तृणं याभिः ताः जग्धतृणाः, दुग्ध एव दोहो यासां ताः दुग्धदोहाः, निरिन्द्रियाः–निर्वीर्याः ।

(3) अनन्दाः–अविद्यमानसुखाः, Ananda lokas mentioned here do not necessarily refer to Tamas. It depends upon the person concerned.

गोदानकर्तुः तमोयोग्यत्वे अनन्दशब्दस्य तमःपरत्वम् । अन्यथा तादृगनित्यनरक-परत्वमित्यङ्गीकारात् । (V.T.)

[I-1-3] Expl. (1) When Nachiketa observed the very poor quality of the cows offered as dakṣinā, he felt bad and asked his father better to give his own son (Nachiketa himself) rather than such poor cows. The father ignored it once. But when the son insisted a second and a third time, the father felt irritated and cursed the son saying 'you are given to the death.'

(2) तत-तात.

[I-1-4] Expl. (1) Death being an inevitable event in life, Nachiketa is not afraid of death. Many have died before and many will die hence-forward. Therefore, one need not be afraid of death. However, he remarks that no purpose of Yama will be served by the death of Nachiketa. Normally when a gift is given to some one, it is intended to serve some or other purpose of the receiver. But no such purpose is served here.

[I-1-5] Expl. (1) Nachiketa explains with an illustration that death is very natural to a mortal and therefore, he does not feel sorry for this.

[I-1-6] Expl. (1) Nachiketa went to the residence of the god of death as per his father's curse. But Yama was not in station. In the absence of the Yajamāna of the house, Nachiketa did not receive any hospitality from Yama's wife. Nachiketa had to wait for three days. Then Yama returned. In this verse Yama's wife informs Yama that a Brāhmaṇa guest Nachiketa has come and he should be offered arghya etc., hospitality befitting a guest. A Brāhmaṇa guest is considered as god Vaisvānara i.e. Agñi himself. If he is not properly treated he will burn the house like fire.

(2) अग्नेरभ्यागतो मूर्तिः । (R.K.)

(3) प्रविष्टस्य अतिथेः 'स इन्द्रोजो यो गृह्वे ददाति' इत्यादिषु उक्तां शान्तिं कुर्वन्ति । (R.K.)

(4) शान्तिं–अर्घ्यादिरूपां शान्तिकारणम् । (V.T.)

(5) वैवस्वत–विवस्वतः पुत्र, सूर्य

[I-1-7] Expl. (1) In this verse Yama's wife tells the adverse consequences of a guest remaining without proper hospitality in a householder's residence.

(2) (i) प्राप्तविषयेच्छा आशा, अप्राप्तवस्तुविषयेच्छा प्रतीक्षेति भावः । (R.K.)

(ii) अप्राप्तस्य प्राप्त्यर्थमिच्छा आशा, इदमेतस्मिन् काले सिद्ध्यतीति निश्चित्य तत्कालप्रतीक्षणं प्रतीक्षा । (V.T.)

(3) सङ्गतम्–सुहृत्सङ्गतम्, सूनृताम्–जनकर्तृकसाधुवार्ताम्, इष्टम्–यजनम्, पूर्तम्–तटकादि । (R.K.)

[I-1-8] Expl. (1) After listening to his wife, Yama offered arghya etc. hospitality to Nachiketa and offered him three boons.

(2) प्रति-प्रतीकाराय

[I-1-9] Expl. (1) त्वत्प्रसृष्टम्–त्वया प्रेषितम्, प्रतीतः–प्रत्यभिज्ञानवान् ।

[I-1-10] Expl. (1) This verse could be explained in two ways. In the first explanation, Auddalaki Āruni is taken to refer to the son i.e., Nachiketa. In the second explanation, Auddalki Āruni is taken to refer to the father i.e., Vājaśrava. In either case the total purport is same. Sri Raghavendratīrtha explains it is the first way and Sri Vedcshatīrtha in the second way.

(i) औद्दालकिः आरुणिः भवान् मत्प्रसृष्टः मत्प्रेषितः सन् पुरस्तात् ग्रामान्तरादागतः यथा तथा प्रतीतः पित्रा प्रत्यभिज्ञातो भविता भविष्यति । रात्रीः सुखं शयिता शयानो भविता । तव पिता वीतमन्युः सन् मृत्युमुखात् त्वां ददृशिवान् दृष्टवान् भवेदिति यमः प्रथमं वरं दत्तवान् । (R.K.)

(ii) औद्दालकिः आरुणिः तव पिता मृत्युमुखात् प्रमुक्तं त्वां ददृशिवान् पश्यन् मत्प्रसृष्टो मत्प्रेरितो वीतमन्युस्सन् पुरस्तात् पूर्वं त्वां प्रति यथा येन प्रकारेण वर्तते तथा भविता । प्रतीतः प्रत्यभिज्ञानवांश्च भविता । रात्रीः सुखं शयिता । (V.T.)

(2) Among modern translators also Hillebrand and Carpentier take it in the first way and Deussen and Radhakrishnan take it in the second way.

(3) Both शान्तसङ्कल्पत्व and सुमनस्कत्व asked by Nachiketa for his father are granted here.

[I-1-11] Expl. (1) After obtaining the first boon, as a preliminary to the second boon, Nachiketa praises Svarga.

(2) Here, the word Svarga is to be taken as referring to the usual Svargaloka, as also Viṣṇuloka. It will be made clear in the following verses that the Svarga Agñi about whom Nachiketa enquires in the second boon is Viṣṇu himself. He bestows Svarga, that is to say, Viṣṇuloka, to the performer of Nachiketa sacrifice. Before reaching this highest goal, the sacrificer stays at the usual Svargaloka for a Manvantara period. Therefore, Nachiketa praises both these worlds here. There is no fear of death etc. in these. Yama does not confront the Nāchiketa sacrificer during the Manvantara period when he is in the usual Svargaloka and there is no question of Yama in Viṣṇuloka. Thus the description of Svarga given here is to be taken with reference to the usual Svarga and also Viṣṇuloka with appropriate interpretation. To indicate a reference to the usual Svarga the word स्वर्गलोक is repeated twice in this verse.

(i) स्वर्गे लोके स्वर्गशब्दिते भगवल्लोके । (R.K.)

(ii) यद्वा नायं लोकः विष्णुलोकः । किन्तु प्रसिद्धस्वर्गलोक एवेति ज्ञापनाय पुनरुक्तिः । 'प्राप्य स्वर्गं तत्र भयातिगः । उष्य मन्वन्तरं कालमित्यादि भाष्योक्तेः । (R.K.)

(iii) न तत्र त्वम्—न तत्र मन्वन्तरकालपर्यन्तं मृत्युरस्तीत्यर्थः । (V.T.)

[I-1-12] Expl. (1) Agñi referred to here is lord Viṣṇu himself.

(i) अग्निशब्दितेष्टकचितस्थम् अग्रत्वादिगुणयुक्ततया अग्निनामकं हरिम् । (R.K.)

(ii) स्वर्ग्यम्–स्वर्गसाधनम् । (R.K.)

(iii) स्वर्गलोकाः–स्वर्गो लोको येषां ते तथोक्ताः मन्वन्तरं स्वर्गे लोके स्थास्यन्तः पश्चादमृतत्वं मुक्तिं भजन्ते । (R.K.)

[I-1-13] Expl. (1) By way of second boon Nachiketas asks Yama to teach him. Agñi who leads the Nachiketa sacrificer to Svarga. Yama starts teaching him here. Agñi taught here is not the ordinary fire-god but he is Viṣṇu himself. This is clear from the adjectives given here viz., anantalokāpti, pratiṣṭhā and guhānihita. These adjectives cannot be the adjectives of mere fire-god or the deity Agñi.

(2) (i) अनन्तलोकाप्तिम्–अनन्तस्य विष्णोः लोकस्य आप्तिं साधनम् । (R.K.)

(ii) अनन्तस्य लोकः आप्यते येनेति । अनन्तलोकः आप्यते येनेति वा अनन्तलोकाप्तिः तम् । (V.T.)

(iii) अग्रत्वादग्निनामासौ नाचिकेताग्निगो हरिः ।
लोको विष्णोरनन्तस्य तज्ज्ञानान्नित्य आप्यते ॥
प्रतिष्ठा सर्वलोकस्य स विष्णुः सर्वहृद्गतः ।
स एव सर्वलोकादिः तज्ज्ञानान्मुच्यते भृशम् ॥ (M.B.)

[I-1-14] Expl. (1) In response to Nachiketasa's second boon Yama started teaching Agñi who leads to Svarga. This Agñi is not the ordinary fire god but he is the Lord Hari (Viṣṇu) himself. This is clear from the adjective lokādi i.e., cause of the whole world.

सर्वभूतानामादिं कारणभूतं अग्निं चितिस्थमग्निनामकं हरिम् । (R.K.)

(2) The deity of sacrificial bricks is Viṣṇu himself. The number of bricks to be used is three hundred and sixty.

षष्ठ्युत्तरशतत्रयसंख्याकदेवतां विष्णुम्, इष्टकासंख्यां परिमाणं च उवाचेत्यर्थः । (R.K.)

[I-1-15] Expl. (1) Yama was extremely pleased by Nachiketasa's quick learning and announced that the Svargya Agni taught to Nachiketa will henceforward be known as Nāchiketāgni.

(2) बहुरूपां–सुवर्णमयीम्, 'बहुरूपं च पुरुटं कार्तस्वरमितीर्यते' इत्युक्तेः । सृङ्कां–कण्ठमालाम् ।

[I-1-16] Expl. (1) Here the results of the performance of Nāchiketa sacrifice and meditating upon Lord Hari and explained by Yama.

(2) (i) त्रयः नाचिकेताः यस्यासौ त्रिनाचिकेतः त्रिवारानुष्ठितनाचिकेत-नामकाग्निचयनः । (R.K.)

(ii) त्रिभिः वेदैः सन्धिं सन्धानमेत्य वेदत्रयाविरुद्धो वर्तते, वेदत्रयोक्तमार्गेण भगवत्तत्वं जानन् । (R.K.)

(iii) त्रिकर्मकृत्–यज्ञदानतपःकर्ता

(3) The expression ब्रह्मजज्ञ refers to two facts viz., (i) revealed through Vedas (ii) omniscient, ब्रह्म वेदः तत्र व्यक्तत्वात् ब्रह्मजः विष्णुः । जानातीति ज्ञः सर्वज्ञः । ब्रह्मजश्चासौ ज्ञश्च ब्रह्मजज्ञः । (R.K.)

(4) निचाय्य–विचार्य, विदित्वा–साक्षात्कृत्य । (R.K.)

[I-1-17] Expl. (1) Yama once again explains the good result of performing Nāchiketa sacrifice with the knowledge of deity etc., here.

(2) The Svargaloka referred to here is not to be interpreted only as usual Svargaloka. The sacrificer first goes to the usual Svargaloka, stays there for a manvantara, then proceeds to Viṣṇuloka. Therefore, rejoicing in both in the said manner is implied here.

स्वर्गलोके प्रसिद्धे मोदते । तदनन्तरं क्रमात् विष्णुलोके मोदते इति व्याख्येयम् । न चायं स्वर्गलोकः प्रसिद्ध एव 'स्वर्गलोका अमृतत्वं भजन्ते' इत्युपक्रमात् । (V.T.)

[I-1-19] Expl. (1) After knowing Svargya Agñi by his second boon, Nachiketa wants to know whether God regulates jīva after death and liberation. He mentions the two views in this respect and the consequent doubt. He appeals to Yama to teach him in this respect. This is his third boon.

(2) The word प्रेते refers to both dead and liberated. प्रेते मृतपुरुषे मुक्ते च मनुष्ये । (R.K.)

(3) The doubt here is not whether the soul continues to exist after death but whether God continues to regulate even after death and liberation.

मृतपुरुषे मुक्ते च मनुष्ये नियामकत्वेन भगवानस्तीति एके ज्ञानिनः वदन्ति नास्तीति अज्ञाः । अतो विप्रतिपत्तेः मम जाता इयं विचिकित्सा सन्देहः । (R.K.)

(4) The nature of the third boon chosen by Nachiketas has to be ascertained from the answer given by Yama. In this connection the following verses in the answer given deserve our attention.

(i) The point raised in the verse-

अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः ।
देहाद् विमुच्यमानस्य किमत्र परिशिष्यते ॥ (II-1-4)

is answered as एतद्वैतत्. The question asked here is, when the liberated soul casts away the gross body and the subtle body what remains? The answer is, it is that, that is to say, it is God who will continue to regulate the liberated soul. It is that which you wish to know.

(ii) In the verse-

य एषु सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः ।
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ॥
तस्मिन् लोकाः श्रिताः सर्वे तदु नात्येति कश्चन ॥ (II-1-8)

The fact of God regulating the jīva during the dream state is stated in the first line and God's nature is explained in the second and third lines. Then, it is affirmed as एतद्वैतत् it is that which you wish to know.

Thus, the whole answer given to the third question and its sub-questions asked by Nachiketa is an exposition of the nature of God, particularly, the fact of God being a regulator of liberated jīvas. The fact of his being a regulator in all other states is also naturally brought out.

(5) If the question were a simple question as to whether the soul survives after death or not, there was no need to give such a detailed exposition of the nature of God. Moreover, Nachiketa was cursed to death and had gone to Yama's world. Therefore, he is not likely to have any doubt regarding the survival of the soul after death. The very existence of Yamaloka, Nachiketasa's going there after death etc., pre-suppose the survival of the soul after death. Therefore, the question here is not whether the soul survives after death or not, but whether God continues to regulate the souls after death and liberation. An answer to this requires a detailed exposition of the nature of God who regulates.

(6) (i) प्रेते मुक्ते मनुष्ये नियामकत्वेन भगवानस्तीति ज्ञानिनो वदन्ति । नास्तीत्यज्ञाः । तस्य नियामकस्य स्वरूपं यथावदहं विद्याम् । (M.B.)

[I-1-20] Expl. **(1)** In order to impress upon Nachiketa the importance of the subject, Yama tries to dissuade Nachiketa from seeking this knowledge. However, Nachiketa is firm about his question.

(2) धर्मः—धारकत्वात् धर्मः भगवान् (R.K.) The word dharma conveys God here.

[I-1-21] Expl. (1) Nachiketa insists on obtaining the same boon.

[I-1-23] Expl. (1) Yama tries to persuade him to ask for an alternate boon.

[I-1-24] Expl. (1) Yama offers many temptations to test the firmness of Nachiketa's mind.

(2) मरणम्—मरणे स्थितं म्रियमाणजीवस्थितं भगवन्तं मानुप्राक्षीः । (V.T.)

(3) मुक्तेरपि मरणात्मकत्वात् मरणमित्यपि भवति । (M.B.)

[I-1-25] Expl. (1) श्वः परेद्युः अभावाः भवन्तीति भावाः न भावाः अभावाः असन्तः अस्थिरा इति यावत् । (R.K.)

[I-1-26] Expl. (1) This is Nachiketa's reply to Yama's offer to ask for wealth etc., instead of the nature of God. वृणीष्व वित्तमित्यादेरुत्तरम् । Nachiketa points out that wealth will never satisfy a man.

(2) Nachiketa states that when one meets a deity like Yama, such things as wealth and life are available without asking. Therefore, one should aspire to get much higher i.e., knowledge of God from him.

त्वादृशे देवे दृष्टे वित्तायुषोरनुषङ्गसिद्धत्वात् न ते पृथक् प्रार्थनीये । (R.K.)

[I-1-27] Expl. (1) Here Nachiketa makes two points: 1. No person would like to be interested in the worldly things and worldly life after meeting a Guru like Yama who could give a much higher knowledge i.e., knowledge of God. 2. Nobody would like to have prolonged life, since, in the old age, one will not be able to enjoy the pleasure of sensuous objects. Harping on

the memory of such objects will be more a matter of pain than of pleasure.

(i) त्वादृशगुरुप्राप्तावपि भगवत्स्वरूपमविज्ञाय पुत्रपौत्रादिकं वृण्वतो मे तम एव भविष्यति । तथाहि श्रुतिः इह चेदवेदीरथ सत्यमस्तीत्यादिका । (V.T.)

(ii) वर्णः स्त्रीपुत्रादिरूपविशेषः, रतिः क्रीडा, प्रमोदः तदुत्थः सुखविशेषः । (V.T.)

(iii) वयोऽधिकत्वे जराद्यापत्त्या भोगशक्तेरभावात् प्रत्युत क्लेश एव भवेदिति भावः । (R.K.)

(2) प्रजानन्–wise, could be taken either as सम्बोधन of Yama or as an adjective of मर्त्यः ।

[I-1-28] Expl. (1) महति साम्पराये–मुक्तौ निमित्तसप्तमी, मोक्षार्थं नो ब्रूहि उपदिश । साम्परायपदस्य श्रेयोमात्रसाधारण्यात् मुक्त्यर्थत्वलाभाय महतीत्युक्तम् । (R.K.)

इति काठकोपनिषदि प्रथमाध्यायस्य प्रथमवल्ली समाप्ता ॥

प्रथमाध्यायस्य द्वितीयावल्ली

[I-2-1] Expl. (1) Yama demarcates the purposes of worldly pleasure and higher knowledge here.

(2) श्रेयः–प्रशस्ततमं ब्रह्मज्ञानम्, प्रेयः–प्रियतमं दारापत्यादिकाम्यमानं वस्तु । (R.K.)

(3) उतशब्दः चार्थः, इवशब्दः अवधारणार्थः । (V.T.)

(4) इव also indicates that for the wise the pleasant -wife, son, property etc., is also an instrument of good. दारापत्यादिप्रेयसोऽपि सद्धर्मद्वारा श्रेयस्त्वमेवेति सूचनाय इवशब्दः । (R.K.)

(5) अर्थात्-परमपुरुषार्थात् हीयते । (R.K.)

[I-2-2] Expl. (1) सम्परीत्य–सम्यग् ज्ञात्वा विविनक्ति श्रेयो मोचकं प्रेयो बन्धकमिति विवेचयति । (R.K.)

(2) अभि–अवज्ञाय rejecting (R.K.)

[I-2-3] Expl. (1) प्रियान्–दारापत्यादीन्, प्रियरूपान्–गृहारामक्षेत्रादीन्, कामान्–काम्यमानान्, अभिध्यायन्–अस्थिरतया मन्वानः ।

[I-2-4] Expl. (1) अविद्या–विद्याभिन्ना ऐहिकसुखसाधनत्वेन ज्ञाता, विषूची–विरुद्ध फलहेतू ।

[I-2-5] Expl. (1) Here अविद्या stands for प्रेयस् i.e., other than ब्रह्मविद्या । अविद्याशब्दितप्रेयस्कामान् निन्दति यमः । अविद्यायाम्–ब्रह्मविद्येतरस्मिन् । (R.K.)

(2) दन्द्रम्यमाणाः-वक्रगतयः । (R.K.)

[I-2-6] Expl. (1) साम्परायः–मोक्षः, तत्साधनीभूतभगवानिति यावत् । (V.T.)

[I-2-7] Expl. (1) अस्य भगवतः कुशलः वक्ता यथावत् स्वरूपोपदेष्टा आश्चर्यः दुर्लभः । अस्य वक्तुः लब्धा प्राप्ता यथावत्स्वरूपवक्तृभूताचार्यप्राप्तिमान् कुशलानुशिष्टः यथावदनुशासितः ज्ञाता च दुर्लभः इत्यर्थः । (R.K.)

(2) Sri Vedeśatīrtha gives the prose order slightly differently. कुशलेन गुरुणा अनुशिष्टः अस्य भगवतः यथार्थतो ज्ञाता ज्ञानानुसारेण वक्ता आश्चर्यः दुर्लभः । कुशलोऽस्य भगवतो लब्धा गुरूक्तप्रकारेण ज्ञाता श्रोताप्याश्चर्य इति योजना । (V.T.)

[I-2-8] Expl. (1) Inferior thinkers have thought about God in many inferior ways such as 'He has only a few qualities, he has material body, he is subordinate to matter etc. Therefore, their concept of God is inferior and hence they have not understood him correctly. नरेण अज्ञानिमनुष्येण प्रोक्तः अवरः अप्रकृष्टः । कुतः । बहुधा प्रकृत्युपसर्जनत्वाल्पगुणत्वप्राकृतदेहत्वादि नानाप्रकारेण चिन्त्यमानः सन् तैरेषः सु सम्यक् यथावत्तया ज्ञेयो न भवति । (R.K.)

(2) Sri Vedeśatīrtha explains the first line differently as follows :-

The concept of God as explained by Śaiva, Brāhma, Saura, Gāṇapatya etc., inferior thinkers is inferior. Therefore, he is not correctly understood by them. God is thought of as possessing infinite numbers of qualities etc., (in Veda etc., sacred literature). Therefore he cannot be equated with inferior deities.

(i) नरेण मनुष्येण शैवब्राह्मसौरगाणपत्यादिना प्रोक्तः एषः सुज्ञेयो न भवति । यतस्तेन अवरः प्रोक्तः शिवादिदेव सर्वोत्तमः भगवान् तदपेक्षया अवरः इत्युक्तः । (V.T.)

(ii) बहुधा बहुगुणत्वेन पूर्णगुणत्वेन चिन्त्यमानः वेदादिभिः यतोऽतो नायं तेन तथोक्तोऽपि अवरः तस्य मिथ्याज्ञानित्वात् । (V.T.)

(3) अनन्य is one who considers himself identical with ब्रह्मन् । अहं ब्रह्मणोऽनन्य इति जानन् स्वात्मब्रह्मणोर्भेदमजानन् ऐक्यमेव जानन् अनन्य इत्युच्यते । (R.K.)

The God (Brahman) taught by him cannot be comprehended at all since he is devoid of any attributes etc., तेन प्रोक्ते अत्र ब्रह्मविषये गतिर्ज्ञानं नास्ति । यत्किञ्चित् निर्विकल्पकवस्तुज्ञानमेव न भवतीति भावः । (R.K.)

(4) Sri Vedeśatīrtha explains it slightly differently closely following Bhāṣya as follows :-

अनन्य is one who does not realise the difference between himself and God and considers himself as identical with God. No true knowledge of God arises by his way of teaching. Jīva and Brahman are different as they possess opposite attributes and the knowledge of their identity is false knowledge. This difference of attributes is mentioned as अणुप्रमाणात् अणीयान्. God is subtler than Jīva who is अणु.

अन्यो भगवान् अन्योऽहमित्यजानन् स एवाहमिति जानंश्च अनन्यः । तेन प्रोक्ते अत्र ब्रह्मणि गतिः ज्ञानं सम्यग् ज्ञानं न जायते । कुतः । जीवेश्वरयोः

विरुद्धधर्माधिकरणत्वेन भिन्नत्वात् तदभेदज्ञानिनो मिथ्याज्ञानित्वादिति भावेनाह । अणुप्रमाणादपि जीवादणीयानिति । (V.T.)

(5) अन्यो भगवानन्योऽहमिति जानन्ननन्यः । तेन प्रोक्ते गतिर्ज्ञानं नास्ति । 'प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठे'ति वाक्यशेषात् ।

जीवानां चैव विष्णोश्च यो न वेत्ति भिदां पुमान् ।
तदनुव्रताश्च ये केचित् तेषां ज्ञानं न जायते ॥ इति ब्रह्मवैवर्ते । (M.B.)

In this Bhāṣya attention is drawn to the वाक्यशेष or the sentence in the next verse viz., 'प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ' wherein it is clearly stated that the knowledge imparted by जीवेश्वरभेदज्ञानिन् is the true knowledge. वाक्यशेषे अन्येनैव जीवेश्वरभेदज्ञानिना आचार्येण प्रोक्ता वेदप्रवचनोत्पादितैव मतिः सुज्ञानाय साक्षात्काराय भवतीत्युक्तत्वेन अनन्यप्रोक्त इति वाक्यमपि जीवेश्वरभेदाज्ञानिना तदभेदज्ञानिना च प्रोक्ते ज्ञानं नास्तीति व्याख्येयम् । (V.T.)

(6) Sri Śankara also takes अनन्यप्रोक्ते as अपृथग्दर्शिनाप्रोक्ते taught by one who doesnot see any difference between himself and Brahman. But he takes गतिः नास्ति as अगतिः नास्ति thereby drawing the conclusion that there is no absence of right knowledge. While as per Sri Madhva's interpretation the sentence अनन्यप्रोक्ते गतिरत्र नास्ति states that 'No right knowledge arises when taught by a person who thinks himself to be identical with Brahman. The same sentence with गतिः being taken as अगतिः as per Sri Śankara's interpretation states that 'There will be no absence of right knowledge when taught by a person who does not see any difference between himself and Brahman.

प्रोच्यमानब्रह्मात्मभूतेनाचार्येण अनन्यतया प्रोक्ते आत्मनि अगतिः अनवबोधोऽपरिज्ञानमत्र नास्ति । (S.B.)

It is pointed out by Sri Madhva that Sri Śhankara's interpretation does not go well with the वाक्यशेष or the following sentence in the next verse viz., 'प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ' ।

(7) (i) अणुप्रमाणात् अणुपरिमाणतः अणीयान् अतिसूक्ष्मं हि यतः अतो न प्रत्यक्षम् । अतर्क्यं च अनुमानागोचरश्च । (R.K.)

(ii) अणुप्रमाणादपि जीवादणीयान् हि....अतः प्रत्यक्षं न भवति । (V.T.)

[I-2-9] Expl. (1) आपनेया has to be understood in two ways:- (i) आ+नेया, (ii) अप+नेया cannot be easily understood by logic or cannot be easily removed by logic.

(2) अन्येन by one who knows the difference between himself and God. अन्येन ब्रह्मणोऽन्योहमिति जानता । (R.K.)

(3) प्रेष्ठ–प्रियतम, सत्यधृतिः–अचाल्यधैर्यवान् । (R.K.)

[I-2-10] Expl. (1) Before starting the teaching of the nature of God, Yama assures Nachiketa that he knows God well and he can teach him. (त्वया पृष्टं ब्रह्मस्वरूपं जानामीत्याह यमः । (R.K.)

(2) अनित्यम् refers to God as one who is conveyed by 'अ'kara and who is eternal अकारः ब्रह्मवाची । अकारवाच्यं च तत् नित्यं च अनित्यम् । (R.K.)

(3) शेवधिः–निधिः, निधिसदृशम्, परमपुरुषार्थहेतुः । (R.K.)
अध्रुवैः–ब्रह्मज्ञानभक्त्यादिहीनैः, ध्रुवम्–ब्रह्म । (R.K.)

(4) अनित्यद्रव्य refers to mind etc., means that are devoted to God. अकारवाच्यं ब्रह्मरूपं वस्तु विषयतया येषामस्तीति तानि अनित्यानि । अनित्यानि च तानि द्रव्याणि मनः प्रभृतीनि तैः नित्यं शाश्वतं ब्रह्म । (R.K.)

In this verse Yama informs Nachiketa that (i) God is the final goal, (ii) He cannot be obtained by weak-minded, (iii) Yama obtained his knowledge by turning his mind towards him devotedly.

(5) This verse is fully explained as follows :-

अनित्यम् अकारवाच्यं ब्रह्म नित्यं शेवधिः निधिरिति परमपुरुषार्थहेतुरिति जानामि । अध्रुवैः न विद्यते ध्रुवं ब्रह्म येषां तैः अध्रुवैः ज्ञानभक्त्यादिहीनैः ध्रुवं शाश्वतं

ब्रह्म न प्राप्यते । अनित्यानि अकारवाच्यं ब्रह्म नित्यं वस्तु विषयतया येषामस्ति तानि द्रव्याणि मनः प्रभृतीनि तैः अनित्यद्रव्यैः अग्निः चितः तेन नित्यं शाश्वतं ब्रह्म आप्तवानस्मि । (R.K.)

[I-2-11] Expl. (1) Some of the important characteristics of God are explained here.

क्रतोरानन्त्यम्–क्रतोः भगवदीयकर्मणः भगवदीयज्ञानस्य वा आनन्त्यम् ।

स्तोममहत्–स्तोमाः स्तोत्रसाधनीभूतमन्त्राः तेभ्यः महत्, स्तोमैः साकल्येन प्रतिपादयितुमशक्यमिति यावत् ।

उरुगायम्– उरुभिः ब्रह्मादिभिः मुमुक्षुभिर्वा गीयते इति उरुगायम् । प्रतिष्ठाम्– मुक्ताश्रयम् । (R.K.)

[I-2-12] Expl. (1) The nature of God who regulates the liberated, being present in them, is explained here.

मुक्तनियामकभगवत्स्वरूपज्ञानेनैव मुक्तिः इति भावेन मुक्तस्थितभगवज्ज्ञानस्य मोक्षसाधनत्वमाह । (V.T.)

(2) गह्वरेषम्–मुक्तजीवे स्थितम्, संसार्यगम्यत्वात् मुक्तो गह्वरो ज्ञेयः ।

(3) (i) अध्यात्मयोगेन–ध्यानयोगेन (R.K.)

(ii) अधिकश्चासौ आत्मा च अध्यात्मा स एव योगो मोक्षोपायः इत्यध्यात्मयोगः तस्य अधिगमः तदपरोक्षज्ञानं तेन । (V.T.)

[I-2-13] Expl. (1) (i) धर्मम्–जगद्धारकम्, प्रवृह्य–जीवात् पृथक् कृत्य, सम्परिगृह्य–सम्यग् ज्ञात्वा, सद्म–वैकुण्ठद्वारम् ।

(ii) मोदनीयम्–सन्तोषणीयं भगवन्तम् । (V.T.)

(iii) The reading धर्म्यं is explained as धर्म एव धर्म्यः । (V.T.)

In this verse the important doctrine of God being present in the liberated as distinct from him and regulating him is specifically stated. This knowledge will enable the seekers to obtain the right knowledge of God.

[I-2-14] Expl. (1) Nachiketa wants to know the nature of God as distinct from all others. He mentions some of the distinctions and wants to know the God who is beyond all these.

तत्वं ब्रूहीति 'प्रवूह्ये'त्यनेनोक्तं जीवाद् भेदं सविशेषमनुवदन् प्रार्थयते । (V.T.)

(2) कृताकृतात्–कार्यात् कारणाच्च, अन्यत्–तदुभयविलक्षणम् । (R.K.)

(3) Vedeśatīrtha interprets this verse slightly differently as follows :-

धर्मात् पुण्यात्मनो जीवादन्यत् । अधर्मात्मनो जीवादन्यत् । न केवलं चेतनादेव किन्तु कृताकृतात् कार्याकार्यादचेतनादपि अन्यत् । न केवलं वर्तमानादेव किन्तु भूतात् भव्याच्चान्यत् । तत् मुक्तनियामकं ब्रह्म यत् येन प्रकारेण पश्यसि तत् तेन प्रकारेण वद । (V.T.)

The fact of God being distinct from both Jīva and Jada is brought out here.

[I-2-15] Expl. (1) आमनन्ति–मुख्यवृत्त्या बोधयन्ति, यत्पदम्–यस्य स्वरूपम्, तपांसि–कर्माणि, ब्रह्मचर्यम्–ब्रह्मगोचरश्रवणादिकम्, उर्ध्वरेतस्त्वादिव्रतं वा । (R.K.)

(2) एतत्पदं ॐ इत्युच्यते (R.K.) ॐ गुणपरिपूर्णत्वात् ॐ नामकम् । (V.T.)

[I-2-16] Expl. (1) अक्षरम्–अविनाशि, परं अक्षरम्–परमाक्षरनामकम् । (R.K.)

(2) एतदेव–ॐ नामकमेव, परम्–सर्वोत्तमम् । (V.T.)

[I-2-17] Expl. (1) श्रेष्ठमालम्बनम्–मुख्याश्रयम्, परमालम्बनम्–विलक्षणाश्रयम् । (R.K.)

(2) एतद्ध्येवाक्षरं ब्रह्म विष्ण्वाख्यं परमव्ययम् ।
सर्वस्यालम्बनं ज्ञात्वा मुच्यते नात्र संशयः ॥ (M.B.)

[I-2-18] Expl. (1) In this verse it is stated that one who attains Bramhaloka will not have birth and death. Birth and death pertain

to body only. The liberated has no gross body. There is no birth and death for Jīvasvarūpa either during bondage or when liberated. God is bimba, Jīva is pratibimba. The bimba is eternal. Therefore, pratibimba is also eternal.

(i) भगवतो जन्ममृतिहीनत्वात् तादृशभगवद्बिम्बपश्चितोऽपि देहयोगवियोगरूप-जन्ममृती न स्तः । (R.K.)

(ii) कुतो न जायते इत्यतो बिम्बस्य जननादिराहित्यादित्युक्तं नायं कुतश्चिदिति । (Vyāsatīrtha Tīka)

(iii) स्वरूपतो जन्माद्यभावाच्च नोक्तरूपजन्ममृती ज्ञानिनः । स्वरूपेण जननं बन्धवेलायामपि नास्ति किमुत मुक्तौ । (R.K.)

(2) (i) पुराणः–परं देहमणति गच्छतीति पुराणः । देहबन्धयुक्तः । (R.K.)

(ii) शाश्वतः–अविकारः (R.K.)

[I-2-19] Expl. (1) Death pertains to body only. The soul being eternal cannot be slain. जीवस्वरूपस्य नित्यत्वादिति भावः । (R.K.)

[I-2-20] Expl. (1) अस्य जन्तोः–जीवस्य, अक्रतुः–अकारवाच्यविष्णु-विषयकक्रतुशब्दितनिश्चयवान्–He who has firm faith in Viṣṇu conveyed by 'अ' kara.

[I-2-21] Expl. (1) In this verse the great power of God i.e., possessing of contradictory attributes is explained.

आसीनो दूरं व्रजति शयानो याति सर्वतः ।
ऐश्वर्याद् भगवान् विष्णुः विरुद्धं घटयत्यसौ ॥ (M.B.)

(2) मदामदम्–मदश्च अमदश्च यस्माद् भवतः असौ मदामदः तम् । (Vyāsatīrtha Tīka)

(3) मदामदः–विबुधासुरसुखदुःखकारणमिति यावत् । (V.T.)

(4) Sri Vedeśatīrtha interprets 'क' as Chaturmukhabrahmā and explains as follows :-

मदन्यः कः ब्रह्मैव तं सकलवेदोक्तप्रकारेण ज्ञातुमर्हति न त्वन्य इत्यर्थः ।

Only Chaturmukhabrahmā, other than me, can understand him (through the entire Vedas) but no one else. (V.T.)

[I-2-22] Expl. (1) अशरीरम्–शरीरनिमित्तकविकाररहिततया स्थितम् विभुम्–समर्थम्, आत्मानम्–स्वामिनम् । (R.K.)

(2) अशरीरम्–प्राकृतशरीररहितम्, विभुम्–व्याप्तम् । (V.T.)

[I-2-23] Expl. (1) The importance of God's grace is brought out in this verse. यमेव वृणुते–यस्मै प्रसीदति ।

(2) Since God is avyakta he cannot be realised without his grace. कथमन्यथा अव्यक्तैकस्वभावस्य तत्प्रसादं विना अपरोक्षतेति भावः । तथाच सूत्रम् 'अतोऽनन्तेन तथाहि लिङ्गमि'ति । (R.K.)

[I-2-24] Expl. (1) In this verse it is stated that to obtain God's grace good conduct, withdrawal of mind and senses from the worldly objects, correct assessment of the priorities of things and dedication to God are very essential.

तद्दृष्टेः प्रसादैकलभ्यत्वे किं वैराग्यादिसाधनैरित्यतः ज्ञानद्वारा प्रसादहेतुतया तदप्यावश्यकमिति भावेनाह । (R.K.)

(2) अशान्तः–श्रवणमननध्यानैः भगवन्निष्ठारहितः, असमाहितः–यथावस्तु तथा ज्ञानहीनः, अशान्तमानसः–विषयभोगे अलंबुद्धिहीनः, प्रज्ञानेन–प्रज्ञानद्वारा, एनं भगवन्तं तत्प्रसादं नाप्नुयात् । (R.K.)

(3) Sri Vedeśatīrtha takes the negative particle न with all the adjectives and explains the purport of this verse as follows :-

यो दुश्चरितादविरतोऽनिवृत्तो न किन्तु सर्वात्मना निवृत्त एव । अशान्तो भगवन्निष्ठारहितो न किन्तु तन्निष्ठबुद्धिरेव । असमाहितो यथावस्तुज्ञानादिशून्यो न किन्तु यथावस्तुज्ञानादिमानेव । अशान्तमानसो विषयालंबुद्धिशून्यो न किन्तु विषयालंबुद्धिमानेव सोऽपि प्रज्ञानेनैव भगवदपरोक्षज्ञानेनैव एनं प्राप्नुयादित्यर्थः । (V.T.)

[I-2-25] Expl. (1) In this verse the glory of God as the destroyer of all is explained. भगवतः सर्वसंहारकत्वरूपं माहात्म्यं वदन् तस्य दुर्ज्ञेयत्वमाह । (V.T.)

(2) ब्रह्म, क्षत्र and मृत्यु can be taken in their wellknown senses of people of Brāhmaṇa and Kṣatriya varṇas, and the deity of death, and also in their special senses of Brahmā, Vāyu and Rudra. तत्र ब्रह्मशब्देन ब्राह्मणजात्यभिमानी स्वयं ब्राह्मणः चतुर्मुखो ग्राह्यः । क्षत्रशब्देन क्षत्रजात्यभिमानी स्वयं क्षत्रियो वायुः । मृत्युः मारणात् मृत्युनामा रुद्रः । (V.T.)

(3) यत्र–वैकुण्ठादौ, इत्था–उक्तप्रकारेण । (V.T.)

(4) Sri Vedeśatīrtha explains, 'क इत्था' etc., in another way– कः चतुर्मुख एव इत्था वेदोक्तप्रकारेण तं वेद । यत्र के ब्रह्मणि च परमात्मा तिष्ठति नियामकतया स इत्यन्वयः । एवञ्च स्वान्तर्गतभगवत्प्रसादादेव वेदेति लभ्यते । (V.T.)

It is only Chaturmukhabrahmā, who with the grace of God present within him, knows where God is and how he is.

इति काठकोपनिषदि प्रथमाध्यायस्य द्वितीयावल्ली समाप्ता

प्रथमाध्यायस्य तृतीयवल्ली

[I-3-1] Expl. (1) In this verse, the place of meditation, and the two forms of God that are at the place of meditation are described. The two forms of God viz., Atma and Antaratma are present at the heart. These forms are present in Mukhyaprāṇa who is present at heart, and who is the chief seat of the supreme (God). Thus both Mukhyaprāṇa, and the two forms of God in him are present at the heart. God present in his two forms enjoys the fruits of the good deeds of the person concerned in order to favour him. Ṛta means the fruits of good deeds. The two forms of the God are compared to shade and light to indicate that these

bestow joy and sorrow. Thus two important tenets are mentioned here–

(i) Mukhyaprāṇa is the chief seat of God. God is present in Mukhyaprāṇa who is present in the heart. (This fact of Mukhyaprāṇa being the chief seat of God is also mentioned in the Isavasya hymn वायुरनिलममृतम् etc.)

(ii) God enjoys the fruits of good deeds in order to bestow his favour.

(2) (i) सुकृतस्य लोके–पुण्यसम्बन्धिनि लोके, पुण्यनिर्मितशरीरे ।

(ii) परमे–सर्वजीवोत्तमे, परार्धे–परम्-अत्यन्तम्, आसमन्तात् ऋद्धे अभिवृद्धे ज्ञानादिपूर्णे मुख्यवायौ ।

(iii) ऋतम्–सुकृतफलं पिबन्तौ आत्मान्तरात्माख्यविष्णुरूपविशेषौ । (R.K.)

(3) Those who know and can speak about such God, are those who perform five Yajñas, five Agnividyas, and Nachiketa sacrifice thrice.

(i) पञ्चाग्रयः – देवपितृभूतमनुष्यब्रह्मयज्ञरूपपञ्चमहायज्ञवन्तः, द्युपर्जन्यपृथिवी-पुंस्त्रीरूपपञ्चाग्निनिष्ठा वा ।

(ii) छायातपौ–साध्वसाध्वोः छायातपौ इव सुखदुःखदौ । (R.K.)

(4) The import of this katha hymn is discussed in Guhadhikarana of Brahmāsutras in detail 'गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्' । The full implication of this hymn is 'हृदयगुहास्थवायौ ध्येय इति भावः । (R.K.)

(5) आत्मान्तरात्मेति विभुरेक एव द्विधा स्थितः ।
स विष्णुः परमे वायौ परेभ्योप्युद्धरूपके ।
शुभान् पिबति भोगान् स छायेव विदुषां प्रभुः । (M.B.)

God is present in his two forms Atma and Antaratma in Vāyu (who is present in the heart) and enjoys the fruits of the good deeds of wise men.

[I-3-2] Expl. (1) सेतुः—मर्यादा, ईजानानाम्—विष्णुयाजिनाम् । (R.K.)
नाचिकेतमग्निम्—अग्निस्थं भगवन्तम्, शकेमहि—ध्यातुं शक्ताः स्मः । (V.T.)

[I-3-3,4] Expl. (1) In these verses, the functioning of a Jīva is described with the chariot-metaphor.

(2) आत्मानम्—शरीरान्तर्व्यापिनं जीवम्, प्रग्रहम्—रज्जुम्, गोचरान्—विषयभूतान् शब्दादीन्, विषयान्—अश्वसञ्चारानुकूलदेशान् । (R.K.)

[I-3-5,6] Expl. (1) The chariot-metaphor is further continued here.

(2) (i) अविज्ञानवान्—विवेकहीनः, विज्ञानवान्—सारासारविवेकवान् । (R.K.)

(ii) अविज्ञानवान्—शास्त्रादिजनितविशेषबुद्ध्याख्यविवेकिसारथिशून्यः । (V.T.)

[I-3-7,8] Expl. (1) अविज्ञानवान्—विवेकाख्यबुद्धिरूपसारथिहीनः, अशुचिः—विषयलम्पटत्वात् । (R.K.)

(2) तत्पदम्—सर्वे वेदा इत्युक्तं ब्रह्मस्वरूपम् । (R.K.)

[I-3-9] Expl. (1) अध्वनः—संसारपदव्याः, पारम्—तीरभूतम्, तद्विष्णोः परमं पदं स्वरूपमाप्नोति । (R.K.)

[I-3-10,11] Expl. (1) In order to stress that meditation of God be undertaken with the knowledge that God is the highest in the hierarchy of deities, the hierarchy is described here. भगवद्ध्यानं तारतम्यान्तर्गत्वेन कार्यमिति भावेन देवतातारतम्यमाह । (R.K.)

2. The words इन्द्रिय, अर्थ, मनस् etc. stand for the respective presiding deities here. The details of the presiding deities are as under :

(i) The presiding deities of the five Jnanendriyas and the five Karmendriyas are : सोमकुबेरसूर्य- वरुणाश्व्यग्नीन्द्रजयन्तयमदक्षाः । (R.K.)

(ii) The presiding deities of the five objects śabda, sparśa, rūpa, rasa and gandha are सौपर्णी वारुणी पार्वती तिस्रो देव्यः । (R.K.)

Though śabda, sparśa etc., are five, सौपर्णी and वारुणी preside over two each, and पार्वती presides over the fifth object.

(iii) The presiding deities of मनस्, बुद्धि, महत्, and अव्यक्त are as under :

रुद्रवीन्द्रशेषाः मनोभिमानिनः, बुद्धितत्त्वाभिमानिनी सरस्वती, महत्तत्त्वाभिमानी विरिञ्चः, अव्यक्ताभिमानिनी (प्रकृत्यभिमानिनी) श्रीः (R.K.)

These presiding deities belong to the hierarchical order of deities as described in the verses इन्द्रियेभ्यः परा हि अर्थाः etc. that is to say, the presiding deities of objects are higher than the presiding deities of senses and so on.

3. For Śrotra etc., senses and objects there are more than one presiding deity. Therefore, enumeration of the presiding deities slightly differs in different contexts. This does not amount to any contradiction, श्रोत्राद्यभिमानिनः बहव इति अन्यत्रान्यथा उक्तावपि अविरोधः (V.T.)

[I-3-12] Expl. **(1)** The God who is highest in the hierarchy of deities, is present in all beings. But he cannot be seen by all. Only those who have sharpened their intellect by the study of scripture etc., and have obtained God's grace, can see him.

(2) तु indicates the obtaining of God's grace. तुः भगवत्प्रसाद-हेतुद्योतकः । (R.K.)

(3) अग्र्या–श्रवणादिजनितया भगवत्प्रसादसध्रीचीनया । (R.K.)

[I-3-13] Expl. (1) Here the speech, mind etc., stand for the respective presiding deities. These deities are controlled by the higher deities in the hierarchy as explained in this and earlier two verses. All these are ultimately controlled by the supreme God.

(i) यच्छेत् means नियतान् चिन्तयेत् । नियमनं नाम तदधीनत्वचिन्तनम् । तन्नियतान् चिन्तयेदित्यर्थः । (R.K.) considering the वागभिमानिदेवता as

controlled by मनोभिमानिदेवता is meant by यच्छेत् वाङ् मनसि । This is further extended.

(ii) वाचम्–वागभिमानिनीः उमाद्याः तिस्रः देवीः, मनसि मनोभिमानिषु शिवशेषसुपर्णेषु यच्छेत् तन्नियतत्वेन ध्यायेत् । मनोभिमानिनः ज्ञाने आत्मनि–ज्ञानाभिमानिन्योः सरस्वतीभारत्योः विरिञ्चवाय्वोः यच्छेत् । तत् शान्ते आत्मनि–सुखरूपे आत्मनि परमात्मनि यच्छेत् । (R.K.)

The presiding deities of Vak viz., Parvati, Varuni and Sauparni are controlled by the presiding deities of mind viz., Śiva, Seṣa and Suparna. These are controlled by the presiding deities of Jñāna viz., Sarasvati and Bharati. These are controlled by the presiding deities of Mahat viz., Brahmā and Vāyu. These are controlled by the Supreme God.

(iii) In between Virincha-Vāyu and Supreme God, avyakta or Sritatva should be taken. This is not explicitly stated because Sri being the wife of the Lord, her being controlled by the Lord goes without saying. श्रीतत्वस्य स्वभर्तृनियतत्वं सिद्धमेवेति नोक्तम् । (R.K.)

(iv) At the beginning, the fact of the presiding deities of senses being controlled by the presiding deities of Vak be understood though it is not mentioned in this verse.

(v) प्राज्ञः ज्ञानी इन्द्रियाभिमानिनः प्रागुक्तान् सोमादीन् वाचि वागभिमानिनीषु पार्वतीवारुणीसौपर्णीषु यच्छेदिति आदौ योज्यम् ।

[I-3-14] Expl. (1) उत्तिष्ठत–नानाविधविषयचिन्तनात् निवृत्ता भवत । जाग्रत–आलस्यं मुञ्चत । (R.K.)

(2) वरान्–उत्तमाचार्यान् । (V.T.)

[I-3-15] Expl. (1) अशब्दम्–शब्दगुणहीनं शब्दावेद्यं च, अस्पर्शम्–स्पर्शगुणहीनं त्वग्विषयत्वहीनम् । (R.K.) and so on.

(2) भौतिकरूपादिराहित्यादेव अव्ययं नाशहीनम् । महतः–महत्तत्वाभिमानिचतुर्मुखात् परम्, ध्रुवम्–शश्वदेकप्रकारम्, मृत्युमुखात्–संसृतिबन्धात् । (R.K.)

(3) अशब्दमित्यादिना पञ्चतन्मात्रवैलक्षण्यमुच्यते ।
अगन्धमित्यनेन उपलक्षणतया पञ्चमहाभूतवैलक्षण्यम् । (V.T.)

[I-3-16] Expl. (1) Here the benefits of reciting, listening and making this teaching listened are narrated.

(2) द्विरुक्तिः आदरार्था । प्रोक्तसर्वावधारणार्था च । (R.K.)

इति प्रथमाध्यायस्य तृतीयावल्ली समाप्ता

द्वितीयाध्यायस्य प्रथमावल्ली

[II-1-1] Expl. (1) The senses normally proceed outward towards the external objects and get engrossed in them. But a wise man withdraws them from the outside objects and fixes his mind on the God within himself.

(2) खानि-इन्द्रियाणि, पराञ्चि-पराङ्मुखानि, व्यतृणात्-कुत्सितान्यकरोत् । पराक्-बाह्यान् विषयान् । (R.K.)

(3) स्वयम्भूः-स्वतन्त्रः भगवान्, तत्पुत्रः ब्रह्मा वा । (R.K.)

(4) आवृत्तचक्षुः-विषयेभ्यः परावृत्तचक्षुरादिकरणः । (R.K.)

[II-1-2] Expl. (1) बालाः-अविवेकिनः, पराचः-बाह्यान्, विततस्य-बहुकालीनस्य, मृत्योः-अविद्याकामकर्मादिः । (R.K.)

[II-1-3] Expl. (1) After Yama stressed the importance of vairāgya in the earlier two verses, Nachiketa who had already developed such vairāgya asks Yama to teach him the nature of God who regulates the liberated. Nachiketa points out that the Jīva under goes the worldly experiences by the direction of God only. He asks-is it the very God who remains after liberation and regulates Jīva? Yama confirms it by saying 'एतद्वै तत्'

(2) (i) येन एतेनैव ब्रह्मणा प्रेरितः रूपादीन् विजानाति तदेतत् जीवप्रेरकं ब्रह्म अत्र मोक्षे परिशिष्यते जीवप्रेरकत्वेन आस्ते किमिति प्रश्नार्थः । इति पृष्टो यमः प्रत्युत्तरमाह–एतद्वैतदिति ।

(ii) नचिकेताः स्वयं विषयव्यावृत्तेन्द्रियवान् पुनरपि जीवनियामकभगवत्स्वरूपं पृच्छति । (V.T.)

[II-1-4] Expl. (1) The fact of God being the regulator of Jīva in the states of deep-sleep, dream, and waking is explained here.

(2) The statement 'हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्' (II-2-6) should be preponed here, since the teaching of the nature of God who regulates Jīvas in all states and after liberation commences here. That is why the verse 'हन्त ते' etc., is commented upon here in the Bhāshya. 'हन्त त इदं प्रवक्ष्यामि' इति प्रतिज्ञावाक्यमत्रादौ योज्यमिति वदन्ति । भाष्ये अत्रैव व्याख्यानात् । (R.K.)

(3) अत्र स्वप्नान्तशब्दः स्वप्नसुषुप्त्युभयाभिप्रायेण । (V.T.)

[II-1-5] Expl. (1) Yama mentions some more characteristics of God here and confirms that this is exactly the nature of God asked by Nachiketa.

(2) (i) मध्वम्—मधु सुखमत्तीति मध्वदः तम् । देहे स्थित्वा सारभोक्तारमिति यावत् । (R.K.)

He who enjoys the essence being present in the body. This is an adjunctive of God.

(ii) जीवमन्तिकात्—जीवसमीपे तन्नियामकतया स्थितम् । (R.K.)

(iii) न विजिगुप्सते—आत्मानं गोप्तुं रक्षितुं नेच्छति । भगवानेव सर्वत्र रक्षकतया आस्ते इति ज्ञात्वा स्वात्मरक्षणार्थं न प्रयतते । (R.K.)

(iv) एतद्वै तत्—यत् त्वया पृष्टं तत् एतद्वै प्रागुक्तगुणकं वै । (R.K.)

जीवस्यान्तिके । नहि स्वेस्य स्वयं जीवोऽन्तिके भवति । वस्त्वन्तरस्य हि दूरत्वमन्तिकत्वं वा (M.B.) जीवमिति द्वितीया षष्ठ्यर्था । अन्तिकादिति पञ्चमी सप्तम्यर्थेत्युक्तं भवति । (V.T.)

[II-1-6] Expl. (1) अजातम्—पूर्वमजातं चतुर्मुखम् । अजातमिति विशेषणं तु भगवन्मुखाद्यवयवतो जाता एवेन्द्रादयः कश्यपात् पुनर्जायन्ते । न तथा भगवतो ब्रह्मा । किन्तु पूर्वमजात एव भगवतो जात इति वक्तुम् । (R.K.)

इन्द्र etc., deities are born from the respective limbs of God and also from कश्यप. But ब्रह्मा is born from God alone. This is indicated by referring to him as अजात here.

(2) (i) तपसः–तपोनामकात्, अद्भ्यः–अन्नामकेभ्यः भूतेभ्यः पूर्वं अजायत–अजनयत् । (R.K.)

(ii) गुहां प्रविश्य तिष्ठन्तं स्वात्मानं भूतेभिः–भूतैः सह व्यपश्यति । (R.K.)

(3) (i) अन्नामभ्यश्च भूतेभ्यः तपोनाम्नः शिवादपि
पूर्वं यो जनयामास पूर्वजातं चतुर्मुखम् ।
स्वात्मानं च गुहासंस्थं सर्वभूतैः सहाभिभूः
यः पश्यति सदा विष्णुः स एष हृदि संस्थितः ॥ (M.B.)

(ii) यथा 'मुखादिन्द्रश्चाग्निश्चेत्यादिना जाता एव इन्द्रादयः कश्यपात् पुनर्जायन्ते न तथा भगवतो ब्रह्मा । किन्तु अजातमेवाभ्यः पूर्वमजायत जनयामास । (M.B.)

[II-1-7] Expl. (1) अदनात् सर्वभक्षणात् अदितिनाम्नी, देवतामयी–सर्वदेवोत्तमा, या–भगवत्तनुः, व्यजायत–विविधतया जनयामास मत्स्यादिनानारूपतया स्वात्मानं प्रादुर्भावयामास । (R.K.)

(2) अदनाददितिर्विष्णुर्यः प्राणसहितः स्थितः ।
उत्तमो देवताभ्यश्च स्वो त्मानं विविधात्मना ॥
मत्स्यकूर्मादिरूपेण गुहासंस्थमजीजनत् ।
भूतैः सह महाविष्णुः परमात्मा युगे युगे ॥ (M.B.)

[II-1-8] Expl. (1) (i) अरणी ordinarily means sacrificial fire-producing pair of sticks. But here it refers to the pair of the teacher and pupil. ऋगतौ इत्यतः कर्मण्यकारे गुणे च अरेति रूपम् । अरः ज्ञायमानः णः सुखरूपः हरिः याभ्यां गुरुशिष्याभ्यां तौ गुरुशिष्यौ अरणी । (R.K.)

(ii) जातं सर्वं वेत्तीति जातवेदाः, अदनादग्निनामा हरिः, ईड्यः–स्तुत्यः ।

(2) (i) सर्वज्ञो भगवान् विष्णुररण्योर्गुरुशिष्ययोः ।
सुभृतः स्तूयते नित्यं जानद्भिः पुरुषोत्तमः । (M.B.)

(ii) अर्यते ण आभ्यामित्यरणी । (M.B.)

[II-1-9] Expl. (1) सूर्यः सृष्टिकाले यतः उदेति । यत्र च हरौ प्रलयकाले अस्तं गच्छति । (R.K.)

(2) अर्पिताः–तमाश्रित्य स्थिताः । (R.K.)

(3) तं गुणतः स्वरूपतो वा कश्चन न उ नैवात्येति । (R.K.)

[II-1-10] Expl. (1) Here the absence of difference among different forms of God is stressed. There is no difference either between Mūla-rūpa and avatāra-rūpas or between one avatāra-rūpa and another. There is neither difference, nor difference and non-difference (bheda or bhedabheda). To see any such difference is sinful and will lead to Tamas.

2) यः प्रादुर्भावगो विष्णुर्देहादिषु च संस्थितः ।
स एव मूलरूपश्च साक्षान्नारायणाभिधः ॥
मूलरूपश्च यो विष्णुः प्रादुर्भावादिगश्च सः ।
गुणतः स्वरूपतो वापि विशेषं योऽत्र पश्यति ॥
अत्यल्पमपि, मृत्वा स तमोन्धं यात्यसंशयम् ।
भेदाभेदविदश्चात्र तमो यान्ति न संशयः ॥ (M.B.)

(3) (i) इह–देहादिषु, यदवतारजातमस्ति तदेव अमुत्र–वैकुण्ठादिलोकेषु मूलरूपतया आस्ते तयोः कश्चिदपि भेदो नास्ति । यदमुत्र मूलरूपमस्ति तदनु देहादिषु स्थितमवतारजातम् । (R.K.)

(ii) च इह भगवन्मूलरूपावताररूपेषु नाना-नानत्वम्, इव शब्दात् भेदाभेदं वा पश्यति स मृत्योः मृत्युं मरणं तमोलक्षणं प्राप्नोति । (R.K.)

(iii) इवशब्दार्थ अत्यल्पमिति । (V.T.)

इव indicates two points : (i) not even slight, (ii) not even difference and non-difference. One should not see even slight difference between Mūla-rūpa and avatāra-rūpa, nor should see difference and non-difference (bhedābheda) between them is the implication of इव ।

भवेदेकत्र संयोगे इव शब्दो विरुद्धयोः ।
धर्मयोरुपमायां वा स्वल्पत्वे वा विवक्षिते ॥ इति शब्दनिर्णये । (M.B.)

नानेव इति 'इव' शब्दः अत्यल्पविषयः भेदाभेदविषयश्च । (M.B.)

[II-1-11] Expl. (1) In the previous verse, it was stated that there is no difference between Mūla-rūpa and avatāra-rūpas of God. In this verse it is stated that there is no difference between quality, actions etc., of God and him. There is no difference between avayava and avayavin also in respect of God. Thus, there is no repetition of the points made in these two verses. अतः पूर्वेण न पौनरुक्त्यं तस्य स्वरूपविषयत्वादस्य च गुणकर्मावयवविषयत्वात् । (R.K.)

(2) तथैवावयवानां च गुणानां च परस्परम् ।
क्रियाणां तेन चैतेषां भेदविच्चोभयंविदः ॥
यान्त्येवान्धन्तमो नात्र कार्या काचिद्विचारणा । (M.B.)

(3) इह मूलरूपे अवताररूपेषु वा किञ्चन गुणकर्मादिकं नाना भिन्नं नास्ति । (R.K.)

(4) मनसा–श्रवणादिसंस्कृतेन मनसा । (V.T.)

[II-1-12] Expl. (1) Here the thumb-size form of God is described for the sake of meditation. Because the heart is of thumb-size, the God manifest at the heart is described as thumb-size.

(i) उपासनार्थं परिमाणविशेषमाह अङ्गुष्ठमात्र इति । (R.K.)

(ii) हृदयस्य तत्तदङ्गुष्ठपरिमितत्वात्तत्रस्थोपि तथा उपचर्यते । तन्मात्रपरिमाणाभिव्यक्त्या वा तथोच्यते इति भावः । (R.K.)

[II-1-13] Expl. (1) (i) अधूमकः–निर्मलः (R.K.) धूमानावृताग्निरिव प्रकाशरूप इत्यर्थः । (V.T.)

(ii) स एवाद्य स उ श्वः अनादिनित्य इत्यर्थः । (R.K.)

[II-1-14] Expl. (1) It is already stated that there is no difference between the quality, actions etc., the attributes of God and God. The consequences of the wrong knowledge of such difference are explained here with a simile.

(2) विष्णोः धर्मान् आश्रयादन्योन्यं वा पृथक् पश्यन् नानेव भेददृष्टाननु तद्दर्शनानन्तरमेव विधावति–तमः प्राप्नोति । (R.K.)

[II-1-15] Expl. (1) Here it is stated that the liberated souls become similar to God but not identical with him.

(2) (i) तादृगेव भवति न तु तदेव वृद्धिदर्शनात् । (R.K.)

(ii) तादृगेव भगवत्सदृश एव भवति । न तु स एव । (V.T.)

(3) (i) विजानतो मुनेः विजानतां मुनीनामात्मा स्वामी मुक्तः चतुर्मुखः एवं भवति भगवत्सदृश एव भवति । न तु तदैक्यमाप्नोति । जीवास्तु नाप्नुवन्तीति किमु वक्तव्यमित्यर्थः । (R.K.)

(ii) विजानतो मुनेरात्मा स्वामी वायुरपि मुक्तः सन् तादृगेव भवति । किमन्ये जीवा इत्यर्थः । (V.T.)

Even Chaturmukha and Vāyu who are the chief among the knowers and masters of other knowers will become similar to God after liberation but not identical. Therefore there is no question of other Jīvas becoming identical with God.

सर्वेषां ज्ञानिनामात्मा देवानां च विशेषतः ।
मुक्तो वायुश्च सादृश्यमेव विष्णोस्तु गच्छति ॥
न तु तद्रूपतां याति किम्वन्ये देवमानुषाः ।
आभासाभासरूपास्तु वायोर्देवस्य सर्वशः ॥ इति भविष्यत्पर्वणि । (M.B.)

इति काठकोपनिषदि द्वितीयाध्यायस्य प्रथमावल्ली

द्वितीयाध्यायस्य द्वितीयवल्ली

[II-2-1] Expl. (1) The fact of body etc., being under the control of God, and therefore, one should not think it as 'mine' is

stressed in this verse : देहादेः भगवदधीनत्वं ज्ञात्वा ममतां जह्यादिति भावेनाह । (R.K.)

(2) The eleven outlets of a body are : श्रोत्रद्वयम्, चक्षुर्द्वयम्, मुखम्, पायूपस्थे, मनोबुद्धी च । (R.K.)

Sri Vedeśatīrtha mentions these eleven outlets slightly differently : चक्षुषी श्रोत्रे नासिके मुखं चेति सप्तशीर्षण्यानि । नाभिरासनं गुह्यं चेति त्रीणि । शिरसि एकमिति एकादशद्वारमिदं पुरम् । (V.T.)

(3) अवक्रतेजसः–ऋजुज्ञानिनः भगवतः (V.T.) अनुष्ठाय–भगवदधीनतया निश्चित्य, ममतात्यागी न शोचति । (R.K.)

(4) देहाभिमानाभावेन प्रागेव विमुक्तो ज्ञानी प्रारब्धावसाने निश्शेषतो विमुच्यते । (R.K.)

(5) एतद्वै तत्–त्वया पृष्टमेतद्वै । देहादिनेतृत्वमुक्तिप्रदत्वगुणकं वै । (R.K.)

[II-2-2] Expl. (1) The glory of God is described here bringing our many of his characteristics :

हंसः–हं चासौ दोषहीनश्चासौ साररूपश्च हंसः flawless, essence of all.

शुचिषत्–शुचौ–वायौ, अस्तीति शुचिषत् वायुस्थः present in Vāyu.

वसुः–वं–वरं, सु–सुखं यस्य सः वसुः blissful.

होता–जुहोति–शब्दादिविषयानति अनुभवतीति इन्द्रियादिस्थः present in the senses.

वेदिषत्–वेद्यां पूज्यतया अस्तीति वेदिषत् present in the sacrificial altar.

अतिथिः–अति–अतिशयितं थम्–अन्नं यस्य सः अतिथः स एवातिथिः one who has plenty of good.

दुरोणसत्–सोमरसपात्रे द्रोणकलशे तिष्ठतीति दुरोणसत् present in the pot of Somarasa.

वरसत्–वरेषु ब्रह्मादिदेवेषु अस्तीति वरसत् present in Brahma etc. deities.

ऋतसत्–ऋते–यथार्थरूपे वेदे अस्तीति ऋतसत् present in the Vedas.

व्योमसत्–प्रकृतिस्थः । श्रीः व्योम इत्युच्यते present in Prakṛti i.e., Sree.

ऋतजा–ऋतेषु भगवन्तं प्राप्तेषु मुक्तेषु जातानि ज्ञानादीनि तत्र आस्ते इति ऋतजाः । (present in the liberated).

ऋतम्–मुख्यतो वेदप्रतिपाद्यम्–conveyed by Veda as its chief sense.

बृहत्, गुणपूर्णत्वात् has an infinite number of qualities.

These are some of the characteristics of God.

[II-2-3] Expl. (1) God directing even the breathing is described here. God referred to here is the same who is referred to as Angusthamatra earlier.

(2) प्रत्यक्–अधः (R.K.) वामनम्–वामं सौंदर्यं तत्प्रधानत्वात् स्त्रियः वामशब्द-शब्दिताः तन्नेता वामनः । (V.T.)

[II-2-4] Expl. (1) विस्रंसमानस्य–स्थूलदेहं त्यजतः, देहात्–सूक्ष्मदेहात् विमुच्यमानस्य तदपि त्यजतः । (R.K.)

(2) अत्र मुक्तौ नियामकं किं परिशिष्यते इति प्रश्नः । (R.K.)

(3) The question asked in येयं प्रेते विचिकित्सा मनुष्ये etc., is specifically repeated here to elicit ful information in this connection.

[II-2-5] Expl. (1) Mukhyaprāṇa ordinarily directs the Jīvas. But he does not do so independently. He directs them being himself directed by God. This glory of God is described here.

सर्वजीवनहेत्वोः मुख्यवायुरूपयोरपि प्रेरकत्वगुणं परिशिष्यमाणस्याह । (R.K.)

(2) मुख्यप्राणरूपाभ्यां प्राणापानाभ्यां न जीवति चेतनराशिः किन्तु इतरेण । भगवत्प्रेरिताभ्यामेताभ्यां जीवति । न स्वातन्त्र्यमिति यावत् ।

[II-2-6] Expl. (1)Since such explanation is already started and has considerably progressed, this promise has to be preponed and understood before 'स्वप्नान्तं जागरितान्तम् etc.' (II-1-4).

(2) आत्मा-परमात्मा, मरणम्–म्रियमाणं जीवं प्राप्य यथा नियामको भवति तथा प्रवक्ष्यामीत्यर्थः । (V.T.)

(3) आत्मा-जीवः मरणं प्राप्य यथा भवति तच्च प्रवक्ष्यामि । जीवेशभेदज्ञानपनायेत्यर्थः । (R.K.)

[II-2-7] Expl. (1) देहिनः–देहधारणयोग्याः, स्थाणुम्–स्थावरं देहम्, यथाकर्म यथाश्रुतम्–स्वस्वविद्याकर्मानतिक्रमेण । (R.K.)

(2) तन्नियामकतया भगवानपि योनिं प्रपद्यत इति भावः । (V.T.)

God also enters into these to regulate them.

[II-2-8] Expl. (1) कामं कामम्–स्वेच्छानुसारेण, काम्यमानं स्वाप्नपदार्थजातमिति वा अर्थः । तदाह सूत्रे 'निर्मातारं चैके पुत्रादयश्चे'ति ।

[II-2-9] Expl. (1) God is the regulator of all, since God is bimba and all others are pratibimbas of God. This bimba-pratibimba relation is explained by a simile in this verse, and in the next verse.

सर्वजीवनियन्तृत्वं दृष्टान्ताभ्यां व्यनक्ति अग्निर्यथेत्यादिना मन्त्रद्वयेन । (R.K.)

(2) भुवनं प्रविष्टः चेतनोऽग्निः यथा एकः पाकादिकर्ता नान्यः । तथाप्यस्य चेतनाग्नेः रूपं रूपं प्रति प्रतिरूपः प्रतिबिम्बः बभूव भूताग्निः । तथा सर्वभूतान्तरात्मा सर्वजीवानुप्रविष्टो भगवान् एकः स्वतन्त्रोः नान्यः । अस्य भगवतो रूपं रूपं प्रति प्रतिरूपो प्रतिबिम्बो बभूव जीवः । (R.K.)

(3) (i) A pratibimba is one 'that is dependent upon bimba and similar to bimba in some degree.

प्रतिबिम्बत्वं च तदधीनत्वे सति तत्सदृशत्वं ज्ञेयम् । (R.K.)

(ii) बहिः-बिम्बरूपाद् बहिर्भूतश्च । न तत्स्वरूपात्मा इत्यर्थः ।

A pratibimba is distinct from bimba. It is not identical with it.

[II-2-10] Expl. (1) Through the two examples given in the above two verses, the following points are made :

(1) God is one.

(2) He has many bimba forms

(3) Jīvas are many and are pratibimbas of God. Each Jīva is a pratibimba of a bimba form of God.

The examples also may be analysed in this way-

(1) Agñi or Vāyu is one (This is Chetana Agñi or Chetana Vāyu).

(2) This Agñi or Vāyu has many amśas spread into many items of fire or air. These amśas are bimbas.

(3) The achetana Agñi or achetana Vāyu that are the items of fire or air are pratibimbas.

[II-2-11] Expl. (1) Though the God is present in all beings that are full of miseries, he is not affected by thier miseries as he is distinct from them and independent. This is explained by the simile of the Sun. The Sun is present in the eye of all and regulates it. However, he is not affected by the defects of the external eye.

(2) There are two eyes–internal and external.

चक्षुः द्विविधं बाह्यम् आन्तरं चेति । बाह्यं जडम्, आन्तरं तदभिमानिसूर्यचेतनरूपम् । 'आदित्यश्चक्षुर्भूत्वा अक्षिणी प्राविशादि'त्यादेः । तथा च सूर्यः सर्वलोकस्य चक्षुः चक्षुर्नियन्तृतया चक्षुर्नामकः चक्षुरन्तस्थः । (R.K.)

(3) एकः–स्वतन्त्रः, बाह्यः–जीवस्वरूपानात्मकः । (R.K.)

[II-2-12] Expl. (1) एकः–समाभ्यधिकरहितः, एकं स्वात्मरूपं बहुधा करोति, शाश्वतम्–नित्यमभिव्यक्तम् । (V.T.)

[II-2-13] Expl. (1) नित्यो नित्यानाम्–परमनित्यः, नित्यानां नित्यत्वप्रदो वा, चेतनानां चेतनः–परमचेतनः, चेतनानां चेतनत्वप्रदो वा, शाश्वती–पुनरावृत्तिशून्या, शान्तिः–मोक्षः 'मोक्षः शान्तिश्च शरणं निर्वाणं चाभिधीयते' इति ब्राह्मे । (V.T.)

[II-2-14] Expl. (1) The God described earlier is of the nature of supreme bliss. This nature of God cannot be fully described. Nor can it be fully understood. Without the grace of God even Yama cannot understand it.

(2) तद्ब्रह्मेत्युपक्रान्तं एतदेकं रूपमिति मध्ये चोक्तं ब्रह्मणो रूपमनिर्देश्यमिदमित्थमिति निर्देष्टुमशक्यम् । परमं सुखमनिर्देश्यपरमसुखात्मकमिति ज्ञानिनो मन्यन्ते । तत्तादृक् सुखात्मकं भगवद्रूपं कथं नु जानीयां तत्प्रसादमृते । (R.K.)

(3) भगवत्प्रसादादपि किं साकल्येन तज्ज्ञानं भवतीति नचिकेताः पृच्छति । किमु भातीति । किं सम्यगिति शेषः । उत्तरमाह न भाति वेति । सम्यक् न भात्येवेत्यर्थः । (V.T.)

(4) Compared with the supreme nature of God's bliss mentioned here, the bliss of the liberated soul is only an iota of it.

एतदेव भगवद्रूपं परमं सुखम् । ज्ञानिसुखं तु तद्विप्रुण्मात्रम् ।
ब्रह्मादीनां च मुक्तानां सुखं विष्णुसुखस्य तु ।
प्रतिबिम्बस्तु विप्रुट्को विष्णोरेव परं सुखम् ॥
सम्यग् भाति न भातीति जानीयां तत्कथं न्वहम् ।
तत्प्रसादमृते दिव्यमनिर्देश्य परं सुखम् ॥ इति वाराहे । (M.B.)

Therefore, it is not bliss of the liberated that is described here but the supreme bliss of God that is described. The bliss described here is not completely indescribable but not fully describable. Its describability to some extent (with the grace of God) is also clear from the remark तदेतदिति मन्यन्ते.

[II-2-15] Expl. (1) 'न भाति न भासयते, तमेव भान्तमनु-तद्भानमनुसृत्य, तथा च 'अनुकृतेः तस्य चे'ति । (R.K.)

इति काठकोपनिषदि द्वितीयाध्यायस्य द्वितीयावल्ली समाप्ता

द्वितीयाध्यायस्य तृतीयावल्ली

[II-3-1] Expl. (1) The glory of God is described here as the ground of the entire world. The world is compared to a fig tree. The Supreme God is the ground, Lakṣmi who is also conveyed by the word ūrdhva is the root, the other deities below the Supreme God are branches. This tree is called Asvattha tree because Aśva or the Supreme God has enveloped it. It is sanātana in the sense it is ever-continuing.

(2) (i) ऊर्ध्वः सर्वोच्चः भगवान् मूलं वृक्षमूलं भूतलमिव यस्य सः ।

Ūrdhva means supreme. The Supreme God is the ground of the world tree.

(ii) अर्वाक् अर्वाञ्चः अधमाः देवाः शाखाः यस्यासौ अर्वाक्शाखः । The other deities below the Supreme God are the branches of this tree. .

(iii) भूमिगतं वृक्षमूलं तु श्रीतत्त्वं ज्ञेयम् । (R.K.)

Sree or Lakṣmi is the root of this tree. The word ūrdhva refers to Lakṣmi also.

(3) 'सर्वोच्चो भगवान् विष्णुर्मूलं भूमिवदस्य तु ।
जगदाख्यस्य वृक्षस्य शाखा देवास्ततोऽवमाः ॥
वृक्षमूलं रमादेवी सोऽश्व आशुगतेर्हरिः ।
तद्व्याप्तत्वात्तदन्नत्वादश्वत्थोऽय प्रकीर्तितः ॥
प्रवाहतोऽनादिश्च मुख्यतोऽमृतो हरिः ।
मुख्यामृतः स एवैको जगन्नित्यं प्रवाहतः ॥ (M.B.)

(4) (i) आशुगतिमत्वात् अश्वः हरिः तस्मिन् तिष्ठतीति अश्वत्थः ।

(ii) सनातनः—प्रवाहतोऽनादिः । (R.K.)

[II-3-2] Expl. (1) The Origination and functioning of the whole world is due to God who is designated as Prāṇa. He causes fear like a raised thunderbolt and all obey him.

(2) प्राणे–प्राणाख्ये हरौ स्थितम्, प्राणात् निस्सृतम्, एजति यत्प्रेरणया चेष्टते, वज्रम्–वज्रवत् । (R.K.)

(3) तदाह सूत्रकारः 'कम्पनात्' ।

(4) प्राणाख्ये तु हरौ सर्वमेजत्यस्मात्तु निस्सृतम् ।
वज्रवद्भयदं चैव स्वधर्मस्यातिलङ्घने ।। (M.B.)

[II-3-3] Expl. The glory of God viz., that all others function under his command and are afraid of him, is described here.

[II-3-4] Expl. (1) इह–मनुष्यदेहे, शरीरस्य भौतिकदेहस्य, विस्रसः–विस्रंसनात्, शरीरत्वाय–अप्राकृतचिदानन्दात्मकदेहवत्वाय, कल्पते मुक्तो भवतीति यावत् । (R.K.)

(2) स्वर्गेषु–स्वरूपभूतरमणज्ञानात्मकेषु वैकुण्ठानन्तासनश्वेतद्वीपेषु, शरीरत्वाय–चिन्मयशरीरत्वाय । (V.T.)

[II-3-5] Expl. (1) The manner of God's vision in different degrees to different levels of persons is explained here.

(2) आत्मनि–जीवे (R.K.)

परिदृश्यते–सम्यग्दृश्यते (V.T.)

जीवे स्थितस्तु भगवान् दृश्यते ज्ञानदृष्टिभिः ।
आदर्शे मुखवत् सम्यङ् न तथा पितृलोकगः ।।
ततः किञ्चित् स्पष्टतया गन्धर्वे दृश्यते हरिः ।
नात्यातपे नच्छायायां यथैवाहनि दृश्यते ।।
स्पष्टं तथा ब्रह्मलोके दृश्यते पुरुषोत्तमः । इति च । (M.B.)

God is seen very clearly by the sages, and in Brahmaloka. At pitṛloka his vision is a little dim. At Gandharvaloka it is slightly clear. These degrees of vision are explained here with appropriate similes.

[II-3-6] Expl. (1) The knowledge of the gradation of deities is necessary for knowing the Supremacy of God. Therefore, that is stressed here.

न केवलं भगवज्ज्ञानमेव मोक्षहेतुः अपितु देवतातारतम्यादि ज्ञानमपीत्याह । (V.T.)

(2) इन्द्रियाणाम्–इन्द्रियदेवतानाम्, पृथगुत्पद्यमानानाम्–विलक्षणतया उत्पद्य-मानानाम्, पृथग्व्यापारोत्पादकानां वा, पृथग् भावम्–अन्योन्यविलक्षणत्वं तारतम्य-मिति यावत्, उदयास्तमयौ–उत्पत्तिविनाशौ । (V.T.)

[II-3-7,8] Expl. (1) Here the gradation of deities leading to the Supremacy of God is explained. By senses etc., their presiding deities should be taken. Between senses and mind, the objects should be understood.

(2) इन्द्रियेभ्यः इत्यनन्तरं 'परा हि अर्थाः अर्थेभ्यश्च' इति ग्राह्यम्, सत्वम्–बुद्धिः (V.T.) अलिङ्गः–प्राकृतदेहरहितः । (R.K.)

(3) प्रागुक्तस्यैव तारतम्यस्य पुनरिह वचनं तारतम्यज्ञानपूर्वकं भगवतः सर्वोत्तमत्वज्ञान एव सर्ववाक्यानां महातात्पर्यमिति ज्ञापयितुम् । (R.K.)

(4) तारतम्यपरिज्ञानपूर्वकं सर्वतो हरेः ।
आधिक्ये सर्ववाक्यानां तात्पर्यं महदिष्यते ॥ इति च (M.B.)

[II-3-9] Expl. (1) God is avyakta or invisible by nature. Therefore, he cannot be seen by any. His original form or Mūlarūpa is beyond the vision of all. With his grace one can have his knowledge. This needs Sravaṇa, Manana, etc., and devotion.

(2) (i) मूलरूपस्य भगवतः रूपं संदृशे सम्यग्ज्ञानाय न तिष्ठति । अव्यक्तैकस्वभावत्वात् । अचिन्त्यमहिमत्वाच्च । (R.K.)

(ii) अस्य भगवतः मत्स्याद्यवताराातिरिक्तम् अन्तर्याम्यादिरूपं संदृशे सम्यग्दर्शनाय न तिष्ठति । अनायासेन दर्शनगोचरो न भवतीत्यर्थः । (V.T.)

(3) हृदा-स्नेहेन, स्नेहयुक्तेन, मनीषा–मनीषया श्रवणादिजनितज्ञानेन तत्सहकृतेन मनसा, अभिक्लृप्तः–ध्यातः संदृशे तिष्ठति । (V.T.)

(4) प्रदुर्भावानृते विष्णुमिन्द्रियैर्नैव पश्यति ।

प्रादुर्भावानपि यदा ज्ञानदृष्ट्यैव पश्यति
तदैव मुच्यते योगी न दृष्टैरिन्द्रियैः क्वचित् ॥ (M.B.)

[II-3-10] Expl. Here the importance of Pratyāhāra and Dhāraṇā are stressed.

[II-3-11] Expl. (1) Dhyāna and Samādhi constitute Yoga. But Indriya dhāraṇā is very essential for these. Therefore, that is also called Yoga. This Dhyāna, etc. Yoga is about God, with realisation of his glory as creator, destroyer, etc.

(2) धारणामेव ध्यानसमाधिलक्षणयोगमिति मन्यन्ते प्राज्ञाः इति । तयोरनतिभेदं व्यनक्ति । अप्रमत्त इति । (R.K.)

(3) भगवतः सकाशात् जगतः प्रभवाप्ययौ प्रति योगः ।जगत्प्रभवाप्ययकर्तारं भगवन्तं प्रति योगः कर्तव्य इत्येतत् प्रसिद्धमिति भावः । (V.T.)

[II-3-12] Expl. (1) Here the importance of right teacher is stressed. A teacher who firmly believes is God as the Supreme Being is the right teacher. It is only through such a teacher that God could be understood. He cannot be understood through a teacher who himself has no such faith. He cannot also be understood by speech etc. Guruprasāda is very important for obtaining the knowledge of God.

(2) (i) अस्ति–अपराधीनतया सर्वोत्तमत्वेन अस्ति इति ब्रुवतः उपदिशतः गुरोः अन्यत्र तथोपदेष्टृगुरुं विना इति यावत् । (R.K.)

(ii) भगवानस्ति सर्वोऽधिकत्वादस्ति नामकः इति ब्रुवतः गुरोः, अन्यत्र–अन्येषां भगवदनाधिक्यं जानतां सकाशात् कथं तद् ब्रह्मोपलभ्यते । (V.T.)

[II-3-13] Expl. (1) One has to realise that not only God exists but exists as the Supreme Being. It is he who causes the reality of both Prakṛti and Puruṣas. One can get this knowledge only with

the grace of God. He bestows his full grace on those who realise the fact of his being a Supreme Being.

(2) उभयोः–प्रकृतिपुरुषयोः, तत्वं–प्रामाणिकत्वं प्रकृतिपुरुषभावं वा भावयति सम्पादयतीति तत्वभावः भगवान् तेन तत्प्रसादेनेति यावत् । (R.K.)

'Ubhayoh tatvabhāva' means he who gives reality to both Prakṛti and Puruṣas. Therefore, Tatvabhāva means God in this context. All owe their existence and reality to God as is stated in द्रव्यं कर्म च कालश्च, etc.

(3) सर्वाधिकतया अस्तित्वादस्ति नामा भगवान् । (R.K.)

God is designated as अस्ति because he is the Supreme Being.

(4) अधिकः सतोऽयं भगवान् सर्वस्मादपि केशवः ।
अस्तीति नामकस्तस्मात् ज्ञातव्यः स तथैव च ॥
प्रकृतेः पुरुषाणां च तत्वं भावयति स्फुटम् ।
तत्वभावस्ततो विष्णुः तत्प्रसादात्तु तस्य हि ॥
आधिक्यं ज्ञायते सत्तः प्रसादश्च तथाविधः ।

[II-3-14] Expl. हृदि स्थिताः कामाः–अन्तः करणमाश्रिताः कामाः, ब्रह्म समश्नुते–ब्रह्मविषयदर्शनादिभोगान् करोति । (V.T.)

[II-3-15] Expl. (1) हृदयस्य ग्रन्थयः–अविद्याहंकारकर्माणि, इह–मानुषे देहे । (R.K.)

(2) एतावदनुशासनम्–एतदर्थमेव सर्ववेदानुशासनं प्रवृत्तम् । (V.T.)

[II-3-16] Expl. शतोत्तरया सुषुम्नाख्यया, विष्वगुत्क्रमणे–लोकान्तरगमनार्थम् । (R.K.)

[II-3-17] Expl. (1) At the close of this Upaniṣad, the Upaniṣad once again stresses the importance of the knowledge of distinction between God and Jīva. God is present at the heart of all at all times. He is not only present at the heart of the body but he is also present in Jīvasvarūpa heart. One should realise the

distinction between himself and the God who is present as inner controller. The word śarīra here refers to Jīva. Jīva is śarīra of God in the sense that he is always under the control of God. The word śarīra is used here to convey jīva to bring out this special relation. The Jīva who is the body of God in this sense should be distinguished from God. The method of distinguishing is explained with a beautiful simile. Munjā is a kind of grass with which a girdle is prepared at the time of upanayana. Ishikā is another kind of grass which is similar to Munjā grass. While preparing the Munjā girdle, one has to remove the Ishikā grass mixed with it. Similarly, God who is present as inner controller has to be distinguished from Jīva who is his body. It is the knowledge of this distinction that is very essential for liberation. This distinction is clearly brought out by pointing out that two distinguishing characteristics of God viz., Śukra flawless and Amrita immortal.

(2) (i) सर्वथा जीवेश्वरभेदज्ञानमेव मोक्षसाधनमिति भावेनाह अङ्गुष्ठमात्र इति । अङ्गुष्ठमात्रः–जीवाङ्गुष्ठमितः देहाङ्गुष्ठमितो वा, जनानां हृदये–जीवस्वरूपहृदये बाह्यहृदये वा ।

(ii) स्वात्–स्वाख्यात् शरीरात् भगवद्वशत्वादिना शरीररूपात् जीवात् ।

(iii) कुतोऽयं जीवाद् भेदेन ज्ञेय इत्यतो विरुद्धधर्माधिकरणत्वादिति भावेनोपसंहरति । तं विद्यात् शुक्रमिति । (V.T.)

(3) (i) शरीरभूतो विष्णोस्तु जीवस्तद्वशगो यतः ।
अधिष्ठितश्च तेनैव विजानीयात् पृथक् ततः ॥
स्वाख्यात् शरीरात् जीवात्तु प्रवहेद् विष्णुमव्ययम् ॥

(ii) देहाङ्गुष्ठमितो देहे जीवाङ्गुष्ठमितो हृदि ।
जीवस्य स तु विज्ञेयो जीवाद् भेदेन मुक्तये ॥ (M.B.)

(5) This verse does not mention the distinction between body and soul. After so much of discussion about the distinction

between body and soul. This distinction is not denied by any philosopher excepting the materialist. Therefore, there is no special need to mention it at the conclusion. Therefore, it is the distinction between the God and Jīvas that is mentioned here. The distinction between Jīva's body and God is also not mentioned here. No philosopher has ever envisaged the identity between Jīva's body and God. Therefore, denying such identity and mentioning the distinction between Jīva's body and God will be irrelevant here.

Further, Jīva is not angusthamātra. This epithet is always given to God in Upaniṣads. Therefore, one who is to be distinguished here is not the soul from the body but the God from the soul.

संसारिशरीरिणा अभेदो वादिना केनापि नाङ्गीकृतः । न लोकसिद्धः । न जीवोऽङ्गुष्ठामात्रः । अतो विष्णोर्जीवाद् भेदः उक्तः । (M.B.)

(6) Sri Sankara, however, interprets this verse as mentioning the distinction between Antarātman (God or Brahman) and Jīva's body.

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां सम्बन्धिनि हृदये सन्निविष्टः, तं स्वादात्मीयात् शरीरात् प्रवहेत् उद्यच्छेत् निष्कर्षेत् पृथक् कुर्यात् । (S.B.)

As already pointed out above, the question of identity between the God the inner controller (antarātma) and Jīva's body (Sva Śarīra) is never posed and there is no need to solve it by pointing out the distinction between God and Jīva's body. Therefore, this interpretation does not suit the context. It is also pointed out above that the distinction between soul (Jīva) and body is also not intended here as is clear from the next line तं विद्यात् शुक्रममृतम्. It is only God who can be described as शुक्र and अमृत. Moreover, Jīva is neither अंगुष्ठमात्र, nor अन्तरात्मा. Therefore, it is the distinction between God (अन्तरात्मा पुरुष) and Jīva

(designated here as शरीर in the sense that he is controlled by God) that is mentioned here. Jīva is designated as शरीर in Upaniṣads such as 'यस्यात्मा शरीरम्.' This epithet is particularly used to indicate Jīva's dependence on God, even after liberation which is the theme of this Upaniṣad.

[II-3-18] Expl. (1) The Upaniṣad concludes with the phalaśruti that Nachiketa achieved the objective of his third boon.

(2) योगविधिं–प्रत्याहारादिभगवज्ज्ञानविधिम् ॥

इति काठकोपनिषदि द्वितीयाध्यायस्य तृतीयावल्ली समाप्ता

इति श्री पाण्डुरङ्गि तमणाचार्यसूनु कृष्णाचार्य विरचिता
काठकोपनिषदः आङ्ग्लभाषा टिप्पणी समाप्ता

|| श्रीः ||

षट्प्रश्नोपनिषत्

This Upaniṣad belongs to Pippalādaśākhā of Atharva Veda. God Vāsudeva is the chief deity for this Upaniṣad. Prāṇa etc., are subordinate deities. Pippalāda and Kātyāyana etc., Six others are the sages. The Metres employed in different sections have to be ascertained separately.

Kātyāyana etc., Six sages put six questions to the sage Pippalāda in this Upaniṣad. Therefore, it is designated as Ṣatpraśnopaniṣad. These questions relate to the process of creation, importance of Mukhyaprāṇa, Omkāra and Ṣodaśakala Puruṣa.

प्रथम प्रश्नः

SIX SAGES APPROACH PIPPALĀDA

सुकेशा च भारद्वाजः शैब्यश्च सत्यकामः सौर्यायणी च गार्ग्यः कौसल्यश्चाश्वलायनो भार्गवो वैदर्भिः कबन्धी कात्यायनः ते हैते ब्रह्मपराः ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणाः एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः ॥ १ ॥

Sukeśa, son of Bhāradvāja; Satyakāma, son of Śibi; Gārgya, grandson of Sūrya; Kausalya Āsvalāyana, son of Aśvala; Bhārgava, son of Bhrigu, born in Vidarbha country; Kabandhi, son of Kātya–these Six sages who had studied the Vedas deeply, who followed the Vedas devotedly, and who were desirous of knowing the highest Brahman approached sage Pippalāda carrying the Samit sticks in their hands, with the hope that he would certainly explain the Brahman fully.

THE SIX SAGES ARE ASKED TO OBSERVE PENANCE FOR ONE YEAR

तान् ह स ऋषिरुवाच । भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ । यथाकामं प्रश्नान् पृच्छत । यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति ॥ २ ॥

Sage Pippalāda told them : You reside here for one year performing again penance and celibacy, having faith. Then you ask the questions you like. If I know I shall tell all that I know.

KĀBANDHI KĀTYĀYANA PUTS THE FIRST QUESTION :

From whom are these created beings born ?

अथ कबन्धी कात्यायन उपेत्य पप्रच्छ ।
भगवन् कुतो हवा इमाः प्रजाः प्रजायन्त इति ।
तस्मै सहोवाच । प्रजाकामो ह वै प्रजापतिः स तपोऽतप्यत ॥ ३ ॥

Then, Kābandhi son of Kātyāyana approached Pippalāda and asked : O Revered sage! from whom are these created beings born ? Pippalāda told him– Prajāpati desirous of creating beings, meditated for it.

FIRST COUPLE IS CREATED

स मिथुनमुत्पादयते । रयिं च प्राणं चेति, एतौ मे बहुधा प्रजाः करिष्यत इति । आदित्यो ह वै प्राणो रयिरेव चन्द्रमाः ॥ ४ ॥

He created a couple–male and female–viz., Rayi and Prāṇa (Bhārati and Mukhyaprāṇa). He thought that these two would assist him to create many beings. Prāṇa entered Āditya and assumed the name Āditya. Rayi entered Chandramas and assumed the name Chandramas.

CREATION OF MATTER AND OTHER DEITIES

रयिर्वा एतत्सर्वं यन्मूर्तं चामूर्तं च तस्मान्मूर्तिरेव रयिः । अथ आदित्य उदयन् यत् प्राचीं दिशं प्रविशति तेन प्राच्यान् प्राणान् रश्मिषु सन्निधत्ते ।

यद्दक्षिणां यत्प्रतीचीं यदुदीचीं यदधो यदूर्ध्वं यदन्तरा दिशो यत्सर्वं प्रकाशयति तेन सर्वान् प्राणान् रश्मिषु सन्निधत्ते ॥ ५ ॥

Rayi is all this that is Mūrta. Amūrta is Prāṇa. Out of the two Mūrta and Amūrta, Murti is Rayi.

Now, when the Prāṇa present in the sun rises and enters into the east, then, he places the eastern deities into the rays. When he illumines the southern, the western, the northern, the above, the below, the central and all, then, he places all deities of the respective directions into the rays.

GLORY OF PRĀṆA

स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते ।

तदेतदृचाभ्युक्तम्–

विश्वरूपं करिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम् ।

सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ॥ ६ ॥

This Prāṇa present in Āditya is Viśvarūpa–of full form, he is Agñi as he takes all in, he is Vaisvānara as he relates to all men. He arises to assist the creation of all.

This is clearly stated in the hymn Viśvarūpam etc. He is Viśvarūpa–of full form, he is full of rays, he knows all that is created, he is the abode of created beings, he is the chief illuminator and the cause of heat.

He has a thousand rays, he is in hundreds of forms. This Prāṇa being present in the Sun, arises to assist the creation.

PRAJĀPATI IS THE YEAR, RAYI AND PRĀṆA ARE TWO AYANAS

संवत्सरो वै प्रजापतिः । तस्यायने दक्षिणं चोत्तरञ्च । तद्ये ह वै तदिष्टापूर्ते कृतमित्युपासते । ते चान्द्रमसमेव लोकभिजयन्ते । त एव पुनरावर्तन्ते तस्मादेते ऋषयः प्रजाकामाः दक्षिणं प्रतिपद्यन्ते । एष वै रयिर्यः पितृयाणः ॥ ७ ॥

Prajāpati presides over the year. There are two halves of the year viz., Dakṣiṇa and Uttara–earlier and the later. Those who perform sacrifices, gifts of food etc. and other activities with a desire to obtain routine results such as progeny, they get the Dakṣiṇa path only and go to Chandramas world only. They return to this world again. Rayi presides over this Pitriyāna the Dakṣiṇa path.

KNOWLEDGE AND FAITH LEAD TO UTTARAPATHA

अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्यादित्य-मभिजयन्ते ।

एतद्वै प्राणानामायतनमेतदमृतभयमेतत्परायणमेतस्मान्नपुनरावर्तन्त इत्येष निरोधः । तदेष श्लोकः–

पञ्चपादं पितरं द्वादशाकृतिं
दिव आहुः परे अर्धे पुरीषिणम् ।
अथेमे अन्य उपरे विचक्षणं
सप्तचक्रे षळर आहुरर्पितमिति ॥ ८ ॥

Those who by penance, celibacy, faith and knowledge enquire about Ātman go by the Uttarapatha and obtain Āditya world. Then, they obtain Brahman.

The Brahman is the abode of deities, immortal, fearless, and the abode of liberated. Those who go to him shall not return. Since Āditya prevents their return he is called Nirodha.

It has five feet (five seasons), it is protector, it has twelve forms (Twelve months), it is skilful, it is placed on seven horses and six spokes. Some say that the Southern half of its rainy heavenly path is their goal while the others say that the Northern path is their goal.

PRAJĀPATI PRESIDES OVER THE MONTH, RAYI AND PRĀṆA ON THE TWO HALVES OF THE MONTH

मासो वै प्रजापतिः । तस्य कृष्णपक्ष एव रयिः ।
शुक्लः प्राणः । तस्मादेते ऋषयः शुक्ल इष्टिं कुर्वन्ति ।
इतर इतरस्मिन् ।
अहोरात्रे वै प्रजापतिः तस्याहरेव प्राणो रात्रिरेव रयिः ।
प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते ॥ ९ ॥

Prajāpati presides over the month. The black half of the month is Rayi, bright half of the month is Prāṇa. Therefore, those sages who desire to go by Uttarāyaṇapatha perform the sacrifices in the bright half. Others in the other half.

Prajāpati presides over the day and night. The day is Prāna. The night is Rayi. Prajāpati presides over the couple. Prāṇa is husband and Rayi is wife. Those who enjoy their wife during the day throw their vitality wastefully. Those who enjoy during the night maintain their celibacy.

PRAJĀPATI CREATES THROUGH FOOD ETC.

अन्नं ह वै प्रजापतिः ततो ह वै तद्रेतः । तस्मादिमाः प्रजाः प्रजायन्त इति । तद् ये ह वै तत्प्रजापतिव्रतं चरन्ति ते मिथुनमुत्पादयन्ते । तेषामेवैष

ब्रह्मलोको येषां तपो ब्रह्मचर्यं येषु सत्यं प्रतिष्ठितम् । तेषामसौ विरजो ब्रह्मलोको न येषु जिह्ममनृतं मायाचेति ॥ १० ॥

Prajāpati is food. Vitality is produced from food. All created beings are produced from vitality. Those who know this act of Prajāpati get good progeny. They attain Satyaloka. They perform penance and observe celibacy. They are truthful. They attain Vaikuntha which is aprākrita. They have no crookedness, falsehood or deceit.

इति प्रथम प्रश्नः

द्वितीयः प्रश्नः

BHĀRGAVA ASKS THE SECOND QUESTION

अथ हैनं भार्गवो वैदर्भिः पप्रच्छ ।
भगवन् कत्येव देवाः प्रजा विधारयन्ते । कतर एतत् प्रकाशयन्ते ।
कः पुनरेषां वरिष्ठ इति ॥ १ ॥

Then, Bhārgava of Vidarbha country asked Pippalāda : Revered sage! How many deities assist the sustenance of created beings ? Who, among the deities assist revelation of objects? Who, among these deities, is superior ?

THE DEITIES THAT ASSIST SUSTENANCE AND ILLUMINATION

तस्मै स होवाच । आकाशो ह वा एष देवो वायुरग्निरापः पृथिवी वाङ्मनः चक्षुः श्रोत्रञ्च ते प्राकाश्या अभिवदन्ति । वयमेतद् बाणमवष्टभ्य विधारयाम इति ॥ २ ॥

Pippalāda told Bhārgava : The presiding deity of Ākāśa is the sustainer. The presiding deities of air, fire, water etc. are also

sustainers. The presiding deities of the eye, ear, etc. reveal the objects. (These sustain and reveal only with the support of Mukhyaprāṇa).

Once these presiding deities thought they would sustain the body, entering into it independently. (Without the support of Mukhyaprāṇa).

MUKHYAPRĀṆA IS SUPERIOR AMONG THE DEITIES

तान् वरिष्ठः प्राण उवाच । मा मोहमापद्यथाः अहमेवैतत् पञ्चधाऽऽत्मानं विभज्य एतद्बाणमवष्टभ्य विधारयामीति । ते अश्रद्धधाना बभूवुः । सोऽभिमानादूर्ध्वमुत्क्रमत इव तस्मिन्नुत्क्रामति अथेतरे सर्व एवोत्क्रमन्ते । तस्मिंश्च प्रतिष्ठमाने सर्व एव प्रतिष्ठन्ते ॥ ३ ॥

Mukhyaprāṇa the superior among deities, told them : Do not be under the delusion (that you are independently sustaining and illuminating). I, having arranged myself into five aspects (prāna, apāna etc.) enter into the body and sustain it. The deities did not believe him. Then, when he moved out of body, as it were, all other deities moved out. When he returned all others returned.

THE OTHER DEITIES PRAISE MUKHYAPRĀṆA

तद्यथा मधुमक्षिका मधुकरराजानमुत्क्रामन्तं सर्वा एवोत्क्रामन्ते । तस्मिंश्च प्रतिष्ठमाने सर्वा एव प्रतिष्ठन्ते । एवं वाङ्मनश्चक्षुः श्रोत्रं चेति ते प्रीताः प्राणं स्तुन्वन्ति । एषोऽग्निस्तपति एष सूर्य एष पर्जन्यो मघवानेष वायुरेषा पृथिवी रयिर्देवः सदसच्चामृतं यत् ॥ ४ ॥

Just as when the queen bee moves out all other bees move out, and when she settles down all others settle down, similarly the presiding deities of speech, mind, eye, ear, etc. moved out, and settled down. They were delighted (by realising the superiority of Mukhyaprāṇa) and praised Mukhyaprāṇa that he is

Agñi, he is Sūrya, he is rain-god, he is Indra, he is Vāyu, he is Prithivi, he is Rayi, he is Mūrta and Amūrta, he is immortal.

अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम् । ऋचो यजूंषि सामानि यज्ञः क्षत्रं च ब्रह्म च ।

प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायसे
तुभ्यं प्राण प्रजास्त्विमा यत्प्राणैः प्रतितिष्ठसि ।
देवानामसि वह्नितमः पितॄणां प्रथमः स्वधा
ऋषीणां चरितं सत्यमथर्वाङ्गिरसामपि ॥ ५ ॥

Just as spokes are fixed in the nave of the chariot, all other deities find their support in Mukhyaprāṇa. The Ṛgveda, Yajurveda, Sāmaveda, sacrifice, kshatriyas, brahmanas all find their support in Mukhyaprāṇa.

You are Daksha etc. Prajāpati, you move in the womb, you get it born. O Mukhyaprāṇa! these created beings are yours. You reside in them with the presiding deities of eye etc and support them.

You carry the sacrificial offerings to God. You carry the oblations to manes. You are the support for the conduct and truthfulness of sages Atharvāngiras.

इन्द्रस्त्वं प्राण तेजसा रुद्रोऽसि परिरक्षिता ।
त्वमन्तरिक्षे चरसि त्वं ज्योतिषां पतिः ।
यदा त्वमभिवर्षस्यथेमाः प्राण ते प्रजाः ।
आनन्दरूपास्तिष्ठन्ति कामायान्नं भविष्यतीति ।
व्रात्यस्त्वं प्राणैकऋषिरत्ता विश्वस्य सत्पतिः ।
वयमद्यस्य दातारः पिता त्वं मातरिश्व नः ॥ ६ ॥

O Mukhyaprāṇa! you are Indra, you shine with brilliance, you are Rudra, you are protector, you move over the heaven, you are

the sun, you are the lord of planets. When you rain, then, these created beings are delighted with the thought that they get plenty of food. O Prāṇa! you are Ekarshi the seer of Atharvaveda devoted to his vows. You are the destroyer of all, you are the Lord of all pious people. We offer you food, O Mātarisvan! You are our father.

या ते तनूर्वाचि प्रतिष्ठिता या श्रोत्रे या चक्षुषि ।
या मनसि संतता शिवां तां कुरु मोत्क्रमीः ।
प्राणस्यैतद्वशे सर्वं त्रिदिवे यत् प्रतिष्ठितम् ।
मातेव पुत्रान् रक्षस्व श्रीश्च प्रज्ञां च विधेहि नः ॥ ७ ॥

O Mukhyaprāṇa! your person that is present in speech, ear, and eye, and that is extended in our mind, make that auspicious to us. Do not move out of us. Whatever is in the heaven, that is, under the control of Mukhyaprāṇa. Protect us like mother protecting her children. Bestow on us wealth and wisdom.

इति द्वितीय प्रश्नः

तृतीयः प्रश्नः

AŚVALĀYANA ASKS THE THIRD QUESTION :

From whom Prana is born ?

अथ हैनं कौसल्यश्चाश्वलायनः पप्रच्छ ।

भगवन् कुत एष प्राणो जायते । कथमायात्यस्मिन् शरीरे । आत्मानं वा प्रविभज्य कथं प्रतिष्ठते । केनोत्क्रमते । कथं बाह्यमभिधत्ते कथमध्यात्ममिति ॥ १ ॥

Then, Asvalāyana of Kosala country asked Pippalāda : Revered Sir, from whom is the Mukhyaprāṇa born ? How he gets into this body ? How he distributes himself and settles in it ? By what

means he moves out of it ? How he holds the external objects and how he holds the things in the body.

PRĀṆA IS BORN FROM GOD

तस्मै सहोवाच अतिप्रश्नान् पृच्छसि ब्रह्मिष्ठोऽसीति ।
तस्मात्तेऽहं ब्रवीमि ।
आत्मन एष प्राणो जायते । यथैषा पुरुषेच्छाया एतस्मिन्नेतदाततम्
॥ २ ॥

Pippalāda told him : You are asking extraordinary questions. You have studied the Vedas deeply. Therefore I will tell you.

This Mukhyaprāṇa is born from Paramātma. Just as the shadow of a person is entirely dependent upon him all beings are entirely dependent upon Paramātma.

MUKHYAPRĀṆA ENTERS INTO THE BODY BY THE WILL OF GOD

मनोकृतेनायात्यस्मिन् शरीरे ।
यथा सम्राडेवाधिकृतान् विनियुङ्क्ते एतान् ग्रामानधितिष्ठस्वैतान् ग्रामानधितिष्ठस्वेति एवमेवैष प्राण इतरान् प्राणान् पृथक् पृथगेव सन्निधत्ते
॥ ३ ॥

The Mukhyaprāṇa enters (into the body) by the will of Paramātmā.

Just as a monarch employs the officers saying that you supervise these villages and you supervise these villages, similarly Mukhyaprāṇa places other prāṇas separately (in the body).

पायूपस्थेऽपानं चक्षुःश्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रतिष्ठते । मध्ये तु समानः । एष हि एतद्धुतमन्नं समं नयति तस्मादेताः सप्तर्चिषो भवन्ति । हृदि हि एष आत्मा ॥ ४ ॥

In his apāna form he remains in anus and the organ of generation, as prāṇa himself he remains in eye, ear, tongue and nose. In the middle he remains in his samāna form. This samāna assimilates the food eaten. Because of this assimilation of food, the seven jñānendriyas function. The self is at the heart.

PRĀṆA MOVES THROUGH SEVENTY-TWO THOUSAND ARTERIES

अत्रैतदेकशतं नाडीनाम् । तासां शतं शतमेकैकस्यां द्वासप्ततिं प्रतिशाखानाडीसहस्राणि । आसु व्यानश्चरति । अथैकयोर्ध्वमुदानः पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलोकम् ॥ ५ ॥

There are one hundred and one arteries in the body. Each of these have hundred branches. Each branch has again hundred branches. Thus, there are seventy-two thousand arteries in the body. Prāṇa moves in these through his vyāna form. Through one of these arteries viz. Suṣumnā, Prāṇa moves above through his Udāna form. Through this, he leads Jīva to Svargaloka by his puṇya, and Narakaloka by his sin. By the two viz. puṇya and pāpa, he leads him to the world of men.

MUKHYAPRĀṆA IS PRESENT IN ĀDITYA etc. ALSO

आदित्यो ह वै बाह्यः प्राणः उदयत्येष हि एनं चाक्षुषं प्राणमनुगृह्णानः पृथिव्यां या देवता सैषा पुरुषस्यापानमवष्टभ्यान्तरा यदाकाशः स समानो वायुर्व्यानः तेजो ह्वा उदानः । तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैः ॥ ६ ॥

Mukhyaprāṇa being present in the sun outside, assuming the name āditya, arises. He favourably responds to the prāṇa present in the eye. The apāna present in the prithvi sustains the apāna present in the man. That which sustains ākāsa is samāna. (This sustains the samāna in the body). The vyāna sustains the air

outside. (This sustains the vyāna in the body). Udāna sustains the tejas outside (this sustains the udāna in the body).

Therefore, when tejas is extinct (in the body) one is dead with his senses getting merged in manas.

MUKHYAPRĀṆA LEADS JĪVA TO THE RESPECTIVE WORLDS AFTER THE DEATH

यच्चित्तस्तेनैष प्राणमायाति । प्राणस्तेजसा युक्तः यथा संकल्पितं लोकं नयति ।

य एवं विद्वान् प्राणं वेद न हास्य प्रजा हीयतेऽमृतो भवति । तदेष श्लोकः ।

उत्पत्तिमायतिं स्थानं विभुत्वं चैव पञ्चधा ।
अध्यात्मं चैव प्राणस्य विज्ञायामृतमश्नुत इति ॥ ७ ॥

The Jīva goes to Prāṇa with the thought with which he dies. Prāṇa in his udāna form, accompanying God, takes jīva to the world as per the last thought of that jīva.

He who knows Prāṇa in this way, shall have unbroken progeny and attain immortality. This is sung in a verse.

He who knows the birth, functions, places, five-fold extension, presence in the body and outside, will attain immortality.

इति तृतीय प्रश्नः

चतुर्थः प्रश्नः

GĀRGYA ASKS THE FOURTH QUESTION

अथ हैनं सौर्यायिणी गार्ग्यः पप्रच्छ । भगवन्नेतस्मिन् पुरुषे कानि स्वपन्ति कान्यस्मिन् जाग्रति । कतर एष देवः स्वप्नान् पश्यति । कस्यै तत्सुखं भवति । कस्मिन् सर्वे सम्प्रतिष्ठिता भवन्तीति ॥ १ ॥

Then Gargya, the grandson of Sūrya, asked Pippalāda : Revered Sir! when the man is asleep which of the deities withdraw their functions and which continue to perform ? Which deity shows the dreams? Who experience the happiness during the deep sleep state ? In whom all find their support ?

DURING DREAM AND DEEP SLEEP THE SENSES AND THEIR PRESIDING DEITIES DO NOT FUNCTION

तस्मै सहोवाच । यथा गार्ग्य मरीचयोऽर्कस्यास्तं गच्छतः सर्वा एतस्मिन् तेजो मण्डल एकीभवन्ति ता पुनरुदयतः प्रचरन्त्येवं ह वै तत्सर्वं परे देवे मनस्येकीभवति ।

तेन तर्हि एष पुरुषो न शृणोति न पश्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नादत्ते नानन्दयते न विसृजते नेयायते स्वपितीत्याचक्षते ॥ २ ॥

Pippalāda told Gargya! O Gargya just as when the sun sets his rays appear like gathered in the orb of Sun, and when he rises, again they appear like spreading, similarly, all deities presiding over Jīva's body and senses gather near the great God present in manas during the dream state and present at the heart during the deep sleep state.

Therefore, Jīva does not hear, does not see, does not smell, does not taste, does not touch, does not speak, does not take, does not enjoy, does not excrete, does not walk. Therefore, they say he is asleep.

DURING THE SLEEP PRĀṆAS DO FUNCTION

प्राणाग्नय एवैतस्मिन् पुरे जाग्रति । गार्हपत्यो ह वा एषोऽपानो व्यानोऽन्वाहार्यपचनो यद्गार्हपत्यात् प्रणीयते । प्रणयनादाहवनीयः प्राणः । यदुच्छ्वासनिश्वासावेतावाहुती समनयन्ति स समानो मनो ह वाव यजमान इष्टं फलमेवोदानः । स एनं यजमानमहरहर्ब्रह्म गमयति ॥ ३ ॥

In this body, during the sleep, prāṇāgnis are awake (function). Apāna is gārhapatyāgni, Vyāna is dakṣiṇāgñi, āhavanīyāgñi is prāṇa. Āhavanīya is made from gārhapatya, therefore, it is prāṇa. Samāna is called samāna because it provides inbreathing and outbreathing the two offerings regularly. Manas or Jīva is Yajamāna. Udāna provides the result of the sacrifice. Udāna takes the Jīva every day during the deep sleep to the Brahman present in suṣumnā nādi.

THE NATURE OF EXPERIENCES DURING THE DREAM

अत्रैष देवः स्वप्ने महिमानमनुभवति । यद्दृष्टं दृष्टमनुपश्यति श्रुतं श्रुतमेवार्थमनुशृणोति देशदिगन्तरैश्च प्रत्यनुभूतं पुनःपुनः प्रत्यनुभवति ।
दृष्टं चादृष्टं च श्रुतं चाश्रुतं चानुभूतं चाननुभूतं च सच्चासच्च सर्वं पश्यति सर्वः पश्यति ।
स यदा तेजसाभिभूतो भवत्यत्रैष देवः स्वाप्नान्न पश्यति । अथ यदैतस्मिन् शरीरे सुखं भवति ॥ ४ ॥

During the dream Jīva experiences happiness and sorrow. He sees whatever he had already seen. He hears whatever he had already heard. He experiences what he had experienced in another place and in another direction.

He sees the seen and not seen (not seen in this birth), hears the heard and not heard, experiences the experienced and not experienced, the present and not present. He sees all assuming all kinds of forms (man, animal etc. forms).

When Jīva is enveloped with the divine lustre, then, being in deep sleep state, does not see the dreams. At that time, Jīva experiences bliss due to his close presence with God.

DURING DEEP SLEEP ALL FIND THEIR SHELTER IN GOD

स यथा सोम्य वयांसि वासो वृक्षं सम्प्रतिष्ठन्ते । एवं ह वै तत्सर्वं परे आत्मनि सम्प्रतिष्ठते । पृथिवी च पृथिवीमात्रा चापश्चापोमात्रा च तेजश्च

तेजोमात्रा च वायुश्च वायुमात्रा चाकाशश्चाकाशमात्रा च चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं च घ्राणं च घ्रातव्यं च रसनं रसयितव्यं च त्वक्च स्पर्शयितव्यं च वाक्च वक्तव्यं च हस्तौ चादातव्यं च पादौ च गन्तव्यं च पायुश्च विसर्जयितव्यं चोपस्थश्चानन्दयितव्यं च मनश्च मन्तव्यं च बुद्धिश्च बोद्धव्यंचाहङ्कर्तव्यं च चित्तं च चेतयितव्यं च तेजश्च विद्योतयितव्यं च प्राणश्च विधारयितव्यं च ॥ ५ ॥

O dear! just as the birds find their shelter in the tree of their residence, all find their shelter in the supreme God.

The gross and subtle earth, the gross and subtle air, the gross and subtle ākāśa, the eye and its objects, the ear and its objects, the nose and its objects, the tongue and its objects, the sense organ of touch and its objects, the speech and its objects, the hands and the objects to be taken, the feet and the destinations to be covered, the anus and excretion, the organ of generation and the joy, manas and the thought, buddhi and the intellect, ahamkāra and the sense of ego, chitta and remembrance, chetana (tejas) and grasping of objects, prāṇa and all that is to be sustained.

GOD HAS BESTOWED THE POWER TO SEE ETC. TO THE SENSES

एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः ।

स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वं भवति ।

तदेष श्लोकः–

विज्ञानात्मा सह देवैश्च सर्वैः
प्राणा भूतानि सम्प्रतिष्ठन्ति यत्र ।

तदेतदक्षरं वेदयते यस्तु
सोम्य स सर्वज्ञः सर्वमेवाविवेशेति ॥ ६ ॥

He gives the power (to the senses and their presiding deities) to see, to touch, to smell, to taste, to think, to know, and to do. He himself sees, touches and so on. He is omniscient and is infinite.

He who knows him as not affected by avidyā, does not possess prākrita body, has no prākrita form but possesses aprākrita and pure form, he is imperishable, and as the cause of all, attains the infinite.

The Jīva the indriyas, and their objects together with their presiding deities find their support in Akṣara the supreme God. He who knows this Akṣara, knows all. He attains the abode of the lord of all.

इति चतुर्थः प्रश्नः

पञ्चमः प्रश्नः

THE SIGNIFICANCE OF 'OM'

अथ हैनं शैब्यः सत्यकामः पप्रच्छ ।

स यो ह वैतद् भगवन् मनुष्येषु प्रायणान्तमोंकारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति ।

तस्मै स होवाच । एतद्वै सत्यकाम परं चापरं च यदोङ्कारः तस्माद् विद्वानेतेनैवायनेन एकतरमन्वेति ॥ १ ॥

Then Satyakāma, son of Sibi asked Pippalāda – 'Revered Sir, among men, which world one attains, who meditates upon God designated as 'Om' with the hymn 'Om' till the end of his life'? Pippalāda told him–O Satyakāma; both Parabrahman and Apara

brahman (Lord Viṣṇu and Chaturmukha Brahmā) are designated as 'Om'. Therefore, one who meditates with the hymn 'Om', through the path of this meditation, attains them.

स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितः तूर्णमेव जगत्यामभिसम्पद्यते। तमृचो मनुष्यलोकमुपनयन्ते। स तत्र तपसा ब्रह्मचर्येण श्रद्धया सम्पन्नो महिमानमनुभवति।

अथ यदि द्विमात्रेण मनसि सम्पद्यते। सोन्तरिक्षं यजुर्भिरुन्नीयते सोमलोकम्। स सोमलोके विभूतिमनुभूय पुनरावर्तते।

यः पुनरेतं त्रिमात्रेण ओमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये सम्पन्नो यथा पादोदरः त्वचा विमुच्यते एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकम्।

स एतस्माज्जीवघनात् परात् परं पुरिशयं पुरुषमीक्षते ॥ २ ॥

He who meditates upon God as conveyed by one syllable of 'Om' will soon be born again on the earth, called as it were, by God. He is carried to human body by the presiding deities of Ṛgveda. In that human birth he will practise austerity, celibacy, and faith, and enjoy glory of the same.

He who meditates upon God as conveyed by three syllables of 'Om', with the hymn 'Om', will reach the sun. He will be free from his Prārabdhakarma like a snake being freed from its old skin. He will be carried to Satyaloka by the presiding deities of Sāmaveda. Then, receiving instructions from Chaturmukha Brahmā, the highest among souls, he will see the highest person, i.e., Lord Vāsudeva present in the bodies of all souls.

तदेतौ श्लोकौ भवतः।

तिस्रो मात्रा मृत्युमयः प्रयुक्ता अन्योन्यसक्ता अनविप्रयुक्ताः।
क्रियासु बाह्याभ्यन्तरमध्यमासु सम्यक् प्रयुक्तासु न कम्पते ज्ञः।
ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत्तत् कवयो वेदयन्ते।

तमोंकारेणैवायतनेनान्वेति विद्वान् तच्छान्तमजरममृतमभयं परात् परंचेति ॥ ३ ॥

There are these two verses :

The three syllables of 'Om' employed separately, or only with two connected, recited in the high, low, and middle pitches will lead to returnable worlds. But if the three together are well employed, the wise meditator will not move away (He will attain non-returnable world).

The meditator (with only one syllable) will be led to the earth by the presiding deities of Ṛgveda, (with two syllables) to the intermediate space by the presiding deities of Yajurveda, and (with three syllables) to the world, which only the wise know, by the presiding deities of Sāmaveda.

He who knows ('Om' with the three syllables) will attain the Supreme God who is tranquil, unaging, immortal and fearless by the knowledge of 'Om' the supporter

इति पञ्चम प्रश्नः.

षष्ठः प्रश्नः

WHO IS ŚODASHAKALĀ PURUṢA ?

अथ हैनं सुकेशा भारद्वाजः पप्रच्छ ।

भगवन् हिरण्यनाभः कौसल्यो राजपुत्रो मामुपेत्य एनं प्रश्नमपृच्छत् ।

षोडशकलं भारद्वाज पुरुषं वेत्थ । तं मह्यं ब्रवीहीति । तमहं कुमारमब्रुवम् नाहमिमं वेद् । यद्यवेदिष्यं कथं ते नावक्ष्यमिति ।

स मूलो वा एष परिशुष्यति योऽनृतमभिवदति तस्मान्नार्हाम्यनृतं वक्तुम् । स तूष्णीं रथमारुह्य प्रवव्राज ।

तं त्वा पृच्छामि क्वासौ पुरुष इति ॥ १ ॥

Then, Sukeśa son of Bhāradvāja asked him : Revered Sir! Hiraṇyanābha a prince of Kosala country approached me and asked this question– Bhāradvāja you know Ṣoḍaśakalā Puruṣa, teach him to me.

I told that prince, I do not know Ṣoḍaśakalā Puruṣa. If I knew, why should I not tell you. He who speaks untruth will perish completely. Therefore, I cannot speak untruth. On this reply, the prince silently mounted his chariot and left.

I ask you now, where is that Ṣoḍaśakalā Puruṣa?

तस्मै स होवाच । इहैवान्तःशरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडशकलाः प्रभवन्तीति ।

स ईक्षांचक्रे कस्मिन्नहमुत्क्रान्ते उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति ।

स प्राणमसृजत प्राणान् श्रद्धां खं वायुः ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद् वीर्यं तपो मन्त्राः कर्म लोकालोकेषु नाम च ॥ २ ॥

Pippalāda told Bhāradvāja : Here, within this body that Puruṣa is present from whom these sixteen kalās arise. (At the commencement of creation), the Puruṣa pondered as to, at whose departure shall I depart, and at whose settling in shall I settle in ? (who has adequate devotion and knowledge of me so that he can be my instrument). Then, he created prāṇa. From prāṇa he created faith, ether, air, light, water, earth, senses, mind, food, vitality, austerity, hymns, deeds the places for the senses, and names.

यथेमाः नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते तासां नामरूपे समुद्र इत्येवं प्रोच्यते । एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति भिद्येते चासां नामरूपे पुरुष इत्येवं प्रोच्यते । स एषोऽकलोऽमृतो भवति ॥ ३ ॥

Just as these rivers flowing towards the ocean, on reaching the ocean, become unobservable but still their names and entityship are declared as distinctly present in the ocean by the wise, so also, these sixteen kalās of Jīva (being liberated at the time of the liberation of Jīva) moving towards the supreme Puruṣa and reaching him, become unobservable (for ignorant). But still their names and entityship are declared to be distinct by the wise, and they remain in supreme Puruṣa (entirely dependent upon him).

CONCLUSION OF INSTRUCTION

तदेष श्लोकः ।

अरा इव रथनाभौ कला यस्मिन् प्रतिष्ठिताः ।
तं वेद्यं पुरुषं वेद यथा मा वो मृत्युः परिव्यथाः इति ॥

तान् होवाच एतावदेवाहमेतत् परमं ब्रह्म वेद नातः परमस्तीति ।

ते तमर्चयन्तः त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति ।

नमः परमऋषिभ्यः नमः परमऋषिभ्यः ।

Know that Supreme Puruṣa in whom the presiding deities of Kalā find their support, like the spokes in the navel of a chariot wheel, so that the transmigration may not afflict you.

Pippalāda told the six sages 'I know only this much, beyond this I do not know.'

The six sages honoured him (with prostration etc.) and said you are our father, you enabled us to overcome the ignorance.

Salutations to the great seers; salutations to the great seers.

इति श्रीषट्प्रश्नोपनिषदः आङ्लभाषानुवादः पाण्डुरङ्गी तमण्णाचार्यसुनु कृष्णाचार्यविरचितः समाप्तः ॥

NOTES AND EXPLANATION

प्रथम प्रश्नः

[I-1] Expl. (1) ब्रह्मपराः–वेदाभ्यासे तात्पर्यवन्तः, ब्रह्मनिष्ठाः–तदुक्तानुष्ठान-शीलाः, परं ब्रह्म–वासुदेवम् । (J.T.)

(2) वै शब्दः पिप्पलादस्य प्रश्नप्रतिवचनसामर्थ्यद्योतकः । (J.T.)

(3) Carrying Samit sticks in hand while approaching the preceptor is a religious practice.

[I-3] Expl. (1) Though Kabandhi Kātyāyana was the last among the six sages listed, his question is considered first, because, it is the basis of all other questions.

(2) The cause asked here is the efficient cause or the agent. कुतो निमित्तकारणात् पुरुषात् । (J.T.)

(3) प्रजाः–देवाद्याः सर्वाः प्रजाः । (J.T.)

(4) In this context some अचेतन, जीव, or ईश्वर are possible alternatives. Among these अचेतन cannot be the creator, because, it cannot act without the support of a चेतन. जीव also cannot be the creator as he is परतन्त्र. Therefore, ईश्वर is the only feasible alternative. The questioner has these points in mind.

सुप्रसिद्धं तावत् प्रजानां प्रजननम् । न च एतत् अन्तरेण कारणमुपपन्नम् । न च अचेतनैरेव कारणैः । चेतनानधिष्ठितानां तेषां कार्यकर्तृत्वादर्शनात् । न च जीवः अधिष्ठाता अस्वतन्त्रत्वात् । नापीश्वरः तदनुपालम्भात् इति प्रश्नाशयः । (J.T.)

(5) Here प्रजापति stands for परमेश्वर, प्रजानां ब्रह्मादीनां पतिः पालकः परमेश्वरः । (J.T.)

[I-4] Expl. (1) Mukhyaprāṇa and Bhārati are the first male and female created by God. Rayi refers to Bhārati and Prāṇa refers to Mukhyaprāṇa. रयिम्–वित्ताभिमानिनीं भारतीम्, प्राणम्–मुख्यम् । (J.T.)

(2) These two assist God in creating beings. God will enter these two and create beings. एतौ आविश्य अहं प्रजाः स्रक्ष्यामि । इमौ मे प्रजासर्जने निमित्तीभवतः इति । (J.T.)

(3) Having created these two, Prajāpati creates Āditya, Chandramas etc. Then these two enter them and assume the same name. God enters these two and creates further. प्रजापतिना आदित्यादिषु सृष्टेषु प्राणः आदित्यनामा आदित्यं प्रविष्टो बभूव । रयिरपि चन्द्रमानाम्नी चन्द्रमसि आविष्टा बभूव । (J.T.)

[I-5] Expl. (1) Mūrta here stands for तेजस्, अप् and अन्न. Amūrta stands for Prakṛti. Rayi and Prāṇa being present in these two Mūrta and Amūrta assist Prajāpati for the creation of other created beings.

तेजोबन्नलक्षणमूर्तं अमूर्तं प्रकृत्यादिकमिति यदुपादानकारणराशिद्वयं तस्मात् राशिद्वयात् प्रविभक्ता या मूर्तिः यन्मूर्तं सैव रयिः । अमूर्तं प्राणः इति शेषः । (J.T.)

रयिप्राणौ जगदुपादानभूतेषु पञ्चभूतेषु प्रकृत्यादिषु च स्थित्वा तेषामुपादानशक्तिं प्रेरयन्तौ प्रजापतेः प्रजोत्पत्तौ निमित्तं भवतः इति यावत् । (J.T.)

(2) आदित्यः–आदित्यस्थः प्राणः । (J.T.)

(3) The deities referred to here are :

East–Indra, Agni with their wives
South–Yama, Nirṛti with their wives
West–Varuṇa, Vāyu with their wives
North–Soma, Īśāna with their wives
Above–Garuḍa, Kāma with their wives
Below–Śeṣa, Mitra with their wives

These deities are also called Prāṇa in this verse since these also assist the creation of beings in the respective areas. दिग्गतप्राणिप्रणयनात् प्राणः ।

प्राच्याः प्राणास्तथेन्द्राद्याः दक्षिणाश्च यमादयः
प्रतीच्या वरुणाद्यास्तु सोमाद्याश्चोत्तराः स्मृताः ।
शेषमित्राववाचीनौ वीन्द्रकामावुदक्तनौ ।
सभार्याः कोणपैः सार्धं चत्वारो दिशि दिश्यपि । (M.B.)

(4) यदन्तरा दिशः–दशदिशां मध्यम् । दिङ्मध्यस्था अपि केचित् ज्ञातव्या इति टीकाकृतः । (Kh.)

[I-6] Expl. (1) विश्वरूपः–पूर्णरूपः, आदानादग्निः, वैश्वानरः–विश्वनर-सम्बन्धी तापनपाचनशोषणादिना सर्वप्रजोत्पत्तिहेतुः सन्नुदयते । (J.T.)

(2) करिणम्–कराः रश्मयोऽस्य सन्तीति करी तं करिणम् full of rays (J.T.)

(3) Rayi assisting creation also should be similarly understood. एवं चन्द्रमसि स्थितायाः देव्या अपि ओषधिजननादिद्वारेण प्रजोत्पत्तिनिमित्तत्व-मुपपादनीयम् । (J.T.)

[I-7] Expl. (1) Prajāpati presiding over time creates beings. Rayi and Prāṇa preside over the two halves of time and assist Prajāpati.

सर्वोत्पत्तिनिमित्तकारणं संवत्सरादिलक्षणं कालं तदवान्तरभेदोत्तरायणाद्यधिष्ठातारौ रयिप्राणौ च अधिष्ठाय प्रजापतेः प्रजाकारणत्वमुच्यते । (J.T.)

(2) संवत्सरः–संवत्सरस्थः सन्, प्रजाकामाः–मोक्षेतरफलकामाः, कृतम्–अन्यत् कर्म । (J.T.)

(3) रयिरेव पितृयाणः–पितृयाणाधिष्ठात्री । (J.T.)

[I-8] Expl. (1) प्राणानाम्–इन्द्रादीनाम्, परायणम्–मुक्तानामाश्रयः ।

(2) अपुनरावृत्त्ययोग्यानां मार्गनिरोधकत्वादेव एषः आदित्यः निरोधः विदुषामिति श्रुत्यन्तरे । Āditya is called nirodha because he prevents the return of those who go by Uttarāyana path.

(3) Prāṇa is the presiding deity for Uttarāyaṇa. तस्मात् आदित्याधिष्ठाता प्राण एव उत्तरायणाधिष्ठाता । (J.T.)

(4) पञ्चपादम्–हेमन्तशिशिरैक्येन पञ्च ऋतवः । तदभिमानिनः पादाः अंशाः यस्य तं पञ्चपादम् ।

द्वादशाकृतिम्–द्वादशमासाभिमानिदेवाः आकृतयः रूपाणि यस्य तम् ।

सप्तचक्राणि–चंक्रम्यन्ते रथः एभिः इति चक्राणि अश्वाः पुरीषमुदकमस्यास्तीति पुरीषिणं वर्षणहेतुं तदुपलक्षितकालाभिमानिदेवतामार्गमिति यावत् । केचित् काम्यकर्मिणः, अन्ये ज्ञानिनः । (J.T.)

[I-9] Expl. (1) Prajāpati creates, presiding over the month. Prāṇa and Rayi assist creation during the bright and black halves of the month respectively. Same is the case during a day, consisting of day and night.

प्रजापतिः मासलक्षणकालमधिष्ठाय प्रजाः सृजति । रयिप्राणौ पक्षद्वये स्थित्वा प्रजापतेः प्रजोत्पत्तौ निमित्तीभवतः ।

अहोरात्रे इत्यादिपूर्ववद् व्याख्येयम् । (J.T.)

(2) Before प्राणं वा प्रस्कन्दन्ति etc. the following has to be understood–दम्पती वा प्रजापतिः । पतिरेव प्राणः जायैव रयिरित्यध्याहार्यम् । (Kh.)

(3) रात्र्यधिष्ठात्री रयिः स्त्रियां वर्तते । अहरधिष्ठाता प्राणः पुंसि । (Kh.)

[I-10] Expl. (1) अन्ने स्थितस्य प्रजापतेः प्रजाजनकत्वम् । (J.T.) Prajāpati creates beings through food, being present in the same.

(2) प्रजापतेः व्रतम्–कर्म, चरन्ति–जानन्ति

(3) ब्रह्मलोकः–सत्यलोकः, विरजः–ब्रह्मलोकः अप्राकृतः वैकुण्ठादिः । (J.T.)

द्वितीयः प्रश्नः

[II-1] Expl. (1) The question asked here is, through which deities Prajāpati provides sustenance and illumination of objects to the created beings. कान् निमित्तीकृत्य परमेश्वरः प्रजानां स्थितिं विषयप्रकाशं च करोतीति यावत् । (J.T.)

(2) In the course of the first question creatorship of Prajāpati was asked and explained. In this second question sustenance and illumination are explained. परमेश्वरस्य सकलप्रजाजनकत्वमुक्तम् । स्थितिज्ञानहेतुत्वं वक्तव्यम् । (J.T.)

(3) Superiority of Mukhyaprāna over other deities was explained in the course of the first question. This is further elaborated here. प्राक् प्राणस्य वरिष्ठत्वमभिप्रेतं तच्चोपपादनीयमित्युत्तरो ग्रन्थः । (J.T.)

[II-2] Expl. (1) आकाशाभिमानी देवता धारकः । एवं भूतवायुर्देवतेत्यादि । (Kh) The presiding deity of Ākāśa and the presiding deities of air etc. assist the sustenance.

(2) Here the other presiding deities listed in the passage पृथिवी च पृथिवी मात्रा च etc. are also to be understood. Thus all tatvābhimānidevatas are to be understood. Mukhyaprāṇa heads the list of these deities. अत्र उपलक्षणत्वेन पृथिवी च पृथिवीमात्रेत्यादि वक्ष्यमाणाः सर्वमुख्यप्राणसहिताः तत्त्वदेवाः ग्राह्याः । (Kh)

(3) The presiding deities of eye etc. reveal the objects. The others sustain. तेषु चक्षुरादयः प्रकाशहेतवः अन्ये स्थितिहेतवः इति ज्ञातव्यम् । (J.T.)

(4) In case Mukhyaprāṇa is not understood here, the question–who is superior among these deities–and the answer–Mukhyaprāṇa is superior–will not have a proper reference base.

(5) Vāyu in the passage वायुरग्निरापः etc., is भूतवायु, वायुरग्निरित्यनेन भूतवायुरुच्यते प्राणशब्देन प्रधानवायुः । (M.B.)

(6) बाणम्–शरीरम्, अवष्टभ्य–आश्रित्य । (J.T.)

[II-3] Expl. (1) This story is intended to show that it is Mukhyaprāṇa who chiefly assists Prajāpati for the sustenance of body and the illumination of objects, and other presiding deities assist only with his support. प्राणस्य वरिष्ठत्वावधारणाय आख्यायिका उच्यते ।

[II-4] Expl. (1) Here एषः अग्निः etc., convey that Mukhyaprāṇa resides in Agñi etc., assumes the names Agñi etc. and enables them to function in their respective way. प्रीताः ते देवाः त्वमेव सर्वदेवादिषु स्थित्वा तन्नामा तद्गुणादिप्रवर्तक इति प्राणमस्तुवन् । (J.T.)

[II-5] Expl. (1) Prajāpatis referred to here are Daksha etc., Prajāpatis.

(2) गर्भे चरसि–गर्भस्थ प्रेरकतया चरसि, प्रतिजायसे–जनिक्रियां च त्वमेव करोषि ।

प्राणैः–चक्षुरादिभिः, वह्नितमः–यज्ञभागवाहकतमः

प्रथमास्वधा–मुख्यस्वधावाहकः । (J.T.)

[II-6] Expl. (1) व्रात्यः–व्रतनिष्ठः, एकर्षिः अथर्ववेदद्रष्टा, विश्वस्य अत्ता यमादिश्च । (J.T.)

[II-7] Expl. (1) तनूः–मूर्तिः, सन्तता–सम्यग् व्याप्य वर्तमाना, शिवाम्–शान्ताम् । (J.T.)

तृतीयः प्रश्नः

[III-1] Expl. (1) बाह्यम्–अधिभूतादि

[III-2] Expl. (1) अतिप्रश्नान्–अतिशयितान् प्रष्टव्यार्थान्

ब्रह्मिष्ठः–वेदविचारादिमान् । (J.T.)

(2) आत्मतः–परमात्मतः, शरीरे आतता–शरीराधीना । (Kh)

एतस्मिन्–आत्मनि, सर्वम्–प्राणादिकम् । (Kh)

[III-3] Expl. (1) मनः–परं ब्रह्म 'मनो ब्रह्मेति' श्रुतेः, मननान्मन उद्दिष्ट इति वचनात् । (M.T.) तत्कृतेन तन्निमित्तेन तत्प्रेरणया इति यावत् । (J.T.)

(2) There are two aspects of पञ्चप्राण. One arises from मुख्यप्राण and is different from him. The other is Mukhyaprāṇa himself extending in five ways.

(i) द्विविधं तावत् प्राणादिपञ्चकम् । एकं मुख्यप्राणात् जातं ततोऽतिरिक्तम् । अपरं तदात्मकमिति । (J.T.)

(ii) मुख्यप्राणः आत्मनो भिन्नान् आत्मनो जातत्वादुपचारेणात्मप्रविभागान् वायून् पृथक् पृथक् स्थानेषु सन्निधत्ते । स्वयञ्च तत्तत्क्रियाप्रवर्तकतया तत्र प्राणादिपञ्चरूपेणावतिष्ठत इत्याशयः । (J.T.)

[III-4] Expl. (1) भुक्तमन्नं समं यथाशरीरावयवं नयति तेन समानः । (J.T.)

(2) तस्मादन्नस्य समीकरणाद्धेतोः सप्तज्ञानेन्द्रियवृत्तयो भवन्ति । (J.T.)

(3) एषः आत्मा–जीवः । (J.T.)

[III-5] Expl. (1) एकशतम्–एकोत्तरशतम्, एकैकस्यां नाड्यां शतं शतं प्रतिशाखा नाड्यो भवन्ति । पुनस्तासां प्रतिशाखा नाड्यो भवन्ति । (J.T.)

(2) विविधं नयनात् व्यानः, व्यानवायुमधिष्ठाय चरति । (J.T.)

(3) उदानमधिष्ठाय एकया नाड्या सुषुम्नया ऊर्ध्वगतिश्चरति । (J.T.)

(4) Prāṇa leads Jīva to moksha or liberation also. ज्ञानेन मोक्षमिति च द्रष्टव्यम् । (J.T.)

[III-6] Expl. (1) (i) मुख्यप्राण एव प्राणनामा बाह्यो बहिर्भवः आदित्ये स्थितः तन्नामा उद्यते । एषः आदित्यस्थः प्राणः चाक्षुषं प्राणवायुमनुगृह्णानः वर्तते । (J.T.)

(ii) मुख्यप्राणः प्राणनाम्ना रूपेण बहिरादित्यमभिधत्ते । अध्यात्मं च चक्षुः तदभिमानिनं च प्राणसवायुमभिधत्ते इत्युक्तं भवति । एवमुत्तरत्रापि द्रष्टव्यम् । (J.T.)

(2) पृथिव्यां या देवता अपानाख्या । (J.T.)

(3) पुनर्भवम्–जन्मान्तरम्, मरणमिति यावत् । (J.T.)

[III-7] Expl. (1) यच्चित्तः मरणकाले यद्विषयचित्तः, तेजसा–उदानेन, अनेन उदानरूपेण उत्क्रमणमित्युक्तं भवति । (J.T.)

(2) आयतिम्–परमात्मना प्रवर्तनम्, पञ्चधा विभुत्वम्–विविधभवनम् । (J.T.)

चतुर्थः प्रश्नः

[IV-1] Expl. (1) In the previous sections it was pointed out that Mukhyaprāṇa etc., are entirely dependent upon God. Now it is being explained that not only during the waking states but even during the dream and deep sleep states these are dependent upon God. प्राणादेरखिलस्य भगवदधीनत्वमुक्तम् । न केवलं जाग्रदवस्थायां किं नाम सुषुप्त्योरपीति दर्शयितुमुत्तरो ग्रन्थः । स्वपन्ति–स्वव्यापारादुपरमन्ते, जाग्रति–स्वव्यापारं कुर्वन्ति । (J.T.)

(2) The withdrawal and functioning mentioned here, are those of इन्द्रियाभिमानिदेवताs resulting in the withdrawal and functioning of Indriyas.

(3) स्वापो द्विविधः । स्वप्नसुषुप्तिभेदात् । (J.T.) The word स्वाप refers to both the dream and deep sleep states.

(4) स्वप्नान् पश्यति–दर्शयति । (M.T.)

(5) सर्वेन्द्रियाणामुपरतत्वेन केन इन्द्रियदेवेन जीवः स्वप्नाननुभवतीत्यभिप्रायः । (J.T.) Since all senses are withdrawn when one is asleep, the question is asked through which Indriyābhimānidevatā one sees the dream.

(6) When one is under deep sleep, he has no contact with the external objects. Therefore, the question arises as to who experiences the happiness during the deep sleep state. सुषुप्तौ च

यत्सुखं भवति तत्कस्य । तदा उपरतकरणस्य जीवस्य विषयसंसर्गाद्यभावेन कथं सुखानुभवो घटत इत्याशयः । (J.T.)

[IV-2] Expl. (1) The deities gathering near the highest God in manas and hridaya during the dream and deep sleep implies that they do not perform their respective functions. This results in the respective senses withdrawing from their functions. तत्र एकीभूता इव दृश्यन्ते । प्रकाशादिव्यापारादुपरमन्त इति यावत् । प्रचरन्ति–स्वव्यापारं कुर्वन्ति । (J.T.)

(2) During the dream excepting Manas all other senses withdraw. During deep sleep even Manas withdraws. स्वप्ने मनोव्यतिरिक्तानामेवोपरमः । सुषुप्तौ तु तस्यापि । (J.T.)

(3) During the dream the deities gather near the highest God present in Manas, during the deep sleep present at the heart. स्वप्नावस्थायां मनसि स्थिते सुषुप्तौ हृदयाकाशस्थिते परे विष्णौ एकीभवन्ति । (J.T.)

(3) न शृणोति न पश्यति etc. directly mentioned in this passage are the withdrawals during the dream. During deep sleep न मनुते न बुध्यते नाहंकरोति etc. have to be added. (M.T.)

(5) During deep sleep Jīva goes to the highest God. जीवः स्वापे परं देवं प्राप्नोति । स्वं स्वतन्त्रं देवमप्येतीति कृत्वा । (J.T.)

[IV-3] Expl. (1) Here the question :- Who are awake when one is asleep–is answered. The prāṇas i.e., apāna, vyāna, prāṇa, samāna, udāna are awake, that is to say, these function during sleep. Among these, apāna, vyāna and prāṇa are treated as the three sacrificial fires : gārhapatyāgni, anvāhāryāgni (dakṣināgni) and āhavaniyāgni. Samāna is treated as adhvāryu and udāna as udgāta the two sacrificial priests. Manas or Jīva is Yajamāna.

(2) जाग्रति–शरीरधारणादिस्वव्यापारं कुर्वन्ति । (J.T.)

(3) समानः अध्वर्युः, उदानः उद्गाता । (J.T)

(4) मननान्मनो जीवः यजमानः । (Kh)

[IV-4] Expl. (1) During the dream all other senses are withdrawn. Only manas functions. Therefore, Jīva experiences dreams through manas. मनोव्यतिरिक्तानामेवोपरमः स्वप्ने तस्मात् जीवस्य मनसा स्वप्नदर्शनं युक्तम् । (Kh)

(2) एष देवो मनो नामा तेनानुगृहीतो जीव इति यावत् । (Kh)

(3) अस्मिन् जन्मनि दृष्टं अदृष्टं च जन्मान्तरे दृष्टम् । (Kh)

(4) सच्च तदानीम्, असच्च निवृत्तम् । (Kh)

(5) तेजसो भगवदीयेन (Kh)

(6) यस्मादेवं परमेश्वरतेजसाऽभिभूतो भवति अथ तस्मात् तत्सन्निधानसामर्थ्योद्भूतं यत्सुखं तदेतदस्मिन् शरीरे भगवच्छरीरवत् ज्ञानात्मकत्वेन तत्सादृश्ययुक्ते जीवे भवति । (Kh)

The expression शरीर refers to जीव here. This is because of the similarity between the शरीर of God and Jīva. Both are अप्राकृत. The ordinary sense of शरीर i.e., जीवशरीर cannot be taken here because the jīva that has gone to the God present in suṣumnā during deep sleep state has no gross body, nor jīva experience happiness at that time through the gross body. His senses and manas also do not function at that time. Therefore, शरीरे सुखं भवति means जीवे सुखं भवति in this context. भगवतः शरीरवत् सादृश्ययुक्ते जीवे सुखं भवति । कस्यैतत्सुखं भवतीति पृष्टत्वात् । नहि अचेतनस्य शरीरस्य सुखं भवति । 'यस्यात्मा शरीरमिति च श्रुतिः ।

सादृश्याद्देहवज्जीवो विष्णोस्तस्य सुखं भवेत् ।
सुप्तौ तस्य सुखार्थं हि भगवान् सुप्तिमानयेदिति ॥ (M.B.)

[IV-5] Expl. (1) Here the question : कस्मिन् सर्वे प्रतिष्ठिता is answered. The answer given is, all find their shelter and

sustenance in the highest God Viṣṇu. पृथिव्यादि तत्त्वजातं परे आत्मनि विष्णौ सम्प्रतिष्ठते । (J.T.)

(2) It is shown that Mukhyaprāṇa supports all and he is supported by Viṣṇu.

(3) The exact implications of मनस्, बुद्धि etc. are explained as follows :

तत्र संकल्पविकल्पात्मकं मनः । करोमि न करोमीति संकल्पविकल्पौ । निश्चयात्मिका बुद्धिः । अस्वरूपे स्वरूपत्वबुद्धिरहङ्कारः । स्वातन्त्र्यबुद्धिरिति यावत् । अस्थिरस्मरणं चित्तम् । चित्तस्य विषयेषु व्याप्तिश्चेतना । बहुविषयकत्वमिति यावत् ।

(4) तेजःशब्देन चेतना गृह्यते । (J.T.)

[IV-6] Expl. (1) The expressions द्रष्टा, श्रोता etc. mean दर्शनशक्तिप्रदः, श्रवणशक्तिप्रदः etc. Through these expressions it is conveyed that God gives the sense organs and their presiding deities the power to see, to hear and so on.

As applicable to God these also mean he who sees, hears etc.

(2) विज्ञानात्मा–विज्ञानस्वरूपः, सर्वज्ञः, अच्छायम्–अविद्यारहितम्, अलोहितम्–लौहितत्वादिरूपरहितम्, शुभ्रम्–शुद्धम् । (J.T.)

(3) The expression सर्वज्ञ should not be taken in the literal sense when applied to ज्ञानिन्. It means :

(i) सर्वकारणस्य सर्वप्रधानस्य च परिज्ञानात् सर्वज्ञः इव । (J.T.)

(ii) सर्वस्य तत्सदृशत्वात् (तज्ज्ञानी) सर्वज्ञः । (J.T.)

(4) सर्वं भवति–सर्वं परिपूर्णं ब्रह्म तद्भवति प्रविशतीति यावत् । (J.T.)

(5) विज्ञानात्मा–विज्ञानस्वरूपो जीवः । (J.T.) The expression विज्ञानात्मा occurs twice. In the first occurrence it means विज्ञान-स्वरूपसर्वज्ञ God. In the second occurrence it means विज्ञानस्वरूपो जीवः. The respective meanings are required by the context.

पञ्चमः प्रश्नः

[V-1] Expl. (1) प्रायणान्तम्–Until the departure from the body. प्रयाणान्तम्, यावत् शरीरादुत्क्रमणम् । (J.T.)

(2) ॐकारम्–ओमित्याक्रियमाणम् । (J.T.)

God designated 'Om'

(3) Both parabrahman and aparabrahman, that is to say, both Lord Viṣnu and Chaturmukha Brahmā are designated as 'Om'. Praṇava i.e. 'Om' primarily conveys parabrahman. But it also conveys Chaturmukha Brahmā since he is the pratimā of Lord Viṣnu. प्रणवः मुख्यतः परमात्मप्रतिपादकः । तत्प्रतिमात्वेन अमुख्यतः विरिञ्चप्रतिपादकः । (J.T.)

(4) एतेनैव अयनेन–उपासनाख्येन गमनसाधनेन । (J.T.)

(5) एकतरमन्वेति–अपरं ब्रह्म प्राप्य परमप्यन्वेति । (J.T.)

[V-2] Expl. (1) एकमात्रम्–एका मात्रा वाचिका यस्य तं परमात्मानं प्रणवेन अभिध्यायीत । कामपि एकामेव मात्रां सम्यग् विदित्वा इतरे अविज्ञायेति यावत् । (J.T.)

(2) तेन–परमात्मना, संवेदितः–एहीति सम्बोधित इव । ऋचः–ऋग्वेदाभिमानिदेवताः, मनुष्यलोकम्–मनुष्यशरीरम् । (J.T.)

(3) पादोदरः–सर्पः, पाप्मना–प्रारब्धेन, ब्रह्मलोकम्–सत्याख्यं लोकम् ।

(4) जीवघनात्–सकलजीवोत्तमात्, विरिञ्चात्, तदुपदेशेनेति यावत् । (J.T.)

Jīvaghana means highest soul and refers to Chaturmukha Brahmā. One who meditates upon God with 'Om' knowing the significance of all its syllables will first go to Satyaloka, receive instructions from Chaturmukha Brahma, and then only go to Parabrahman or Lord Vishnu.

प्रणवेन हरिं ध्यायन् ब्रह्मलोकं समेत्य च ।
ज्ञानं चतुर्मुखात् प्राप्य मुच्यते नात्र संशयः ॥ (M.B.)

(5) पुरिशयम्–सकलजीवशरीरेषु शयितम्, पुरुषम्–पूर्णम् । (J.T.)

[V-3] Expl. (1) अनविप्रयुक्ताः–एकैकशो ज्ञाताः, अन्योन्यसक्ताः–परस्परं युग्मतया सम्बद्धाः, बाह्याभ्यन्तरमध्यमासु तारमन्द्रमध्यमरूपासु उच्चरणक्रियासु । (J.T.)

(2) मृत्युमत्यो भवन्ति–न अपुनरावृत्तिफलं प्राप्नुवन्ति, न कम्पते–न च्यवते–अपुनरावृत्तिफलं प्राप्नोतीति ।

(3) कवयः–ज्ञानिनः, शान्तम्–सुखोत्कर्षसीमाभूमिम् । (J.T.)

षष्ठः प्रश्नः

[VI-1] Expl. (1) कोऽसौ पुरुषः क च आस्ते, का नाम षोडशकलाः, कथं च तस्य षोडशकलत्वमित्यादि । (J.T.)

[VI-2] Expl. (1) Prāṇa etc., sixteen mentioned here are sixteen kalās. The word kalā does not mean parts of the body but those that help the self and body. प्राणाद्याः षोडशसंख्याः कलाः सजीवशरीरस्य भागाः । (J.T.)

अत्र भागशब्देन उपकारकं विवक्षितम् । (M.T.)

अत्र किञ्चित् जीवोपकारकं किञ्चित् शरीरोपकारकं सर्वथा सजीवशरीर-रूपविशिष्टोपकारकत्वं सर्वेषां समानम् । (M.T.)

(2) God thought of creating these sixteen kalās in order to help the Jīvas to acquire right knowledge and to conduct themselves in the right way. जीवस्य मोक्षोपयोगिज्ञानार्थं प्रवृत्त्याद्यर्थं च शरीराणि तावदुत्पादनीयानि । अतः शरीरोपयुक्ताः प्राणादिषोडशकलाः सृजानीतीक्षांचक्रे । (J.T)

(3) God created prāṇa first and then other kalās. कोऽनु मद्वशीकरणक्षमभक्तिज्ञानादिसम्पन्नः यं निमित्तीकृत्य अहं कलाः सृजानीत्येवमीक्षांचक्रे । (J.T.)

(6) अज्ञैरनवगतान्यपि समुद्रे स्थितानां नदीनां विष्णौ स्थितानां मुक्तानां च भिन्नान्येव नामरूपाणि सन्त्येवेत्यर्थः । (M.B.)

(7) नहि भेदशब्दः नाशे प्रयुज्यमानः क्वापि दृष्टः । घटादावपि बहुभाव एव भेदशब्दः प्रयुज्यते । नाशस्तु अर्थत एव अवगम्यते । (M.B.)

(8) प्राणादयः कला यस्मिन् मुक्ता नित्यं प्रतिष्ठिताः ।
पृथक् पृथङ् नामरूपैर्नमस्तस्मै पराय ते ॥ इति सत्तत्त्वे । (M.B.)

[VI-4] Expl. (1) मृत्युः–संसारः, पिता–निरुपाधिकोपकारकः । (J.T.)

(2) नातःपरं मया विदितम्–अस्मदादयः तदेकदेशविद एव नत्वपरिमितविद इति भावः ।

(3) Bhāṣya draws the attention to the following śruti passages that state the retention of difference even after liberation.

(i) यथा नद्यः स्यन्दमानाः समुद्रे अस्तं गच्छन्ति नामरूपे अविहाय । तथा विद्वान् नामरूपाद् विमुक्तः परात् परं पुरुषमुपैति दिव्यम् ।

Here विमुक्त means अमुक्त as in विप्रिय.

(ii) तत्र पूर्वे साध्या सन्ति देवाः ।

(iii) स तत्र पर्येति जक्षन् क्रीडन् रममाणः ।

(iv) सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता ।

इति श्रीषट्प्रश्नोपनिषदः षष्ठः प्रश्नः समाप्तः

इति श्री पाण्डुरङ्गि तमणाचार्यसूनु कृष्णाचार्य विरचिता
श्रीषट्प्रश्नोपनिषदः आङ्ग्लभाषा टिप्पणी समाप्ता

आथर्वणोपनिषत्

This Upaniṣad belongs to Atharvaveda. The Supreme God with the designation of Akṣara is the deity for this Upanishad. Chaturmukhabrahmā, Atharva, Angira, Bhāradvāja, Angirasa, and Śaunaka are the sages. The metres employed vix., Anustup etc, could be ascertained by counting the syllables.

The central teaching of this Upaniṣad is to give an exposition of the nature of God designated as Akṣara. For this purpose, the nature of two levels of knowledge viz., higher and lower i.e., Paravidyā and Aparavidyā is explained. The purpose of Karmānusthāna, the process of creation, the status of the liberated soul are also discussed in this Upaniṣad. This Upaniṣad is also called Mundakopaniṣad.

प्रथमः खण्डः

THE LINE OF TEACHERS

ब्रह्मा देवानां प्रथमः सम्बभूव
विश्वस्य कर्ता भुवनस्य गोप्ता ।
स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम्
अथर्वाय ज्येष्ठपुत्राय प्राह ॥ १ ॥

Chaturmukha brahmā was born (from the supreme God Viṣnu) as first among the deities. He, the creator and protector of the world, imparted the knowledge of Brahman, which is the foundation of all other knowledge, to his eldest Son Atharva.

अथर्वणे यां प्रवदेत ब्रह्मा
अथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम् ।

स भारद्वाजाय सत्यवहाय प्राह
भारद्वाजोऽङ्गिरसे परावराम् ॥ २ ॥

The knowledge of Brahman which Chaturmukha brahmā taught to Atharva, was taught to Angira by Atharva. Angira taught it to Satyavaha, son of Bhāradvāja. He taught it to Angirasa. The lore that gives this knowledge is higher or lower depending upon the knowledge that is obtained from this lore.

शौनको ह वै महाशालोऽ-
ङ्गिरसं विधिवदुपसन्नः पप्रच्छ ।
कस्मिन्नु भगवो विज्ञाते
सर्वमिदं विज्ञातं भवतीति ॥ ३ ॥

Śaunaka, performer of a sacrifice every year duly approached Angirasa and asked him– 'Revered Sir, by knowing what, the knowledge of all that I know now, will be meaningful and purposeful ?

TWO KINDS OF KNOWLEDGE

तस्मै स होवाच । द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवापरा च ॥ ४ ॥

Angirasa told Śaunaka– 'the knowers of Brahman declare that there are two knowledges to be had viz., the higher and the lower.

तत्रापरा । ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते ॥ ५ ॥

The Rgveda, Yajurveda, Sāmaveda, Atharvaveda, Śikṣā, Kalpa, Vyākarṇa, Nirukta, Chandas and Jyotiṣa constitute Aparavidyā. The same constitute Paravidyā when the knowledge of Akṣara is obtained from them.

UNIQUE NATURE OF AKṢARA

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः श्रोत्रं तदपाणिपादं नित्यं विभुः सर्वगतं सुसूक्ष्मम् । तदव्ययं तद्भूतयोनिं परिपश्यन्ति धीराः ॥ ६ ॥

The Akṣara cannot be cognised by external senses, it cannot be grasped even by mind completely, it cannot be classified under any gotra or varṇa, it has no prākṛta eyes, ear, hands, feet, etc., it is eternal, it is all powerful, it is all pervasive and subtle. The wise perceive this imperishable as the source of all beings.

AKṢARA CREATES THE WORLD

यथोर्णनाभिः सृजते गृह्णते च
यथा पृथिव्यामोषधयः सम्भवन्ति ।
यथा सतः पुरुषात् केशलोमानि
तथाक्षरात् सम्भवतीह विश्वम् ॥ ७ ॥

As a spider sends forth and draws back (its threads), as herbs grow on earth, as the hair grow on the body of a living person, so the world arises from Akṣara, the imperishable.

तपसा चीयते ब्रह्म ततोऽन्नमभिजायते ।
अन्नात् प्राणो मनः सत्यं लोकाः कर्मसु चामृतम् ॥ ८ ॥

The Brahman thought. Then anna, prāna, manas, satya, and the worlds arose along with their presiding deities. Then, Karmas arose and led to svarga.

यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः ।
तस्मादेतद् ब्रह्म नामरूपमन्नं जायते ॥ ९ ॥

He knows all and he possesses all. His knowledge is his penance. From him this Chaturmukha Brahmā, the presiding deity of names and entities, is born.

द्वितीयः खण्डः

PERFORM SACRIFICES IN DEDICATION TO LORD VIṢṆU

तदेतत् सत्यम् ।

मन्त्रेषु कवयो यान्यपश्यन्
तानि त्रेतायां बहुधा सन्ततानि ।
तान्याचरथ नियतं सत्यकामाः
एष वः पन्थाः सुकृतस्य लोके ॥ १ ॥

This Akṣara is independent and it lends reality to all others. The sacrifices, which the wise saw in their mind, spread in many ways in Tretāyuga. You desirous of knowing the Supreme God perform these without fail. These, when performed with the purpose of obtaining God's knowledge, will lead to the highest world.

यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने ।
तदाज्यभागावन्तरेणाहुतीः प्रतिपादयेत् ॥ २ ॥

When the fire is fully kindled and the flames roll, between the two ājyabhāga offerings, the main oblations be made.

यस्याग्निहोत्रमदर्शपूर्णमासमनाग्रयणमतिथिवर्जितं च ।
अहुतमवैश्वदेवमविधिना हुतमासप्तमान् लोकान् हिनस्ति ॥ ३ ॥

He whose Agnihotra sacrifice is without the three sacrifices viz., Darśa, Pūrnamāsa and Āgrayana, without guests, without timely oblations, without Vaisvadeva and performed disregarding the procedure will destroy his opportunity to get the seven worlds.

SEVEN TONGUES OF AGNI

काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरुची च देवी
लेलायमाना इति सप्त जिह्वाः ॥ ४ ॥

The black, the terrific, the swift as mind, the red, the smoky coloured, the sparking and all shining are the seven rolling tongues of fire.

THE SACRIFICER IS LED TO BRAHMALOKA

एतेषु यश्चरते भ्राजमानेषु
यथाकालं चाहुतयो हि आददायन् ।
तन्नयन्त्येताः सूर्यरश्मयो
यत्र देवानां पतिरेकोऽधिवासः ॥ ५ ॥

He who offers oblations into these shining tongues of fire, regularly, is led by the deities who are present in the rays of the Sun to the world where the lord of all deities resides.

एह्येहीति तमाहुतयः सुवर्चसः
सूर्यरश्मिभिर्यजमानं वहन्ति ।
प्रियां वाचमभिवदन्त्योऽर्चयन्त्यः
एष वः पुण्यः सुकृतो ब्रह्मलोकः ॥ ६ ॥

The radiant deities having received the oblations carry the sacrificer with the rays of the Sun honouring and welcoming him with the pleasant words 'Come, come to this world of Brahman earned by your good deeds.'

SACRIFICES PERFORMED WITHOUT DEDICATION TO LORD VIṢṆU ARE LIKE LEAKING BOAT

प्लवा हि एते अदृढाः यज्ञरूपाः
अष्टादशोक्तमवरं येषु कर्म।
एतच्छ्रेयो येऽभिनन्दन्ति मूढाः
जरामृत्युं ते पुनरेवापियन्ति ॥ ७ ॥

These sacrifices, if performed without dedicating to the Supreme God, are like leaking boats. The ignorant persons who consider such inferior sacrifices piloted by the eighteen persons as the means of good and delight in these, will fall into old age and death again and again.

अविद्यायामन्तरे वेष्टयमानाः
स्वयं धीराः पण्डितं मन्यमानाः।
जङ्घन्यमानाः परियन्ति मूढाः
अन्धेनैव नीयमानाः यथान्धाः ॥ ८ ॥

The ignorant wrapped in ignorance, labouring under the impression that they are wise and learned, limping, rotate like blinds led by a blind.

अविद्यायां बहुधा वर्तमानाः
स्वयं कृतार्था इत्यभिमन्यन्ति बालाः।
यत् कर्मिणो न प्रवेदयन्ति रागात्
तेनातुराः क्षीणलोकाश्च्यवन्ते ॥ ९ ॥

The ignorant, being in ignorance in many ways, think that they have achieved their goals. But as they perform sacrifices being attached to lower benefits, they do not know the Supreme God. Hence, they suffer from the tension and come down from the worlds obtained.

इष्टापूर्तं मन्यमाना वरिष्ठं
नान्यत् श्रेयो वेदयन्ते प्रमूढाः ।
नाकस्य पृष्ठे सुकृते तेऽनुभूत्वा
इमं लोकं हीनतरं वा विशन्ति ॥ १० ॥

The ignorant consider the sacrifices and other welfare activities like giving food to the needy etc., as the highest. They do not know the Supreme God as the highest good. Among these, those who are aware that God is slightly superior to other deities enjoy the benefits of their sacrifices in heaven and then come down to human world. But those who consider the God as equal to other deities or inferior to them will enter into the lowest world.

THOSE WHO ARE DEDICATED TO GOD WILL ATTAIN HIM

तपःश्रद्धे येऽभ्युपवसन्त्यरण्ये
शान्ता विद्वांसो भैक्षचर्यां चरन्तः ।
सूर्यद्वारेण ते विरजाः प्रयान्ति
यत्रामृतः स पुरुषो ह्यव्ययात्मा ॥ ११ ॥

Those who live in a holy place practicing penance and faith, dedicated to the supreme God, wise, living on alms, being freed from their sins, reach the place, through the sun, where the immortal and imperishable Puruṣa dwells.

BE NOT INTERESTED IN LOWER WORLDS

परीक्ष्य लोकान् कर्मचितान्
ब्राह्मणो निर्वेदमायान्नास्त्यकृतःकृतेन ।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्
समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥ १२ ॥

He who is interested in acquiring the knowledge of Brahman, considering the inferior nature of the worlds to be obtained through sacrifices, should get detached from them. No permanent can be obtained by the impermanent. Therefore, in order to get the knowledge of Brahman, one should approach, holding samit-stick in his hand, a preceptor who is learned in the Vedas and who is devoted to Brahman.

तस्मै स विद्वानुपसन्नाय सम्यक्
प्रशान्तचित्ताय शमान्विताय ।
येनाक्षरं पुरुषं वेद सत्यं
प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥ १३ ॥

The learned Angirasa imparted to Śaunaka who had approached him, who had a tranquil mind, and was dedicated to God, the true knowledge of Brahman by which he could comprehend the supreme and imperishable Puruṣa.

इति द्वितीयः खण्डः

तृतीयः खण्डः

AKṢARA IS THE SOURCE OF ALL

तदेतत् सत्म् ।

यथा सुदीप्तात् पावकात् विष्फुलिङ्गा
सहस्रशः प्रभवन्ते सरूपाः ।
तथाक्षराद् विविधाः सोम्य भावाः
प्रजायन्ते तत्र चैवापियन्ति ॥ १ ॥

This is the truth– Just as thousands of similar sparks arise from a blazing fire, so also, O beloved, many kinds of beings arise from Akṣara and return to him.

दिव्यो हि अमूर्तः पुरुषः स बाह्याभ्यान्तरो ह्यजः ।
अप्राणो ह्यमनाः शुभ्रो हि अक्षरात् परतः परः ॥ २ ॥

The Puruṣa is divine, unlimited, present within and without, unborn, has no prāṇa, manas etc., sixteen kalās, pure and superior to chetana prakriti and jadaprakriti.

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥ ३ ॥

From the Puruṣa arose prāṇa, manas, senses, ākāśa, vāyu, jyoti, ap, prithvi and all that is held in Brahmanda.

ANGASRISHTI– CREATION OF DEITIES THROUGH GOD'S LIMBS

अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ
दिशः श्रोत्रौ वागविवृताश्च वेदाः ।
वायुःप्राणो हृदयं विश्वमस्य
पद्भ्यां पृथिवी ह्येष भूतान्तरात्मा ॥ ४ ॥

His head is agni, his eyes are chandra and sūrya, his ears are dik, his speech is revealed Vedas, his breath is vāyu, his heart is visva, the pṛthvi originated from his feet, he is the regulator of all, being present in all.

AKṢARA PURUṢA CREATES ALL

तस्मादग्निः समिधः यश्च सूर्यः
सोमात् पर्जन्यः ओषधयः पृथिव्याम् ।

पुमान् रेतः सिञ्चति योषितायां
बह्वीः प्रजाः पुरुषात् सम्प्रसूताः ॥ ५ ॥

From the Puruṣa the fire and the samit-sticks arose. From the sun and moon arose the rain. From the rain the plants on the earth.

Puruṣa, the God, places the world in the woman i.e., Ramā (at the time of creation) and many beings are born from him.

तस्मादृचः साम यजूंषि दीक्षा
यज्ञाश्च सर्वे क्रतवो दक्षिणाश्च ।
संवत्सरश्च यजमानश्च लोकाः
सोमो यत्र पवते यत्र सूर्यः ॥ ६ ॥

From the Puruṣa the Riks, Samans, Yajus, initiation, agnihotra and all other sacrifices, sacrificial gifts, year, the sacrificer, and the worlds where sun and moon move arise.

तस्माच्च देवाः बहुधा सम्प्रसूताः
साध्याः मनुष्याः पशवो वयांसि ।
प्राणापानौ व्रीहियवौ तपश्च
श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च ॥ ७ ॥

From the Puruṣa many deities, sādhyas, human beings, cattle, birds, prāṇa, apāna, rice, barely, penance, faith, truthfulness, celibacy and duty arise.

सप्त प्राणाः प्रभवन्ति तस्मात्
सप्तार्चिषः समिधः सप्त होमाः ।
सप्त इमे लोका येषु चरन्ति
प्राणा गुहाशयां निहिताः सप्त सप्त ॥ ८ ॥

From the Puruṣa, the seven sense organs, their seven functions, seven objects of senses, seven contacts of senses and objects, seven locations of senses wherein these senses function in each body to provide knowledge arise.

अतः समुद्रा गिरयश्च सर्वे
अस्मात् स्यन्दन्ते सिन्धवः सर्वरूपाः ।
अतश्च सर्वा ओषधयो रसाश्च
येनैष भूतैः तिष्ठते हि अन्तरात्मा ॥ ९ ॥

From the Puruṣa, the seas, the mountains, the rivers flowing in all directions, all plants and all essences arise.

The Puruṣa remains with all the elements created by him as regulator from within.

इति तृतीयः खण्डः

चतुर्थः खण्डः

THERE IS NO DIFFERENCE BETWEEN GOD AND HIS ATTRIBUTES

पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम् ।
एतद्यो वेत्ति निहितं गुहायां
सोऽविद्याग्रन्थिं विकिरति ह सोम्य ॥ १ ॥

All the attributes of Puruṣa viz., creation etc., activities, knowledge etc., are non-different from him. He is Brahman, he is immortal in the highest sense.

O beloved! He who knows him as present at the heart of all shall get rid of the knot of prakṛti bondage.

ALL ARE DEPENDENT UPON GOD

आविः सन्निहितं गुहाचरं नाम महत् पदम् ।
अत्रैतत् सर्वमर्पितमेजत् प्राणन्निमिषच्च यत् ।
एतज्जानथ सदसद्वरेण्यं
परं विज्ञानाद् यद् वरिष्ठं प्रजानाम् ॥ २ ॥

Puruṣa is ever manifest, present everywhere, present at the heart, and is the great goal. All that moves, breathes, and sleeps is entirely dependent upon him. Know him as superior to cause and effect, superior to Chaturmukha-brahmā and superior to all beings.

यदर्चिमद्यदणुभ्योऽणु च यस्मिन् लोका निहिता लोकिनश्च ।
तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्मनः ।
तदेतत् सत्यम् । तदमृतं तद् वेद्धव्यं सोम्य विद्धि ॥ ३ ॥

The Puruṣa is luminous, he is subtler than subtle. All the worlds and the people living in the worlds are supported by him. He is Akṣara, he is Brahman Prāṇa Vāk and manas. He is independent, immortal. He should be known. O beloved, know him.

'OM'KĀRA IS BOW, MIND IS ARROW

धनुर्गृहीत्वौपनिषदं
शरं हि उपासानिशितं सन्दधीत ।
आयम्य यद् भावगतेन चेतसा
लक्ष्यं तदेवाक्षरं सोम्य विद्धि ॥ ४ ॥

Taking the bow of Upaniṣads, i.e., 'Om'kara, the great arrow, i.e., mind, sharpened by the meditation, should be employed. Diverting the mind from all other objects and concentrating on the aim Akṣara, O beloved, know him.

प्रणवो धनुः शरो हि आत्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यंए शरवत्तन्मयो भवेत् ॥ ५ ॥

The syllable 'Om' is the bow, the mind is the arrow, Brahman is the aim. One should know him without any laxity. Then he will reach him like an arrow.

यस्मिन् द्यौः पृथिवी च अन्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः ।
तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ । अमृतस्यैष सेतुः ॥ ६ ॥

Know him alone, on whom the sky, the earth, the interspace, and the mind together with senses are entirely dependent. Leave talking about other things. He is the support for the liberated.

GOD IS PRESENT AT THE HEART

अरा इव रथनाभौ संहता यत्र नाड्यः
स एषोऽन्तश्चरते बहुधा जायमानः ।
ओमित्येन ध्यायत आत्मानं
स्वस्ति वः पराय तमसः परस्तात् ॥ ७ ॥

Like the spokes in the centre of a chariot-wheel, all the arteries in the body are connected with him. He moves within the eyes etc., of the body assuming many forms, i.e. viśva, taijasa etc.

Meditate upon Paramātma as 'Om' in order to get the knowledge of him as superior to chetana and achetana prakṛtis. May this knowledge bestow the good on you!

यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवि ।
दिव्ये ब्रह्मपुरे हि एष व्योम्न्यात्मा सम्प्रतिष्ठितः ॥ ८ ॥

He is omniscient. He possesses everything. His glory is revealed on earth etc., all worlds. He is present at the sky of heart in the body.

मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय ।
तद्विज्ञानेन परिपश्यन्ति धीराः आनन्दरूपममृतं यद्विभाति ॥ ९ ॥

He who is omniscient and the regulator of the senses and body. is present in the body at the heart. The wise see him by meditating upon him. His blissful and immortal form is revealed.

THE KNOT OF THE HEART SHALL BE CUT

भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ १० ॥

When the highest God is seen the knot of the heart is cut. All doubts get dispelled and the deeds terminate.

GOD IS PRESENT IN THE SUN

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् ।
तत् शुभ्रं ज्योतिषां ज्योतिः तद्यदात्मविदो विदुः ॥ ११ ॥

In the highest golden orb there is Brahman, flawless, without sixteen kalās, pure and the light of lights. Those who have the knowledge of Brahman see him.

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥ १२ ॥

The Sun does not illuminate him, the moon, the stars the lightning do not illuminate him. How can the fire illuminate him ? Everything shines following his illumination. All these beings are illuminated by him.

ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म
पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण ।
अधश्चोर्ध्वं च प्रसृतं
ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥ १३ ॥

The immortal Brahman is before, behind, to the south, to the north, above and below. The Brahman is extended everywhere. He is infinite and supreme.

इति चतुर्थः खण्डः

पञ्चमः खण्डः

THE TWO BIRDS AT THE BODY

द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्ति
अनश्नन्नन्यः अभिचाकशीति ॥ १ ॥

The two birds who are always together and friendly remain in the same tree, i.e., body. Of these two, one eats the sweet fruit i.e., result of his deeds, and the other shines without eating it.

समाने वृक्षे पुरुषो निमग्नो
अनीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीशमस्य
महिमानमिति वीतशोकः ॥ २ ॥

The Jīva, though he resides in the same tree i.e., body, suffers, being deluded by the independent will of God. But by duly worshipping God when he realises God's glory, his difference with him gets freed from his misery.

APAROKSHAJÑĀNIN GETS RID OF THE EFFECT OF DEEDS

यदा पश्यः पश्यते रुक्मवर्णं
कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति ॥ ३ ॥

When the Jīva sees the Puruṣa of golden form, who is the creator of the world, and the creator of Chaturmukhabrahmā, then, being a knower, he gets rid of the effects of good and evil deeds, gets free from avidyā, and attains close similarity with Brahman.

THE LIBERATED WORSHIPS THE GOD

प्राणो हि एष सर्वभूतैर्विभाति
विजानन् विद्वान् भवते नातिवादी ।
आत्मक्रीड आत्मरतिः क्रियावान्
एष ब्रह्मविदां वरिष्ठः ॥ ४ ॥

The wise, realising that the God shines as the prime mover with the presiding deities of senses etc., does not claim any agency to himself. He sports with God, rejoices with God, and worships God. He is the best among the knowers.

GOD CAN BE ATTAINED BY TRUTHFULNESS AND KNOWLEDGE

सत्येन लभ्यः तपसा हि एष आत्मा
सम्यग् ज्ञानेन ब्रह्मचर्येण नित्यम् ।
अन्तःशरीरे ज्योतिर्मयो हि शुभ्रो
यं पश्यन्ति यतयः क्षीणदोषाः ॥ ५ ॥

The paramātma present in the body who is luminous and pure can be obtained by truthfulness, penance, right knowledge, and celibacy. Those who undertake the efforts and are free from the drawbacks will see him.

सत्यमेव जयति नानृतं
सत्येन पन्था विततो देवयानः ।
येनाक्रमन्त्यृषयो ह्याप्तकामाः
यत्र तत्सत्यस्य परमं निधानम् ॥ ६ ॥

Those alone who are devoted to the truth, i.e., God, will prevail but not those who are stuck up in untruth, i.e., evil forces. The Path called devayāna is laid by truth, i.e., God. The sages of great will-power travel by this path to the place which is the highest abode of the truth, i.e., God.

बृहच्च तद्दिव्यमचिन्त्यरूपं
सूक्ष्माच्च तत्सूक्ष्मतरं विभाति ।
दूरात् सुदूरे तदिहान्तिके च
पश्यत्स्विहैव निहितं गुहायाम् ॥ ७ ॥

The great, divine, of unthinkable nature, subtler than subtle shines. It is far away and very near. For those who can see it, it is placed at the heart.

GOD COULD BE ATTAINED ONLY BY HIS GRACE

न चक्षुषा गृह्यते नापि वाचा
नान्यैः देवैः तपसा कर्मणा वा ।
ज्ञानप्रसादेन विशुद्धसत्त्वः
ततस्तु तं पश्यते निष्कलं ध्यायमानः ॥ ८ ॥

God is not comprehended by the eye, by the speech, by the grace of other deities, by the penance, or deeds. He who is

purified by the grace of God will see him who is devoid of sixteen kalās, by meditation.

GOD IS PRESENT IN MUKHYAPRĀṆA

एष अणुरात्मा चेतसा वेदितव्यो
यस्मिन् प्राणः पञ्चधा संविवेश।
प्राणैश्चित्तं सर्वमोतं प्रजानां
यस्मिन् विशुद्धे विभवत्येष आत्मा ॥ ९ ॥

This subtle paramātma should be known by mind. The mind of all beings together with the five senses are held by Mukhyaprāṇa. He, with his five forms, is held by the God who is devoid of sixteen kalās. He shines forth.

यं यं लोकं मनसा संविभाति
विशुद्धसत्त्वः कामयते यांश्च कामान्।
तं तं लोकं जयते तांश्च कामान्
तस्मादात्मज्ञं हि अर्चयेद् भूतिकामः ॥ १० ॥

Whatever worlds a liberated person of purified mind thinks of and whatever desires he desires, he attains all those worlds and desires. Therefore, he who desires prosperity should honour him.

इति पञ्चमः खण्डः

षष्ठः खण्डः

MEDITATE ON GOD AS PRESENT IN MUKHYAPRĀṆA

स वेदैतत्परमं ब्रह्मधाम
यत्र विश्वं निहितं भाति शुभ्रम्।
उपासते पुरुषं ये हि अकामाः
ते शुक्रमेतदतिवर्तन्ति धीराः ॥ १ ॥

He knows that supreme abode of God i.e., Mukhyaprāṇa, in whom the infinite and pure God is present and shines. Those who meditate upon the Supreme God, being free from the desire etc., as present in Mukhyaprāṇa attain him, the pure, overcoming the bondage.

कामान् यः कामयते मन्यमानः
स कामभिर्जायते तत्र तत्र ।
पर्याप्तकामस्य कृतात्मनश्च
इहैव सर्वे प्रविलीयन्ति कामाः ॥ २ ॥

He who goes on desiring the worldly objects, thinking them as beneficial, is born again and again consequent on his desires. But he who desires the perfect and is satisfied with it gets rid of all worldly desires here only.

GOD BESTOWS HIS GRACE ON THE CHOSEN

नायमात्मा प्रवचनेन लभ्यः
न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यः
तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥ ३ ॥

The paramātma cannot be attained by mere teaching, meditation or listening to the vast sacred literature. He can be attained by him only whom he chooses. He will reveal himself only to the chosen.

नायमात्मा बलहीनेन लभ्यः
न च प्रमादात् तपसो वाप्यलिङ्गात् ।
एतैरुपायैर्यतते यस्तु विद्वान्
तस्यैष आत्मा विशते ब्रह्म धाम ॥ ४ ॥

The paramātma cannot be attained by one who has no strength, nor can he be attained by the inattentive or by the unprescribed penance. But when a wise person makes efforts by these very means duly, the God reveals himself to him through his abode, i.e., Mukhyaprāṇa.

सम्प्राप्यैनमृषयो ज्ञानतृप्ताः
कृतात्मानो वीतरागाः प्रशान्ताः ।
ते सर्वगं सर्वतः प्राप्य धीराः
युक्तात्मानः सर्वमेवाविशन्ति ॥ ५ ॥

The sages, having reached him are content with their knowledge, successful in their effort, detached from worldly things, and peaceful. These wise seers, having reached the omnipresent, get liberated from all bondage and enter into him.

LIBERATION AT THE END OF CHATURMUKHA BRAHMA'S HUNDRED YEARS

वेदान्तविज्ञानसुनिश्चितार्थाः
सन्न्यासयोगाद् यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोकेषु परान्तकाले
परामृतात् परिमुच्यन्ति सर्वे ॥ ६ ॥

Those who have firm knowledge of the doctrine of Vedas, whose mind is purified by the dedication of all their deeds to God, remain in the world of Chaturmukha-brahmā, and at the close of the hundred years of Chaturmukha-brahmā get freed from the bondage of prakṛti, lingadeha etc.

THE LIBERATED DWELL WITH THE GOD

गताः कलाः पञ्चदशप्रतिष्ठाः
देवाश्च सर्वे प्रतिदेवतासु ।

कर्माणि विज्ञानमयश्चात्मा
परेऽव्यये सर्वे एकीभवन्ति ॥ ७ ॥

The presiding deities of fifteen kalās that regulated the jīva during bondage, also get liberated when jīva is liberated. The other deities also remain in the liberated jīvas that are their pratibimbas. The presiding deity of the deeds, the jīva of conscious nature, all these, attain unity with the great and imperishable God by being present in the same place and having the same thought.

THE LIBERATED RETAIN THEIR INDIVIDUALITY

यथा नद्यः स्यन्दमानाः समुद्रायणाः
समुद्रं प्राप्यास्तं गच्छन्ति नामरूपेऽविहाय ।
तथा विद्वान् नामरूपाद् विमुक्तः
परात् परं पुरुषमुपैति दिव्यम् ॥ ८ ॥

Just as the rivers flowing towards the ocean, on reaching the ocean, become unobservable without casting away their name and form, so also, the knower attains the highest divine Puruṣa without losing his individuality of name and form.

THE LIBERATED ATTAIN THE GREATNESS TO THEIR FULL CAPACITY

स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति ।
नास्य अब्रह्मवित् कुले भवति ।
तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति ॥ ९ ॥

He who knows the great Brahman attains the greatness as per his capacity. In his progeny, none who does not know Brahman will be born. He will get freed from the knots of the heart and attain immortality.

TEACH THE DESERVING ONLY

तदेष श्लोकः ।

क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः
स्वयं जुह्वत एकर्षिं श्रद्धयन्तः ।
तेषामेवैतां ब्रह्मविद्यां वदेत
शिरोव्रतं विधिवद्यैस्तु चीर्णम् ॥ १० ॥

This is the verse :

This knowledge of Brahman will be imparted only to those who perform sacrifices, who are learned in the Vedas, who are devoted to Brahman, who perform rituals on their own, who have faith in the line of seers and by whom the ritual called sirovrata is duly performed.

तदेतत् सत्यमृषिरङ्गिराः प्रोवाच । नैतदचीर्णव्रतोऽधीते । ॐनमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥

The sage Angirasa imparted this truth in the past. None who has not performed the rite should learn this. Salutations to the great sages.

इति श्री आथर्वणोपनिषदः आङ्ग्लभाषानुवादः पाण्डुरङ्ग तमणाचार्यसूनु कृष्णाचार्य विरचितः समाप्तः

NOTES AND EXPLANATION

प्रथमः खण्डः

[I-1] Expl. (1) ब्रह्मा–चतुर्मुखः, देवानाम्–शेषवीन्द्रादीनाम्, प्रथमः–देवेभ्यः प्राथमिकः सन् विष्णोः सकाशात् सम्बभूव । (R.K.)

(2) Chaturmukha brahmā is not the creator and protector independently. He carries out these responsibilities being under the regulative control of the Supreme God i.e., Viṣṇu.

(3) सर्वविद्याप्रतिष्ठाम्–सर्वाः विद्याः प्रतितिष्ठन्ति यस्यां ताम्, यज्ज्ञाने सर्वविद्याः विदितफलाः भवन्ति तादृशीं ब्रह्मविद्याम् । (R.K.)

The knowledge of Brahman is the foundation of all other knowledge in the sense that it is this knowledge that makes all other knowledge meaningful and purposeful.

(4) Atharva was the eldest son of Chaturmukha brahmā in Vaivasvata manvantara, while in the first Kalpa, Siva was the eldest son, and in Varāhakalpa Sanaka etc. were the eldest.

(i) मनोर्वैवस्वतस्यादौ अथर्वा ब्रह्मणोऽजनि ।

(ii) ब्रह्मणः प्रथमे कल्पे शिवः प्रथमजः स्मृतः ।
सनकाद्यास्तु वाराहे ब्रह्मा विष्णोः सुतोऽग्रजः ॥ इति ब्रह्माण्डे । (M.B.)

[I-2] Expl. (1) परावराम्–परा च सा अवरा च ताम् । एकैव विद्या विवक्षाभेदेन परा अवरा च भवति । सा च ऋगादिरूपेत्यग्रे वक्ष्यते । (R.K.)

The same sacred literature Ṛgveda etc., is both Paravidyā and Aparavidyā depending upon the meaning obtained.

[I-3] Expl. (1) महाशालः–प्रत्यब्दं यज्ञकृत् । (R.K.) He who performs a sacrifice every year.

(2) Śaunaka had the knowledge of sacrifices and deities. This was not sufficient for achieving the highest goal viz., liberation.

(5) The third illustration of hair growing on the body is intended to show that just as hair grows without any special effort in a natural way, similarly, God creating the world is his very nature and therefore, no special effort or any purpose to be achieved for himself is involved in creation.

यथा केशलोमान्यनायासेन भवन्ति तथा अक्षरादनायासेन विश्वं सम्भवतीत्यर्थः । (R.K.)

Thus, the three illustrations indicate three important points in connection with the creation. None of them supports either the pariṇāma theory or the vivarta theory. To interpret all the three illustrations as supporting only one point viz., parināma or vivarta is not correct. None of the illustrations supports such an interpretation.

[I-8] Expl. (1) Further details of creation are given here. The fact that Brahman contemplated while creating shows that he is not the material cause or parināmi kārana but he is an agent or kartā.

तपसा–ज्ञानेन, चीयते–सम्बध्यते, ब्रह्म विश्वं सृजानीति व्यचारयदिति यावत् । ज्ञानविचाररूपवतो न परिणामितेति भावः । (R.K.)

(2) Here anna etc., also stand for their presiding deities. अत्र अन्नादिपदेन जडं तदभिमानिदेवता च ग्राह्या । (R.K.)

(3) कर्मसु निमित्तभूतेषु अमृतं स्वर्गादिफलं जायते । (R.K.)

[I-9] Expl. (1) सर्ववित्–सर्वं विन्दते इति सर्ववित् । आप्तकाम इत्यर्थः । (R.K.)

(2) नामरूपशब्दितशब्दप्रपञ्चार्थप्रपञ्चाभिमानितया अभेदोपचारेण नामरूपमन्नमित्युक्तं तत् चतुर्मुखाख्यं ब्रह्म जायत इत्यर्थः । (R.K.)

इति प्रथमः खण्डः

द्वितीयः खण्डः

[II-1] Expl. (1) Śaunaka had asked– By the knowledge of what, the knowledge of sacrifices and deities will be meaningful and purposeful ? This question is answered here.

कर्मदेवतादिज्ञानं यज्ज्ञानार्थं सत् अनल्पास्थिरफलवद् भवति तन्मे ब्रूहीति पृष्टवन्तं शौनकं प्रति अङ्गिराः ब्रह्मज्ञानार्थं सत् तादृशफलवद् भवतीति भावेन तज्ज्ञानार्थत्व-प्रकारमाह–तदेतत् सत्यमिति । (R.K.)

(2) सत्यम्–अपराधीनस्वरूपं सर्वसत्यताप्रदं च, मन्त्रेषु–समाधौ, मनसा अपश्यन्, कवयः–ज्ञानिनः । (R.K.)

(3) त्रेतायाम्–त्रेतायुगे, बहुधा सन्ततानि–कृतयुगे इव विष्ण्वेकविषयाणि नासन् किन्तु नानाप्रकारेण तत्तद्देवतोद्देशेन कृत्वा अन्ते विष्णौ अर्पयन्तीति बहुधा प्रवर्तितान्यासन्नित्यर्थः । (R.K.)

In Kṛtayuga all sacrifices were performed offering them to Lord Viṣṇu. However, in Tretāyuga these were offered to various other deities and through them were ultimately offered to Lord Viṣṇu. It is to indicate this procedure that the expression बहुधा सन्ततानि is used here.

(4) सत्यकामाः–सत्याख्यभगवज्ज्ञानकामाः । (R.K.)

(5) कर्मदेवतादिज्ञानं तदनुष्ठानेन अन्तःकरणशुद्धिद्वारा ब्रह्मज्ञानहेतुश्रवणाद्यङ्गं सत् ब्रह्मज्ञानं जनयित्वा अनन्तफलवद्भवति ।

The knowledge of sacrifices and deities will enable one to perform sacrifices which will help to purify the mind and help to get the knowledge of Brahman. Thus, the knowledge of sacrifices and deities will also lead to the final goal. It is meaningful and purposeful only in this way.

(6) एषः भगवज्ज्ञानोद्देशकः कर्माचारः वः युष्माकं सुकृतस्य लोके लोकस्य पन्थाः इत्यर्थः ।

[II-2] Expl. (1) The procedure of offering oblations is briefly explained here.

(2) आज्यभागौ अन्तरेण–आज्यभागयोः मध्ये, आहुतीः–प्रधानहोमान् ।

[II-3] Expl. (1) One who maintains Agñihotra must perform Darśa, Pūrnamāsa, Āgrayana and Vaisvadeva compulsorily. He must maintain the timings of oblations accurately. He should correctly follow all procedures. He should entertain the guests properly. Such careful performance dedicating the same to Lord Viṣṇu will help him to get the worlds prescribed for each sacrifice and the knowledge of Brahman if performed without aiming at this or that fruit.

(2) आग्रयणम्–नूतनधान्यहोमः, आसप्तमान्–भूलोकमारभ्य सप्तमभूतसत्यलोकपर्यन्तान्, भुवर्लोकमारभ्य सप्तमभूतवैकुण्ठलोकपर्यन्तानिति वा, हिनस्ति–नाशयति, ऊर्ध्वलोकाः तस्य न भवन्तीत्यर्थः । (R.K.)

[II-5] Expl. (1) One who duly performs sacrifices will be led to the highest world by the deities present in the rays of the Sun.

सूर्यस्य रश्मयः–रश्मिषु स्थिताः देवाः, अधिवासः–अधिवसन्त्यत्रेत्यधिवासो मुख्याश्रयः । (R.K.)

[II-6] Expl. (1) आहुतयः–आहूयमानाः, स्वीकृतहविर्भागा इति यावत् । The deities present in sun-rays who receive the sacrificial offering are referred to as आहुतयः here पुण्यः–पुण्यसाध्यः, ब्रह्मलोकः–परब्रह्मलोकः । (R.K.)

[II-7] Expl. (1) So far it was explained that the sacrifices performed with dedication to the Supreme God will purify one's mind and assist the acquisition of the knowledge of the Supreme God. Here, it is stated that these very sacrifices, if performed without dedication to the Supreme God, will be ruinous and will lead to old age and death.

(2) एते भगवद्विषयत्वेन अनुष्ठिताः यज्ञरूपाः यज्ञवद्वभासमानाः इति यावत् । (R.K.)

(3) अष्टादशानां पुरुषाणामुक्तमष्टादशोक्तम् ।

The eighteen persons engaged in a sacrifice are : Sixteen priests, the sacrificer and an observer.

अष्टादशपुरुषास्तु षोडशर्त्विजः, यजमानः, तन्निरीक्षकः सभ्यः इति ध्येयम् । (R.K.)

[II-8] Expl. (1) वेष्टयमानाः–बध्यमानाः, अत्यन्तमविद्यातिरोहितज्ञानाः, स्वयंधीराः–स्वोत्प्रेक्षितप्रज्ञावन्तः, जङ्घन्यमानाः–वक्रगतयः । (R.K.)

[II-9] Expl. (1) रागात् कर्मिणः–स्वर्गादिक्षयिष्णुफले रागात् निमित्तात् कर्मिणः कर्मानुष्ठातारः । (R.K.)

(2) विष्णोः सर्वेभ्यः किञ्चिदुत्तमत्वं जानन्तः इमं लोकमाविशन्ति । साम्यं हीनत्वं वा जानन्तो हीनतरं तम एव विशन्ति । (R.K.)

देवेभ्य उत्तमं विष्णुं राजवद्यस्तु मन्यते ।
याजी स मानुषं याति साम्यहीनत्ववित् तमः ॥ (M.B.)

Those who understand Lord Viṣṇu to be slightly superior to other deities, will return to the human world; but those who consider him as only equal or even inferior, will suffer deep darkness.

[II-10] Expl. (1) इष्टापूर्तम्–इष्टं यजनं पूर्तमन्नदानादि, अन्यत् श्रेयः– भगवल्लक्षणं श्रेयः।

(2) ते–भगवतः किञ्चिदुत्तमत्वज्ञानपूर्वकं कर्मानुष्ठातारः,
ते–हरेः समत्वहीनत्वज्ञानपूर्वं कर्मकृतः । (R.K.)

Here two consequences are mentioned : 1. Returning to human world. 2. Entering into the lowest world. The term 'वा' suggests the alternate undergoing of these consequences. These alternates undergoing of these consequences. These alternates

cannot be for one and the same set of persons. Therefore, 'वा' has to be taken as व्यवस्थितविभाषा i.e., alternates fixed for two different sets of persons. These different sets are : 1. Those who consider the God as slightly superior to other deities. 2. Those who consider God as equal or inferior to others. In any case, none of these has fully realised the supreme nature of God and therefore considers the attainment of heaven etc., as the goal for performing sacrifices. They do not make it subordinate to the knowledge of Brahman or the Supreme God. Therefore, both face the consequence of returning to the human world or the lowest world as the case may be. वा शब्दः व्यवस्थितविकल्पार्थः । (R.K.)

[II-11] Expl. (1) Here, it is stated that those who perform the sacrifice etc., deeds in dedication to the supreme God will reach him in due course. कर्माचारादेः ब्रह्मज्ञानार्थत्वं फलोक्त्या उपसंहरति । (R.K.)

(2) तपः–श्रवणमननालोचनरूपम्, श्रद्धा–आस्तिक्यादिबुद्धिपूर्वकं यागादिकम्, शान्ताः–भगवन्निष्ठावन्तः, विद्वांसः–भगवज्ज्ञानिनः, विरजाः–विगतप्रारब्धकर्माणः, पुरुषः–पूर्णषड्गुणः

[II-12] Expl. (1) Here, it is stated that one should get detached from kāmyakarmas and seek a right teacher to get the knowledge of Brahman.

(2) परीक्ष्य–असारानित्यतया विचार्य, अकृतः–मोक्षः, कृतेन–कर्मणा, ब्रह्मनिष्ठम्–भगवद्भक्तम् ।

[II-13] Expl. (1) प्रशान्तचित्ताय–विषयेषु अलंबुद्धिमते, शमान्विताय–भगवन्निष्ठायुक्ताय, सत्यम्–अनन्याधीनस्वरूपम्, सः–अङ्गिराः, तस्मै–शौनकाय । (R.K.)

(2) कर्मदेवतादिबोधकतया शौनकेन अवगतां ऋगादिविद्यां परममुख्यवृत्तिमहातात्पर्याभ्यां ब्रह्मज्ञप्तिहेतुत्वेन परविद्या यथा भवति तथा व्याचख्यौ इति भावः । (R.K.)

तृतीयः खण्डः

[III-1] Expl. (1) Creation etc., glory of Akṣara the Supreme God is explained here. ऋगादिशास्त्रमुख्यार्थविश्वस्रष्टृत्वादिगुणविशिष्टो हरिरिति भावेनाह–तदेतदिति । (R.K.)

(2) तदेतत् सत्यम्–वक्ष्यमाणं प्रमेयं सत्यं न मिथ्येत्यर्थः ।

(3) विष्फुलिङ्गाः–अग्निकणाः, विविधाः–देवदानवभेदेन नानाविधाः भावाः, अपियन्ति–प्रलये तदुदरे लीयन्ते । (R.K.)

(4) अक्षरात् सम्भवतीह विश्वमिति प्रागुक्तस्य प्रपञ्चनम् । (R.K.)

[III-2] Expl. (1) Some attributes of Akṣara are explained here. दिव्यः–अत्यद्भुतः, अमूर्तः–नियतपरिच्छिन्नपरिमाणरहितः

(2) अप्राणः and अमनः indicate the absence of all sixteen kalās. अप्राणो हि अमना इति षोडशकलाराहित्यमुच्यते । (R.K.)

(3) In this verse अक्षर refers to जडप्रकृति, परतः refers to श्रीतत्त्व or चेतनप्रकृति and परतःपर refers to the Supreme God or उत्तमाक्षर.

अक्षरात्–जडप्रकृतेः, परतः–श्रीतत्त्वात्, परः–उत्तमः । (R.K.)

(4) The word Akṣara has three meanings :

अपरं त्वक्षरं या सा प्रकृतिर्जडरूपिका ।
अक्षरं परमं श्रीस्तु परतःपरमक्षरम् ॥
वासुदेवः परानन्दः इति त्रिविधमक्षरम् ॥ (M.B.)

Prakṛti, Lakṣmi and God–these three are called Akṣara. These are called अपराक्षर, पराक्षर and परात् पराक्षर or उत्तमाक्षर respectively.

[III-3] Expl. (1) एतस्मात्–परतः पराक्षरात्, प्राणः–मुख्यवायुः ।

(2) Here, by prāṇa etc., both jada and abhimāni deities are meant.

(i) अत्र जडतदभिमानिनामुभयेषां ग्रहणम् । (R.K.)

(ii) अत्र प्राणादिशब्दैः महदादितत्त्वानि तदभिमानिनो ब्रह्माद्याश्च विवक्षिताः । (V.T.)

(3) विश्वस्य धारिणी refers to the things in Brahmānda created after the creation of Prithvi etc., elements. विश्वस्य धारिणी इत्यनेन च पृथिव्यनन्तरं ब्रह्माण्डं तदन्तर्गतं च विश्वं क्रमेण जातमित्यवधेयम् । (V.T.)

[III-4] Expl. (1) Here अङ्गसृष्टि or the various deities and things arising from God's limbs is explained. Agñi etc., originate from his respective limbs. Agñi etc., are really the names of his limbs indicating his respective attributes. The deities Agñi etc., get these names because these arise from the limbs of the same names. Thus, the expressions Agñi etc., in this verse, indicate three points : (i) Agñi etc., are the names of the respective limbs of God. (ii) Agñi etc., convey certain attributes of God. (iii) Agñi etc., refer to the deities Agñi etc., born from the respective limbs. These also refer to the Jada entities concerned. अक्षरस्य भगवतः मूर्धा अग्निः अत्तृत्वनिमित्तेन अग्निनामा अग्निजनकश्च । अग्र्याख्यमूर्धजत्वात् अग्रेः अग्निनाम । एवमुत्तरत्रापि । (R.K.)

(2) विश्वमिति काचिद् देवता । हृदयं विश्वनामकं विश्वजनकं च । (R.K.) In हृदयं विश्वम्, विश्व refers to a deity.

(3) From the statement पद्भ्यां पृथिवी it is clear that pṛthvi is born from feet. Similar origination of others from the respective limbs is also intended to be conveyed. पद्भ्यां पृथिवीत्यन्ते श्रवणात् पूर्वत्रापि जन्यजनकभावेन अग्निमूर्धेत्यादिनिर्देश इति ज्ञायते । (R.K.)

[III-5] Expl. (1) The process of creation is further explained here.

(2) पुमान् refers to Lord Vāsudeva here and योषित् to goddess Ramā. The world which remains in the lord during pralaya is placed in Ramā by the lord at the commencement of creation.

पूर्णत्वेन हेतुना पुमान् नामा वासुदेवः योषितायां रमायां रेतः सिञ्चति । प्रलये स्वोदरे निवेशितं जगत् रेतोवत् रमायां निदधातीत्यर्थः । (R.K.)

वासुदेवः पुमान्नामा पूर्णत्वात् स स्वयोषिति ।
रमायां गर्भमदधात् प्रजास्तस्मात् प्रजज्ञिरे ॥ (M.B.)

[III-6] Expl. (1) ऋगादिशब्दैः तदभिमानिनोऽपि ग्राह्याः । (R.K.)

[III-7] Expl. (1) वयांसि–पक्षिणः, तपः–कृच्छ्रचान्द्रायणादि, श्रद्धा–आस्तिक्यबुद्धिः।

[III-8] Expl. (1) The Seven referred to here are sense organs, their functions etc. Therefore, the words of this verse have to be interpreted accordingly.

(2) सप्तप्राणाः–चक्षुःश्रोत्रत्वङ् मनोबुद्धिरूपाणि । सप्तेन्द्रियाणि सप्तर्चिषः–सप्तेन्द्रियवृत्तयः, समिधः–गन्धादिविषयाः, होमाः–इन्द्रियाणां विषयैः सम्बन्धाः, लोकाः–इन्द्रियगोलकाः, गुहाशयायाम्–गुहा हृदयम् आशयः स्थानं यस्याः तस्यां बुद्धौ । निमित्तसप्तमी । प्राणिनां ज्ञानोत्पत्त्यर्थम् । (R.K.)

(3) The content of this verse is referred to in the sūtra– 'सप्तगतेः विशेषितत्वाच्च' ।

[III-9] Expl. (1) The fact of God creating all and regulating all is explained further here.

(2) सर्वरूपाः–सर्वदिङ्मुखाः, अन्तरात्मा–अन्तर्यामी ।

इति तृतीयः खण्डः

चतुर्थः खण्डः

[IV-1] Expl. (1) In this verse it is pointed out that the attributes of Puruṣa are not different from him. His activities such as creation, his knowledge, his power and his splendour etc., attributes are not different from him.

(2) कर्म–सृष्टिक्रिया, तपः–ज्ञानम्, उपलक्षणमेतद् द्युतिबलादेरपि धर्मजातस्य। (R.K.)

(3) कर्मतपःप्रभृतीदं विश्वं–सर्वं धर्मजातं, परामृतं परामृताख्यो ब्रह्मशब्दितः पुरुष एव भगवानेव। न तु धर्मधर्मिणोः भेदो भगवति मन्तव्यः। (R.K)

(4) The Sūtra 'प्रतिषेधाच्च' (3-2-31) and the śruti passages 'एकमेवाद्वितीयम्' 'नेह नानास्ति किञ्चन' etc., deny the difference between God and his attributes. The relation between them is सविशेषाभेद.

(5) अविद्याग्रन्थिम्–प्रकृतिबन्धम्। (R.K.)

[IV-2] Expl. (1) Here the glory of Puruṣa is further explained.

(2) आविः–नित्याभिव्यक्तस्वरूपम्, पदम्–पद्यते प्राप्यते इति पदम्।

(3) एजत् प्राणत् निमिषत् stand for जाग्रत् स्वप्न सुषुप्त्यवस्थोपेतम्। In the three states of waking, dream and deep sleep the beings are entirely dependent upon God.

(4) सदसद्भ्याम्–मूर्तामूर्ताभ्यां, कार्यकारणभावाभ्यां, वरेण्यम्। विज्ञानात्–चतुर्मुखात् परम्। (R.K.)

[IV-3] Expl. (1) लोकिनः–लोकस्थाः जनाः तदभिमानिनो वा। (R.K.)

(2) प्राणः–प्रकर्षेण जगत् प्रेरयतीति प्राणः, वाक्–वक्ति समस्तवेदानिति, मनः–मनुते सर्वमिति मनः, सत्यम्–अपराधीनस्वभावम्। (R.K.)

The words prāṇa, vāk etc., convey the respective attributes of Puruṣa and therefore are his names. The identity between Puruṣa and prāṇa, vāk etc., in their ordinary sense is not intended here.

[IV-4] Expl. (1) The process of meditation is compared to the aiming of an arrow at an object. Here 'Om'kara is compared to a bow, mind is compared to an arrow and the knowledge of Akshara to the objective to be achieved.

(2) औपनिषदम्–उपनिषत्सम्बन्धि प्रणवाख्यं धनुः, शरम्–शरवत् स्थितं मनः, उपनिषदर्थभूतप्रणवार्थपर्यालोचनया मनसा ब्रह्म सावधानं जानीहीत्यर्थः । (R.K.)

आयम्य–समस्तवस्तुभ्यः नियम्य ।

[IV-5] Expl. (1) आत्मा-चेतः, वेद्धव्यम्-बोद्धव्यम् ।

[IV-6] Expl. (1) सर्वाधारत्व of God is explained here. This is explained under the sūtra– 'द्युभ्वाद्यायतनं स्वशब्दात्' । (I-3-5)

(2) प्राणैः चक्षुरादीन्द्रियैः । (R.K.)

[IV-7] Expl. (1) In this verse the seeker is advised to meditate on God as 'Om', that is to say as guṇapūrṇa and sarvaveda-pratipādya. Two important points relating to God are also mentioned here : (i) God moves in the body assuming the forms of viśva, taijasa and prājña during the waking, dream and deep sleep states respectively. (ii) God is superior to chetana prakriti and jadaprakritis.

(2) नाड्यः–ब्रह्मनाड्यादिप्रधाननाड्यः, द्वासप्ततिसहस्रशाखानाड्यश्च, सः–नाड्याश्रयहृदयस्थः विष्णुः, जायमानः–प्रादुर्भवन् सन्, अन्तः–नेत्राद्यन्तः, चरते–जागरादिप्रदानेन सर्वजीवनियमनार्थं सर्वदा चरति । (U.T.)

The word Nādi refers to Brahmanādi and other branch nādis which are seventy-two thousand in all. These are held together by God present in the body. God moves in the eye etc., places during the waking, dream and deep sleep states, assuming the forms of viśva, vaijasa, prājña forms respectively and provides these states to the soul. This is stated by बहुधा जायमानः.

(3) 'Om' indicates two points : (i) Guṇapūrṇa (ii) Sarvaveda-pratipādya. आत्मानं ॐ अशेषगुणपूर्णं मुख्यवृत्त्या ऋगादिशास्त्रवेद्यमित्येव ध्यायत । (R.K.)

(4) तमसः परस्तात् पराय–जडप्रकृतिपरश्रीतत्त्वात् परभूतपरमात्मज्ञानाय । In order to get the knowledge of paramātma who is superior to Śri

and jadaprakriti. तमस् refers to जडप्रकृति and तमसः परस्तात् to श्रीतत्त्व. God is पर superior to her also.

(5) तमसः परस्तात् पर is also interpreted as अप्राकृतविग्रह.

[IV-8] Expl. (1) In this verse it is stated that the God is present at the sky of heart in the body. ब्रह्मपुरे–देहे, व्योम्नि–देहस्थाकाशे, सर्ववित्–सर्वं विन्दतीति सर्ववित् प्राप्तसकलकामः । (R.K.)

[IV-9] Expl. (1) मनोमयः–ज्ञानप्रचुरः, पूर्णज्ञान इत्यर्थः । अन्ने–अन्नविकारे देहे । (R.K.)

(2) धीराः–श्रवणमननपूर्णाः, विज्ञानेन–स्वस्वयोग्यध्यानेन । (U.T.)

(3) हृदयस्थव्योम्नि जीवः तत्र बिम्बरूपो विष्णुः अस्तीत्यभिप्रायेण व्योम्न्यात्मा सम्प्रतिष्ठित इत्युक्तम् । (U.T.)

(4) Though God is अव्यक्त he reveals himself to aparokṣa jñānins. अव्यक्तैकस्वभावावमपि अचिन्त्याद्भुतशक्त्या विशेषेण भाति आविर्भवति । (R.K.)

[IV-10] Expl. (1) परा अपि ब्रह्मादयः अवराः यस्मात् सः परावरः तस्मिन् परावरे सर्वोत्तमे । (R.K.)

परा अप्यवरा यस्मात् स हि विष्णुः परावरः । (M.B.)

The God is called parāvara in the sense that even higher deities like Chaturmukha-brahmā etc., are inferior to him.

(2) (i) The knot of heart or हृदयग्रन्थि consists of avidyā and the bondage arising out of it. हृदयग्रन्थिः अविद्यातन्मूलरागद्वेषदुःखादिरूपो बन्धः भिद्यते अपयाति । (R.K.)

(ii) बन्धाश्च बहवः अविद्याबन्धः लिङ्गदेहबन्धः परमाच्छादकप्रकृतिबन्धः कामक्रोधादिबन्धः कर्मबन्धश्च । (U.T.)

(3) (i) कर्माणि सञ्चितागामीनि अप्रारब्धानि कर्माणि क्षीयन्ते । सञ्चितानां क्षयः नाशः, आगामिनामश्लेषः । (R.K.)

[IV-11] Expl. (1) In this verse the paramātma present in the sun is described.

(2) निष्कलम्–षोडशकलाविशिष्टशरीररहितम् । (U.T.)

(3) This verse is also interpreted as describing Simśumāra form of God that is to be seen by every liberated soul.

ब्रह्मसाक्षात्कारभोगाभ्यां सर्वकर्मक्षये सति ज्ञानिनः अर्चिरादिमार्गेण सान्तानिकलोकं प्रति गच्छन्ति । तदा मध्ये सर्वैरपि ज्ञानिभिः शिंशुमारं नमस्कृत्यैव उत्तरत्र गन्तव्यम् । 'तद् विश्वनाभिं तु अभिपद्ये'ति द्वितीयस्कन्धोक्तेः ।

अशेषजगदाधारः शिंशुमारो हरिःपरः ।
सर्वे ब्रह्मविदो नत्वा तं यान्ति परमं पदम् ॥ इति स्मृतेः ।

(4) हिरण्मये परे कोशे ब्रह्माण्डमध्ये विरजं दोषरहितं षोडशकलाविशिष्टशरीररहितं शिंशुमाराख्यं ब्रह्म वर्तते । तं पूर्वे आत्मविदः ब्रह्मापरोक्षज्ञानिनः विदुः । तस्मात् आधुनिका अपि विद्युः । एवं शिंशुमारश्रवणादिविधिपरत्वेन मन्त्रो व्याख्यातः । (U.T.)

(5) सूर्यान्तर्गतनारायणश्रवणादिकमपि कार्यमित्यर्थप्रतिपादकोऽयं मन्त्रः । (U.T.)

[IV-12] Expl. (1) The statement made in the previous verse, viz., God, is the light of lights, is explained here.

(2) Similar description is found in katha V-15 svetasva VI-14 and Gīta IX-15.

[IV-13] Expl. (1) In the previous verses the presence of Brahman at the heart and in the orb of the Sun is explained. Here his pervasiveness and infinite nature are brought out.

हृदयस्थत्वोक्त्या ब्रह्माण्डमध्यस्थत्वसूर्यमण्डलस्थत्वोक्त्या प्राप्तां परिच्छिन्नत्वशङ्कां निवारयन् देशतः कालतो गुणतश्च व्याप्तत्वात् ब्रह्मैव सर्वोत्तममित्येवं रूपं महामाहात्म्यमाह । (U.T.)

इति चतुर्थः खण्डः

when the soul is liberated. प्रागपि साम्यसत्त्वेपि अप्राप्तभोगप्राप्त्यभिप्रायेण परमित्युक्तिः । अभिव्यक्त्यपेक्षया वा । (R.K.)

[V-4] Expl. (1) In this verse the state of a knower who is a jīvanmukta, but still undergoing the effects of prārabdhakarma, is described.

(i) विद्वानिति प्रकृतजीवन्मुक्तस्य स्थितिप्रकारमाह । (R.K.)

(ii) प्रारब्धभोगकाले ज्ञानी स्वविहितकर्मादिकं करोतीत्याह । (U.T.)

(2) प्राणः–प्रकृष्टचेष्टको हरिः (R.K.) सर्वभूतैः–इन्द्रियाद्यभिमानि सर्वदेवैः (U.T.) अतिवादी–अहमेव कर्तेत्यतिवादयुक्तः, अत्मक्रीडः–आत्मना भगवता क्रीडते इति, आत्मरतिः–आत्मदर्शनजं सुखं प्राप्तः, क्रियावान्–भगवदाराधनैक-क्रियावान् (R.K.) ब्रह्मविदाम्–स्वावर ब्रह्मज्ञानिनाम् । (U.T.)

[V-5] Expl. (1) Meditation is the chief means for aparoksha-jñāna. But there are certain aids to it. These aids are mentioned in this verse. भगवदपरोक्षज्ञानाय ध्यानरूपं साधनमुक्तम् । तत्सहकारीण्याह सत्येनेति । (R.K.)

[V-6] Expl. (1) In this verse the fact that the liberated ones travel by devayāna or archirādimārga is stated.

(2) The word satya refers to God and his devotees. The word anrita refers to the asuras or evil forces.

(3) सत्यम्–सद्गुणत्वहेतुना सत्यमिति हरिरुच्यते । तन्निष्ठभक्त्यतिशयेन तस्मिन्नेव मग्नत्वहेतुना सत्यभक्तोऽपि सत्यपदेनात्र गृह्यते । तयाच सत्यं सत्याख्यभगवन्निष्ठं अधिकारिजीवजातमेव जयति । (R.K.)

अनृतम्–ऋताख्यहरिविरुद्धत्वहेतुना अनृतपदाभिधेयम् असुरजातं न जयति । (R.K.)

अनृतम्–ऋताख्यहरिविरुद्धत्वहेतुना अनृतपदाभिधेयम् असुरजातं न जयति । (R.K.)

सत्यो हि भगवान् विष्णुः सद्गुणत्वात् प्रकीर्तितः ।
असुराः तद्विरुद्धत्वादनृताः परिकीर्तिताः ॥ (M.B.)

(4) विततः–विस्तृतः, तदधीन इति यावत् । (R.K.) आप्तकामाः–आप्त-महाज्ञानाः । (U.T.)

[V-7] Expl. (1) Some important features of God are described here.

(2) बृहत्–देशकालगुणैः बृंहितम्, सूक्ष्मात्–प्रकृत्यादेः सूक्ष्मतरम् । (R.K.)

(3) Here बहिःप्रकाश, अन्तःप्रकाश, and व्याप्तदर्शन of God to different अधिकारिन्s are explained.

[V-8] Expl. (1) Here the eye, speech, etc., stand for the presiding deities of the respective senses. One will not get God's aparokṣajñāna by the grace of these deities; nor by the mere penance and good deeds. The God's grace and the grace of Vāyu are essential for aparokṣa jñāna.

(2) चक्षुषा–चक्षुरधिष्ठातृदेवताप्रसादेन, वाचा–वाग्देवताप्रसादेन, अन्यैः देवैः–इन्द्रियान्तरदेवैः । (R.K.)

(3) (i) ज्ञान in ज्ञानप्रसाद stands for God and also Vāyu. ज्ञानप्रसाद means God's grace and Vāyu's grace.

(ii) Since the grace of Chaturmukha-brahmā is also essential ज्ञानप्रसाद also refer to his grace.

(iii) ज्ञानरूपस्य हरेः प्रसादेन (R.K.) ज्ञानरूपस्य वायोः चतुर्मुखस्य वा प्रसादेन । (R.K.)

नान्यैः देवैः हरिं पश्येत् ज्ञानरूपेण वायुना ।
ब्रह्मणा परमज्ञानरूपेण हरिणा तथा ।
प्रसन्नेनैव तं पश्येदन्येऽनुज्ञाप्रदायिनः ॥ (M.B.)

(iv) मुख्यप्राणाधिष्ठाने विष्णोरभिव्यज्यमानत्वात् तत् प्रसादः अपेक्षितः । (U.T.)

ब्रह्मोपदेशेन मोक्षहेतुस्वबिम्बापरोक्षज्ञानं भवति । अतः तत्प्रसादोऽपिहेतुः । (U.T.)

[V-9] Expl. (1) The dependency of the mind and the senses on Mukhyaprāṇa who is dependent upon God is explained here.

(2) यस्मिन्–प्राणे मुख्यवायौ, यस्मिन् विशुद्धे–निष्कले हरौ, विभवति–विभवयुक्तो भवति। (R.K.)

(3) सर्वं चित्तम्–'मनोबुद्धिरहंकारश्चित्तं चेतनमेव च' इति पञ्चधा भिन्नम्। (U.T.)

(4) प्राणापानादिरूपो मुख्यप्राणः मुखनासिकादिस्थानस्थितोपि चेतसि प्रविश्य ब्रह्मापरोक्षज्ञानानुकूलशक्त्याधायको भवति। तद्बलाच्चेतो ब्रह्मापरोक्षज्ञानं जनयति। (U.T.)

[V-10] Expl. (1) The fulfillment of all desires of a liberated person and his importance are stressed here.

(2) विशुद्धसत्त्वः–आत्मवेदी, भूतिकामः–भाग्यकामः, आत्मज्ञम्–ज्ञानिनम्।

इति पञ्चमः खण्डः

षष्ठः खण्डः

[VI-1] Expl. (1) In this verse it is stated that those who know Mukhyaprāṇa as the abode of God and meditate upon God as present in him, will get his knowledge and attain him. Realising the presence of God in Mukhyaprāṇa and meditating upon him as such, especially, helps the seeker to get aparokṣajñāna of God.

प्रधानं धाम विष्णोस्तु प्राण एव प्रकीर्तितः।
उपायैर्यो विजानाति प्राणस्थं परमेश्वरम्॥
तस्य प्राणे हरिर्नित्यमाविष्टो भवति ध्रुवम्।
नित्यं प्राणे स्थितस्यैव विष्णोरावेश एव हि॥
प्राणद्वारेण यज्ज्ञानदीपनं ज्ञानिनः सदा॥ (M.B.)

(2) सः–आत्मज्ञार्चकः। This is a reference to one who worships आत्मज्ञानिन् mentioned in the last verse of the previous section.

(3) यत्र–यस्मिन् मुख्यवायौ, विश्वम्–पूर्णम् । (R.K.) ब्रह्मधाम–परब्रह्ममुख्याधिष्ठानगृहं मुख्यवायुम् । (R.K.)

(4) धीराः–मुख्यप्राणाधिष्ठाने ब्रह्मापरोक्षज्ञानिनः, अतिवर्तन्ति अन्यत् अविद्यादिकं अतिक्रम्य ब्रह्म प्रति वर्तन्ते । (U.T.)

[VI-2] Expl. (1) In this verse the difference between those who entertain worldly desires and those who are above it is explained. The aparokṣajñānins belong to the latter category.

(2) कामान्–विषयान् भद्रान् मन्यमानः । (R.K.)

(3) पर्याप्तकामस्य–पर्याप्तः मोक्षार्थं पर्याप्तः कामो भगवद्भक्त्यादिकामो यस्य सः, विषयकामनात्यागवतः । (U.T.)

(4) सर्वे कामाः–मोक्षप्रतिबन्धकीभूतकामाः, इहैव–अपरोक्षज्ञानजन्मन्येव । (U.T.)

[VI-3] Expl. (1) The importance of devotion and grace are explained here. अयं परमात्मा भक्तिहीनप्रवचनादिना न लभ्यः न साक्षात् कर्तुं शक्यः । अपि तु यं भक्तमेष आत्मा वृणुते स्वीकरोति यस्मै प्रसीदतीति यावत् । तेनैव प्रसादविषयेणैव लभ्यः । (R.K.)

(2) प्रवचनेन–सच्छास्त्रव्याख्यानेन, मेधया–धारणवत्या बुद्ध्या मननेन ध्यानेन चेति यावत्, वृणुते–भक्तत्वेन स्वीकरोति । (U.T.)

[VI-4] Expl. (1) बलहीनेन–श्रवणमननभक्त्यादिबलहीनेन, प्रमादात् भगवद्विस्मरणरूपात्, अलिङ्गात्–लिङ्गोपलक्षितप्रमाणानुक्तात् तपसः । (R.K.)

(2) ब्रह्मधाम–प्रागुक्तदिशा मुख्यवायुम् । (R.K.)

(3) विशते–तत्र तस्य आविर्भवति । (U.T.) मुख्यप्राणाधिष्ठाने स्वसाक्षात्कारं जनयति । (U.T.)

[VI-5] Expl. (1) सर्वतः देहादिबन्धात् विमुक्तात्मनः, सर्वमेव गुणपूर्णं भगवन्तम्, अपियन्ति–सर्वैः अज्ञेयतया प्रविशन्ति, प्रविश्य च अन्तर्बहिः सञ्चरन्तः भोगान् भुञ्जाना आसते । (R.K.)

[VI-6] Expl. (1) Among the liberated, those who belong to the group of pratikālambanas go to the world of Chaturmukha-brahmā by the devayāna pāth and remain there until the close of a hundred years of Chaturmukha-brahmā. Then only they get freed from prakṛti, linga-śarīra etc., bondage. This is stated here.

(2) वेदानामन्तः निर्णयः तज्जनितेन विज्ञानेन सुनिश्चितार्थाः, सन्यासयोगात्– सर्वकर्मणां समर्पणात्व्यसन्यासरूपयोगात् । (R.K.)

(3) परान्तकाले–परेति ब्रह्मणः शतायुषो नाम तस्य अन्तकाले । (R.K.) परान्तकाले–ब्राह्मवर्षशतस्यान्तकाले, वर्षशतस्य अष्टधा विभागे कृते योऽन्तिमो भागः सार्धद्वादशरूपः तस्मिन् काले इति यावत् । (U.T.)

(4) परामृतात्–प्रकृतिबन्धात् (R.K.) लिङ्गदेहाच्चेत्यपि ग्राह्यम् । (U.T.)

(5) ब्रह्मलोकेषु–सत्यलोकेषु, स्थानबाहुल्याद् बहुवचनम् । (R.K.)

(6) एतच्च प्रतीकेषु ब्रह्मध्यातृविषयम् । (R.K.)

[VI-7] Expl. (1) In this verse, it is stated that the presiding deities of the sixteen kalās who regulated jīva during transmigration also get liberated when jīva is liberated. The liberated jīva and these deities attain unity with the God. By unity, identity is not meant here, but being in the same place and having no discord in thought with the God is meant.

(2) कलाः–कलाभिमानिनः, प्रतिष्ठाः–संसारिणां नियामकाः, गताः–मुक्ताः, देवाः–कलादेवेभ्यो अन्ये देवाः, प्रतिदेवतासु–देवताप्रतिबिम्बभूतासु प्रजासु स्थिताः ।

(3) कर्माणि–कर्माभिमानी पुष्करः, विज्ञानमयः आत्मा–विज्ञानरूपो जीवः, एकीभवन्ति–एकस्थानस्थिता भवन्ति, तद्बुद्धिविषयीकृतार्थ- विषयकबुद्धिमन्तः भवन्ति । (R.K.)

(4) एकीभवन्ति does not mean identity or स्वरूपैक्य. The grammatical structure of this expression does not permit such a meaning. The suffix च्वि is used here in the sense of अभूततद्भाव, that is to say, something which was not before being brought into

existence. The जीवब्रह्मैक्य is not something that is to be brought about. It is always there according to Advaita. Therefore, this expression cannot be construed as conveying identity or स्वरूपैक्य between जीव and ब्रह्मन्. It only means स्थानैक्य and मत्यैक्य.

अविरोधश्च सादृश्यमेकदेशस्थितिः सदा ।
एकीभावः त्रिधा प्रोक्तः नैकीभावः स्वरूपयोः ॥
कुतोऽभूतस्य भवनं स्वरूपस्यैक्यमेव हि ।
एकीभावस्तु संश्लेषो विरोधस्य च वर्जनम् ॥
स्वरूपैक्यं कुतस्तेषां नित्यभिन्नस्वरूपिणाम् । (M.B.)

(5) एकीभवन्तीत्यत्र च्विप्रत्ययोऽस्ति । स प्रकृत्यर्थस्य अभूततद्भावमाचष्टे । न चात्र एकशब्दवाच्यं स्वरूपैक्यं प्रागभूतं पश्चाद् भवति । जीवब्रह्मैक्यस्य अनादिब्रह्मस्वरूपत्वेन प्रागपि विद्यमानत्वात् । (U.T.)

(6) Kalās are sixteen. However, one of the kalās, viz., karma is separately mentioned here and the others are mentioned as fifteen. This is intended to show that the presiding deity of Karma is inferior to others.

कलाभ्यश्चान्यदेवेभ्यः कर्म प्रत्यवरं यतः ।
कलाभ्यः पृथगुक्तं तत् पुष्करः कर्मचोच्यते ॥ (M.B.)

[VI-8] Expl. (1) In the previous verse it was stated that the liberated souls do not attain identity with God but only reach God's place. This is further explained here. The liberated souls are not observed by the unliberated. The liberated will not have prakṛta forms that could be observed by the unliberated. However, the liberated will not completely be without name and form. This is explained with the illustration of rivers joining the ocean without losing their individuality though it is not observed by ordinary people.

(2) नामरूपे–स्वकीये गङ्गादिनामरूपे, अविहाय–अत्यक्त्वा, अस्तम्–अदर्शनम्, विमुक्तः–अमुक्तः, विप्रियमित्यत्रेव विशब्दोऽत्र निषेधार्थः । (R.K.)

(3) The above interpretation is based on the reading अविहाय, and the word विमुक्त being taken in the sense of अमुक्त. But this verse can also be appropriately interpreted even by taking the reading as विहाय and the word विमुक्त being taken in the sense of वियुक्त. In this interpretation it means that the rivers and the liberated, though they have their names and forms, are described here as casting them away from the point of ordinary people as they are not able to observe the same. Thus, the main point or the purport, viz., the liberated do have name and form, is retained in both the interpretations.

(i) यद्वा साधारणचेतनैः अज्ञेयनामरूपत्वात् नामरूपे विहायेति वा । (R.K.)

(ii) यद्वा संसारिभिः अज्ञेयनामरूपत्वाद् विमुक्त–वियुक्त इव स्थितः । (R.K.)

[VI-9] Expl. (1) ब्रह्मैव भवति–ज्ञानानन्दादिस्वोचितगुणैः बृंहित एव भवति ।

This expression conveys that one who knows Brahman will attain greatness to the best of his capacity. It does not mean that he will attain identity with Brahman.

परं ब्रह्म विदित्वा तु बृंहितः स्यात् स्वयोग्यतः ।
नायोग्यं किञ्चिदाप्नोति कुत एव हरेर्गुणान् ।
ब्रह्मत्वं बृंहितत्वं स्यात् जीवानां न परात्मता ।
अस्वतन्त्रस्य जीवस्य कुतो नित्यस्वतन्त्रता ॥ (M.B.)

In this connection the following Śruti passages that clearly state the difference between the Jīva and Brahman even after liberation may be noted.

(i) अमृतस्यैष सेतुः । (ii) ब्रह्म तल्लक्ष्यमुच्यते ।

(iii) निरञ्जनः परमं साम्यमुपैति (iv) न ते महित्वमश्नुवन्ति

(v) सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा etc.

(2) गुहाग्रन्थिभ्यः–हृदयस्थाविद्याकामकर्मादिबन्धात् ।

[VI-10] Expl. (1) The qualifications of the persons to whom the knowledge of Brahman could be imparted is listed here.

(2) श्रोत्रियाः–छन्दोऽध्येतारः, एकऋषीन्–प्रधानर्षीन्, शिरोव्रतं नाम व्रतविशेषः । (R.K.)

(3) एकऋषीन्–प्रधानर्षीन्, ब्रह्मविद्यासम्प्रदायप्रवर्तकान् । (U.T.)

[VI-11] Expl. (1) एतत्–जगत्स्रष्टृत्वादिगुणयुक्तम्, सत्यम्–भगवन्तम् । (R.K.)

इति षष्ठः खण्डः

इति श्री पाण्डुरङ्गि तमणाचार्यसूनु कृष्णाचार्य विरचिता
आथर्वणोपनिषदः आङ्ग्लभाषा टिप्पणी समाप्ता

माण्डूक्योपनिषत्

This Upaniṣad belongs to Atharvaveda. Varuṇa who had assumed the form of a Manduka is the sage for this Upaniṣad. God in his four forms of Viśva, Taijasa, Prājña and Turīya is the deity for this Upaniṣad. This Upaniṣad consists of both prose and verses. There are four sections. In each section, the doctrines to be stated are first stated in prose and then elaborated in verses. These verses are known as Brahmadṛṣta verses, i.e., verses revealed to Chaturmukha-brahmā.

These Brahmadṛṣta verses are considered as a part of Gaudapāda kārikā in Advaita tradition. However, Dvaita tradition treats them as part of Māndukya Upaniṣad itself.

The central theme of this Upaniṣad is to give an exposition of the significance of 'Om'kāra. It is brought out here that the entire 'Om'kāra conveys Akṣara, i.e., Brahman, while the syllable a, u, m and nāda of 'Om'kāra convey Viśva, Taijasa, Prājña and Turīya forms of Brahman.

The process and the purpose of creation is also explained in this Upaniṣad.

प्रथमः खण्डः

SIGNIFICANCE OF 'OM'

ॐइत्येतदक्षरमिदं सर्वम् ।
तस्योपव्याख्यानं भूतं भवद् भविष्यदिति ॥ १ ॥

This Brahman which is designated as 'Om' is Akṣara. This is sarva, i.e., guṇapūrṇa. The explanation of Akṣara is, it is the same in the past, present, and future.

सर्वमोङ्कार एव यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव ।
सर्वं हि एतद् ब्रह्म । अयमात्मा ब्रह्म ॥ २ ॥

The Akṣara i.e., God designated as 'Om' alone is guṇapūrṇa. The other one, i.e., Chit-prakṛti or Sritatva is trikālātīta by the grace of God designated as 'Om'. Brahman who is designated as Akṣara and 'Om', alone is guṇapūrṇa. This is well-known in the śruti. The God who is designated as Ātman is same as Brahman.

THE FOUR FORMS OF GOD

सोऽयमात्मा चतुष्पात् । जागरितस्थानो बहिःप्रज्ञः सप्ताङ्गः एकोनविंशतिमुखः स्थूलभुग् वैश्वानरः प्रथमः पादः ॥ ३ ॥

This Ātman has four forms. The first form is Vaiśvānara. He resides in the eye through which one functions during the waking state. He enables to comprehend the outside objects. He has seven limbs and nineteen faces. He enjoys the gross objects.

स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्गः एकोनविंशतिमुखः ।
प्रविविक्तभुक् तैजसो द्वितीयः पादः ॥ ४ ॥

The second form is Taijasa. He resides in the neck, the place where the jīva sees the dreams. He sees and also shows to jīva the dream objects. He has seven limbs and nineteen faces. He enjoys the objects different from the waking state objects.

यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति । तत्सुषुप्तं सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो हि आनन्दभुक् चेतोमुखः प्राज्ञः तृतीयः पादः ॥ ५ ॥

The third form is Prājña. He resides in hṛtkarṇikā, the place where jīva remains with the God during deep sleep. Being in this place, the jīva does not desire anything and does not see even dreams.

This Prājña attains oneness with the other two forms, enables jīva to comprehend jīva's svarūpa, ajñāna and kāla, he enjoys

bliss and enables jīva also to enjoy bliss, he is of the nature of infinite bliss and infinite knowledge.

एष सर्वेश्वरः एष सर्वज्ञः एषोऽन्तर्यामी ।
एष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥ ६ ॥

This Ātman of four forms is the lord of all. He is omniscient, he is the regulator from within, he is the source of all and all beings arise and return back to him.

HYMNS REVEALED TO CHATURMUKHA-BRAHMA

अत्रैते श्लोका भवन्ति ।

बहिःप्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः ।
घनप्रज्ञः तथा प्राज्ञः एक एव त्रिधा स्थितः ॥ ७ ॥

दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजसः ।
आकाशे च हृदि प्राज्ञः त्रिधा देहे व्यवस्थितः ॥ ८ ॥

विश्वो हि स्थूलभुङ् नित्यं तैजसः प्रविविक्तभुक् ।
आनन्दभुक् तथा प्राज्ञः त्रिधा भोगं निबोधत ॥ ९ ॥

Viśva reveals outside objects, Taijasa shows the dream objects within, Prājña enables to comprehend jīvasvarūpa etc., during the deep sleep state. One and the same God assumes three forms.

Viśva is in the right eye, Taijasa in the manas, Prājña is at the hṛtkarṇikā ākāśa. Thus, these are present in three ways in the body.

Viśva enjoys outside objects, Taijasa enjoys the dream objects that are distinct from the outside object, and Prājña enjoys the bliss. Thus, these enjoy in three ways.

स्थूलं तर्पयतो विश्वं प्रविविक्तं तु तैजसम् ।
आनन्दं च तथा प्राज्ञं त्रिधा तृप्तिं विजानथ ॥ १० ॥

त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्तितः ।
वेदैतदुभयं यस्तु स भुञ्जानो न लिप्यते ॥ ११ ॥

प्रभवः सर्वभावानां सतामिति विनिश्चयः ।
सर्वं जनयति प्राणः चेतोंशून् पुरुषः पृथक् ॥ १२ ॥

The gross objects delight Viśva, the dream objects that are distinct from outside objects delight Taijasa, the bliss delights Prājña.

He who knows the enjoyer and the objects enjoyed in the three places will not be affected by his enjoyment of objects.

The Ātman of four forms is the creator of all. This is the firm conclusion of the right-minded persons. Prāṇa, i.e., the creator of all, creates all.

Puruṣa, i.e., Pūrṇaṣaḍguṇa creates jīvas containing the rays of knowledge, in many ways.

THE PROCESS AND THE PURPOSE OF CREATION

विभूतिं प्रसवं त्वन्ये मन्यन्ते सृष्टिचिन्तकाः ।
स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता ॥ १३ ॥

इच्छामात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिताः ।
कालात् प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः ॥ १४ ॥

भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे ।
देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा ॥ १५ ॥

Some among those who have thought about creation is the modification of Brahman in many forms like jīva, jada etc. Others have imagined the creation to be the projection like the dream objects and magical creation.

Those who have firm knowledge in respect of creation, hold that the creation is due to the lord's will only. Those who think of the time, think that all beings are born of time.

Some think that the creation is intended for the enjoyment of God. Others think that it is for his sport. However, it is the very nature of the God to create. He whose all desires are fulfilled cannot have any desire to be satisfied.

इति प्रथमः खण्डः

द्वितीयः खण्डः

TURIYA AND THE OTHER THREE FORMS CONTRASTED

नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञमदृष्टम् अव्यवहार्यमलक्षणमचिन्त्यमव्यपदेश्यमैकात्म्यप्रत्ययसारं प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते । स आत्मा स विज्ञेयः ॥ १ ॥

He does not reveal dream objects, does not reveal outside objects, does not reveal both together, does not reveal jīva-svarūpa etc., during deep sleep state, does not reveal the object of meditation.

However, he is not such who does not give any knowledge at all (as he gives knowledge to the liberated). He is not seen, he is not describable, not definable, unthinkable, unnamable.

He is supreme, full of attributes, of the nature of knowledge and bliss. He removes the bondage. He is auspicious, he removes the erroneous knowledge. He is the fourth form of Paramātmā. He should be understood in all his four forms.

अत्रैते श्लोका भवन्ति ।

निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः ।

अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः ॥ २ ॥

There are these verses :

The Turīya is the remover of all miseries, he is the regulator of the liberated, the lord of all, imperishable, remover of erroneous knowledge, powerful and the goal of all beings.

कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ ।
प्राज्ञः कारणबद्धस्तु द्वौ तु तुर्ये न सिद्ध्यतः ॥ ३ ॥

The Viśva and Taijasa superintend the cause i.e., avidyā and its effects i.e., the erroneous experiences in waking and dream states of Jīva. Prājña superintends only the cause, i.e., avidyā. However, Turīya does not superintend either the cause or the effect.

PRĀJÑA AND TURĪYA CONTRASTED

नात्मानं न परांश्चैव न सत्यं नापि चानृतम् ।
प्राज्ञः किञ्चन संवेत्ति तुर्यं तत् सर्वदृक् सदा ॥ ४ ॥

Prājña does not reveal himself to jīva, nor other things, other than jīvasvarūpa sukha, ajñāna and kāla. He does not reveal the truth or falsehood. However, Turīya reveals every thing that a liberated jīva is entitled to see.

द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः ।
बीजनिद्रायुतः प्राज्ञः सा च तुर्ये न विद्यते ॥ ५ ॥

Both Prājña and Turīya do not cause the erroneous knowledge i.e., 'I' and 'mine'. However, the avidyā is present when prājña superintends, while the avidyā is removed, when Turīya superintends.

स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया ।
न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः ॥ ६ ॥

Those who have right knowledge know that Viśva and Taijasa regulate the avidyā and the waking and dream states. Prājña

regulates the avidyā in deep sleep state, and Turīya does not cause either the waking state experiences etc., or avidyā.

REALISATION OF TURĪYA

अन्यथा गृह्णतः स्वप्नो निद्रा तत्त्वमजानतः ।
विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते ॥ ७ ॥

He who has erroneous knowledge undergoes a series of erroneous experiences during the states of waking, dream etc. One who does not know the truth, i.e., supremacy of God, continues to be affected by avidyā. When the rotation of avidyā and the erroneous experiences is removed, one attains Turīya, i.e., the Supreme God.

अनादिमायया सुप्तो यदा जीवः प्रबुद्ध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुद्ध्यते तदा ॥ ८ ॥

The jīva who is enveloped with the avidyā by the will of God, gets out of it by the grace of God. Then, he realises the Turīya form of God who is unborn, who does not cause dream etc., states, and who removes the erroneous knowledge.

THE FIVEFOLD DIFFERENCES ARE REAL

प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं सर्वमद्वैतं परमार्थतः ॥ ९ ॥

First Interpretation

(1) The erroneous knowledge of 'I' and 'Mine' is the bondage. This can certainly be got rid of by the grace of God.

This erroneous knowledge of 'I' and 'mine' is due to the will of God. God is designated as Advaita as he removes the erroneous knowledge. Truly known by the sages is Advaita.

Second Interpretation

(2) The fivefold differences would have vanished if these were created. (These do not vanish and therefore, these are not created. These are beginningless). These fivefold differences are cognised and guarded by God. (Therefore, these are not mere projections) God alone is supreme.

विकल्पो विनिवर्तेत कल्पितो यदि केनचित् ।
उपदेशादयं वादोऽज्ञाते द्वैतं न विद्यते ॥ १० ॥

First Interpretation

The manifold bondage in terms of 'I' and 'mine' caused by ajñāna could be removed by proper instructions. When the Supreme God is known, then, no erroneous knowledge remains.

Second Interpretation

The five-fold differences would have been withdrawn if these were merely projected by some agency i.e., ajñāna. It is only the ignorant who fail to understand the difference. One has to understand the truth through proper instructions.

इति द्वितीयः खण्डः

तृतीयः खण्डः

THE SYLLABLES OF 'OM' i.e., A,U, M CONVEY VIŚVA, TAIJASA AND PRĀJÑA

सोऽयमात्माध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा अकार उकारो मकार इति । जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्रा । आप्तेरादिमत्त्वाद्वा । आप्नोति ह वै सर्वान् कामानादिश्च भवति । य एवं वेद ॥ १ ॥

The Paramātma who is designated as 'Om' is supreme and imperishable. He has four full forms. His forms are conveyed by a,

u, m and nāda. The first form i.e., Vaiśvānara who superintends the waking state is conveyed by a. This is because, he provides the enjoyments of objects to jīvas and he comes first.

He who knows him i.e., Viśva, as the provider of the enjoyment of the objects, and as coming first, will be led to liberation by Viśva.

स्वप्नस्थानः उकारो द्वितीया मात्रा । उत्कर्षादुभयत्वाद्वा । उत्कर्षति ह वै ज्ञानसन्ततिं समानश्च भवति । नास्याब्रह्मवित् कुले भवति ॥ २ ॥

The second form of Paramātma i.e., Taijasa who superintends the dream state is conveyed by u. This is because he draws the jīva into dream state taking him out of waking state, and also because, he provides the two, viz., the slumber of the nature of absence of the experience of outside objects, and gives the experience of dream objects.

He who knows Taijasa in this way, will get permanent knowledge, will draw himself out of the bondage and joins the liberated. In his progeny none who does not know Brahman will be born.

सुषुप्तस्थानः प्राज्ञो मकारः तृतीया मात्रा । मितेरपीतेर्वा । मिनोति ह वा इदं सर्वमपीतिश्च भवति । य एवं वेद ॥ ३ ॥

The third form of Paramātma i.e., prājña who superintends the deep sleep state is conveyed by m. This is because he takes jīva unto him during deep sleep state and eliminates vṛttijñāna i.e., experiences of the waking and dream states.

He who knows prājña in this way will know the world as per his capacity and get rid of his miseries.

विभस्यात्वविवक्षायामादिसामान्यमुत्कटम् ।
मात्रा सम्प्रतिपत्तौ स्यादाप्तिसामान्यमेव च ॥ ४ ॥

When one meditates upon Viśva form of paramātmā as conveyed by a syllable of 'Om' realising his ādimatva, then, he will attain ādimatva.

When he meditates upon him realising his āptimatva he will attain āptimatva.

तैजसस्योत्वविज्ञाने उत्कर्षो दृश्यते स्फुटम् ।
मात्रा सम्प्रतिपत्तौ स्यादुभयत्वं तथाविधम् ॥ ५ ॥

When one meditates upon Taijasa form of paramātma as conveyed by u syllable of 'Om' realising his Utkarṣa, then he attains Utkarṣa.

When he meditates upon him realising his Ubhayatva, then he will attain Ubhayatva.

मकारभावे प्राज्ञस्य मानसामान्यमुत्कटम् ।
मात्रासम्प्रतिपत्तौ तु लयसामान्यमेव च ॥ ६ ॥

When the fact of Prājña being conveyed by m syllable for 'Om' is understood, then, one attains the knowledge to the best of his capacity.

When one meditates upon him as conveyed by m realising that he eliminates the experiences of waking and dream states, he will get rid of his miseries.

त्रिषु धामसु यत्तुल्यं सामान्यं वेत्ति निश्चितम् ।
स पूज्यः सर्वभावानां वन्द्यश्चैव महामुनिः ॥ ७ ॥

He who knows that by the meditation of these three forms of Paramātma one will attain similarity with Viśva etc., in respect of ātmatva etc., is respected by all and is considered as a great sage.

अकारो नयते विश्वमुकारश्चापि तैजसम् ।
मकारश्च पुनः प्राज्ञं नामात्रे विद्यतेऽगतिरिति ॥ ८ ॥

Viśva conveyed by a syllable leads the meditator to Viśva, Taijasa conveyed by u syllable leads to Taijasa, and Prājña conveyed by m syllable leads to Prājña. The meditator certainly reaches the Turīya who is not conveyed by any particular syllable.

इति तृतीयः खण्डः

चतुर्थः खण्डः

TURĪYA IS CONVEYED BY NĀDA

अमात्रः चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैतः ।
ॐकार आत्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेद ॥ १ ॥

The Turīya i.e., the fourth form, who is not conveyed by any particular syllable, who is not describable, who removes the bondage, who is auspicious, who removes erroneous knowledge, is conveyed by the nāda aspect of 'Om'.

One who knows him in this way, casting away the attachment of 'I' and 'mine' attains Turīya paramātma with his grace.

अत्रैते श्लोका भवन्ति ।

ॐकारं पादशो विद्यात् पादा मात्रा न संशयः ।
ॐकारं पादशो ज्ञात्वा न किञ्चिदपि चिन्तयेत् ॥ २ ॥

The Paramātma conveyed by 'Om' should be known as having Viśva etc., four forms. These forms are conveyed by the syllables of 'Om'. Having known the paramātma in his four forms nothing else needs to be known.

SIGNIFICANCE OF PRAṆAVA

युञ्जति प्रणवे चेतः प्रणवो ब्रह्म निर्भयम् ।
प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् ॥ ३ ॥

प्रणवो हि अपरं ब्रह्म प्रणवश्च परं स्मृतः ।
अपूर्वोऽनन्तरोऽबाह्योऽनपरः प्रणवोऽव्ययः ॥ ४ ॥

सर्वस्य प्रणवो हि आदिः मध्यमन्तस्तथैव च ।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम् ॥ ५ ॥ .

One should fix his mind on the God conveyed by praṇava i.e., 'Om'. He is also called praṇava because he causes jagṛt etc., states. He is guṇapūrṇa, he is fearless.

He who fixes his mind on God conveyed by 'Om' shall have no fear from any quarter.

The previous incarnations of God such as Vāsudeva etc., are guṇapūrṇa, the later incarnations of God such as Viśva, Taijasa etc., are guṇapūrṇa.

God has no beginning, no end, he is everywhere, he is independent and changeless.

He is the cause of all, he is the sustainer and destroyer. One who knows the God conveyed by 'Om' in this way will attain him after he completes his prārabdhakarmabhoga.

प्रणवं हि ईश्वरं विद्यात् सर्वस्य हृदये स्थितम् ।
सर्वव्यापिनमोङ्कारं मत्वा धीरो न शोचति ॥ ६ ॥

अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः ।
ॐकारो विदितो येन स मुनिर्नेतरो जनः ॥
स मुनिर्नेतरो जन इति ॥ ७ ॥

The wise who know the God conveyed by 'Om' as the regulator of all, present at the heart of all, and all-pervasive will get rid of their misery.

God has many incarnations. His incarnations are not different from him. He removes erroneous knowledge, he is auspicious One who knows him as conveyed by 'Om' in this way, is the knower, none else is the knower, none else is the knower.

इति श्री माण्डूक्योपनिषदः आङ्ग्लभाषानुवादः पाण्डुरङ्गि तमणाचार्यसूनु कृष्णाचार्य विरचितः समाप्तः

NOTES AND EXPLANATION

प्रथमः खण्डः

[I-1] Expl. (1) Here some important features of Brahman are stated. Brahman or God is designated as Om, he is Akṣara and he is sarva.

(2) (i) 'Om' means he on whom the entire world is located ओतमस्मिन् जगदितिव्युत्पत्त्या ओमित्युक्तम् । (R.K.)

(ii) Akṣara means he who is the same in the past, present, and future. न क्षरति कालत्रयेऽपीति व्युत्पत्त्या कालत्रयेऽपि एकप्रकारतया विद्यमानम्, शश्वदेकप्रकारमिति यावत् । (R.K.)

(iii) Sarva means he who possesses infinite number of attributes. सर्वम्–गुणपूर्णम् । (R.K.)

(3) In this Upaniṣad meditation with 'Om' realising its significance as a whole and also of its syllables a, u, m and nāda is explained. समस्तव्यस्तप्रणवप्रतिपाद्यभगवदुपासनां वक्तुं प्रवृत्तेयमुपनिषत् । (R.K.)

In the first two passages the significance of the entire 'Om' is explained. आदौ समस्तप्रणवप्रतिपाद्यं तावदाह । (R.K.)

[I-2] Expl. (1) Here it is pointed out that God is both guṇapūrṇa and trikālātīta, while Śrītatva is only trikālātīta. This fact of Śrītatva being trikālātīta is also due to the grace of God. It is further pointed out that the fact of God alone being guṇapūrṇa is point viz., both the words Ātman and Brahman refer to God bringing out his Vyāptatva and guṇapūrṇatva is stated in this verse.

In Upaniṣads both Ātman and Brahman refer to God. Only in a few instances the word Ātman is used to refer to jīva. Whenever these two expressions are used to refer to God these bring out his two aspects, viz., vyāptatva and guṇapūrṇatva. Ātman also refers to Swāmitva, ādānakartṛtva etc., Nowhere in Upaniṣads the identity between Jīva and Brahman is intended when these

Manomaya i.e., Saṁkarṣaṇa present in Manomayakośa and designated as Manomaya is different from Prāṇamaya and is present within him. He is all pervasive. Prāṇamaya i.e., Pradyumna is filled with Manomaya i.e., Saṁkarṣaṇa. He is of the form of a Puruṣa. Following him Prāṇamaya is also of the form of a Puruṣa. Yajus is his head, Rik is his right arm, Sāma is his left arm, Ādeśa i.e., Pañcarātra is the central part of his body, Atharvāṅgiras his feet.

उप—तदप्येषः श्लोको भवति ।
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचनेति ॥
तस्यैष एव शारीर आत्मा ।
यः पूर्वस्य ॥ २-९ ॥

He who knows Brahman, who possesses infinite bliss attains liberation which is a fearless state. The Brahman cannot be fully understood by words, he cannot be fully comprehended by mind. The words return from him along with the mind.

VIJÑĀNAMAYA FORM OF THE SUPREME GOD

उप—तस्माद्वा एतस्मान्मनोमयात् । अन्योऽन्तर आत्मा विज्ञानमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य श्रद्धैव शिरः । ऋतं दक्षिणः पक्षः । सत्यमुत्तरः पक्षः । योग आत्मा । महः पुच्छं प्रतिष्ठा ॥ २-१० ॥

Vijñānamaya i.e., Vāsudeva present in Vijñānamayakośa and designated as Vijñānamaya is different from Manomaya and is within Manomaya. He is all pervasive. Manomaya is filled with him. He is of the form of Puruṣa. Following him Vijñānamaya is of the form of Puruṣa. Śraddhā is his head, Rita is his right arm, Satya is his left arm, Yoga is the central part of his body, Mahah is feet.

उप—तदप्येष श्लोको भवति ।
विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि च ।
विज्ञानं देवाः सर्वे ब्रह्मज्येष्ठमुपासते ॥
विज्ञानं ब्रह्म चेद् वेद तस्माच्चेन्न प्रमाद्यति ।
शरीरे पाप्मनो हित्वा सर्वान् कामान्त्समश्नुते ॥ इति ॥
तस्यैष एव शारीर आत्मा । यः पूर्वस्य ॥ २-११ ॥

Vijñāna i.e., Vāsudeva present in Vijñānamayakośa and designated as Vijñānamaya enables the Yajamāna and other priests to perform the sacrifices and rituals being present in them. All gods meditate upon Vijñānamaya i.e., Vāsudeva as Brahman i.e., Guṇapūrṇa. He who knows Vijñānamaya i.e., Vāsudeva as Guṇapūrṇa and does not forget him, gets rid of all his sins and obtains liberation.

Vijñānamaya is the Ātmā of the earlier i.e., Manomaya who is like his body.

ĀNANDAMAYA FORM OF THE SUPREME GOD

उप–तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योन्तर आत्मानन्दमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा ।

Ānandamaya i.e., Nārāyaṇa present in Ānandamayakośa and designated as Ānandamaya is different from Vijñānamaya and within him. He is all pervasive. Vijñānamaya is filled with Ānandamaya. Ānandamaya is of the form of a Puruṣa. Following him Vijñānamaya is also of the form of a Puruṣa. Priya i.e., the joy obtained by receiving help is his head i.e., Moda, the joy obtained from the objects is his right arm, Pramoda i.e., the joy obtained from superior objects is his left arm, Ānanda i.e., Svarūpānanda is the central part of his body. Brahma i.e., Vāyu is his feet.

उप–तदप्येष श्लोको भवति ।

असन्नेव स भवति । असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद । सन्तमेनं ततो विदुरिति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य ॥ २-१२ ॥

About this it is sung as follows : He who thinks that there is no Brahman apart from Jīva will suffer. He who knows that there is Brahman as distinct from Jīva, he is declared to be eligible for eternal happiness.

THREE QUESTIONS ASKED BY VARUṆA

उप–अथातोनुप्रश्नाः । उताविद्वानमुं लोकं प्रेत्य । कश्चन गच्छती ३ । आहो विद्वानमुं लोकं प्रेत्य । कश्चित् समश्नुता ३ उ ॥ २-१३ ॥

Now the questions that are helpful to know the doctrine : Does the ignorant also obtain the God reaching the other world after death or is it only the wise who obtains the God reaching the other world after the death ? Do all those who have knowledge obtain the God or only some of them? Do all those who obtain the God derive the highest bliss or only some?

Yes, only some i.e., those who are eligible for the position of Chaturmukhabrahmā obtain highest bliss. (The other Jñānins realise the bliss as per their capacity. The ignorant do not go to the other world nor obtain the God).

GOD'S CREATION AND HIS ASSUMING MANY FORMS

उप–सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । स इदं सर्वमसृजत । यदिदं किञ्च । तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभवत् । निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च । विज्ञानं चाविज्ञानं च । सत्यं चानृतं च सत्यमभवत् । यदिदं किञ्च । तत्सत्यमित्याचक्षते ॥ २-१४ ॥

The Supreme God desired to create the world and also assume manifold forms to regulate the same. He thought about it. Then, he took it out from his belly. Then, he himself entered into it. He became sat, tyat, nirukta, anirukta, nilayana, anilayana,

vijñāna, avijñāna, satya, anrita, satya and all that is in this world. But still he continues to be satya. (All these technical terms are explained below).

उप–तदप्येषः श्लोको भवति–

असद्वा इदमग्र आसीत् । ततो वै सदजायत । तदात्मानं स्वयमकुरुत । तस्मात् तत् सुकृतमुच्यत इति । यद्वै तत् सुकृतं रसो वै सः । रसं ह्येवायं लब्ध्वानन्दीभवति । को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयाति ॥ २-१५ ॥

Before the commencement of creation there was Asat i.e., he who is beyond reach i.e., Nārāyaṇa. From him Sat i.e., he who can be approached i.e., Vāsudeva was revealed. He revealed himself in many forms such as Saṁkarṣaṇa, Pradyumna etc. He is called Sukrita as he assumed these forms. This Sukrita i.e., Vāsudeva is of the form of infinite bliss. He who knows him as possessing infinite bliss shall obtain bliss.

If he were not blissful, who else would have to motivate activity and generate activity ? It is he who delights all.

ALL FORMS OF THE SUPREME GOD ARE IDENTICAL

उप–यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति । तत्त्वेव भयं विदुषोऽमन्वानस्य ।

तदप्येषः श्लोको भवति–

भीषास्माद्वातः पवते भीषोदेति सूर्यः ।
भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम इति ॥ २-१६ ॥

He, who knows the Supreme God who cannot be fully comprehended, who has no drawbacks which Jīvas have, who has

no Lord over him, whose nature cannot be fully described, who needs no other support, will attain the Supreme God meditating upon him firmly.

But he, who thinks of difference among various forms of the Supreme God as in the case of different Jīvas will tremble. The Supreme God causes fear both to the knower and the ignorant. About this it is sung as follows : It is out of the fear of God that the wind blows, the sun arises, the fire burns, Indra functions and Yama discharges his duty.

HIERARCHY OF BLISS OF THE LIBERATED

उप—सैषाऽऽनन्दस्य मीमांसा भवति । युवा स्यात् साधुयुवाऽध्यायकः । आशिष्ठो दृढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वावित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः । ते ये शतं मानुषा आनन्दाः । स एको मनुष्यगन्धर्वाणामानन्दः ॥ २-१७ ॥

Now commences the exposition of hierarchy in respect of the bliss enjoyed by the liberated. The bliss that is enjoyed by a liberated Chakravarti king who had enjoyed before the liberation the entire earth full of wealth is one unit of Mānuṣa Ānanda i.e., the bliss enjoyed by liberated Manuṣya Chakravartin. This liberated Chakravarti is Sādhu yuvā i.e., moves with the Supreme God Viṣṇu, has the benefit of his study of Vedas, enjoys bliss to his full capacity, does not undergo any change, has a natural strength of the mind.

Hundred units of the liberated Mānuṣa bliss constitute one unit of liberated Manuṣya Gandharva bliss who are not haunted by ordinary desire and who have obtained the benefit of their knowledge.

उप—श्रोत्रियस्य चाकामहतस्य । ते ये शतं मनुष्यगन्धार्वाणामानन्दाः । स एको देवगन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं

देवगन्धर्वाणामानन्दाः । स एकः पितृणां चिरलोकलोकानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं पितृणां चिरलोकलोकानामानन्दाः । स एक आजानजानां देवानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतमाजानजानां देवानामानन्दाः । स एकः कर्मदेवानामानन्दः ॥२-१८॥

ये कर्मणा देवानपियन्ति । श्रोत्रियस्य चाकामहतस्य । ते ये शतं कर्मदेवानामानन्दाः । स एको देवानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवानामानन्दाः । स एक इन्द्रस्यानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतमिन्द्रस्यानन्दाः । स एको बृहस्पतेरानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं बृहस्पतेरानन्दाः ॥ २-१९ ॥

स एकः प्रजापतेरानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं प्रजापतेरानन्दाः । स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्य ॥ २-२० ॥

Hundred units of the liberated Manuṣya Gandharva bliss constitute one unit of the bliss of Devagandharvas who have obtained the benefit of the study of Śruti and are not haunted by the ordinary worldly desires.

Hundred units of the liberated Devagandharva bliss constitute one unit of the bliss of manes who lived earlier in Chiralokas, who have obtained the benefit of their study of Śruti and who are not haunted by the ordinary worldly desires.

Hundred units of the liberated manes bliss constitute one unit of the bliss of the liberated Ājānadevas who have obtained the benefit of the study of Śruti and are not haunted by the ordinary worldly desires.

Hundred units of the bliss of liberated Ājānadevas constitute one unit of the bliss of the liberated Karmadevas who attained the position of Devas by their deeds, who have the benefit of the study of Śruti and are not haunted by ordinary worldly desires.

Hundred units of the bliss of the liberated Karmadevas constitute one unit of the bliss of the liberated Devas who have the benefit of the study of Śruti and are not haunted by the ordinary worldly desires.

Hundred units of the bliss of the liberated Devas constitute one unit of the bliss of liberated Indra i.e., Dakṣaprajāpati who has the benefit of the study of Śruti and is not haunted by the ordinary worldly desire.

Hundred units of the bliss of the liberated Indra i.e., Dakṣaprajāpati constitute one unit of the bliss of liberated Bṛhaspati i.e., Purandara who has the benefit of the study of Śruti and who is not haunted by the ordinary worldly desires.

Hundred units of the bliss of the liberated Bṛhaspati constitute one unit of liberated Prajāpati i.e., Rudra who has the benefit of the study of Śruti and who is not haunted by ordinary worldly desires.

Hundred units of the bliss of the liberated Prajāpati i.e., Rudra constitute one unit of the bliss of liberated Brahmā i.e., Chaturmukhabrahmā who has the benefit of the study of Śruti and is not haunted by ordinary worldly desires.

उप—स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः । स य एवंवित् । अस्माल्लोकात् प्रेत्य । एतमन्नमयमात्मानमुपसंक्रामति । एतं प्राणमयमात्मानमुपसंक्रामति । एतं मनोमयमात्मानमुपसंक्रामति । एतं विज्ञानमयमात्मानमुपसंक्रामति । एतमानन्दमयमात्मानमुपसंक्रामति ॥ २-२१ ॥

The Supreme God present in Puruṣa i.e., Jīvas and in Āditya i.e., deities is one. He who knows this and also the hierarchy of Jīvas after departing from his last body attains Annamaya i.e., Aniruddha, Prāṇamaya i.e., Pradyumna, Manomaya i.e., Saṅkarṣaṇa, Vijñānamaya i.e., Vāsudeva and Ānandamaya i.e., Nārāyaṇa.

उप–तदप्येषः श्लोको भवति–

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन ॥

एतं ह वाव न तपति । किमहं साधु नाकरवम् । किमहं पापमकरवमिति । स य एवं विद्वानेते आत्मानं स्पृणुते । उभे ह्येवैष एते आत्मानं स्पृणुते । य एवं वेद । इत्युपनिषत् ।

About this it is sung as follows : He who knows that the words along with the mind return from the Supreme God who is of the nature of infinite bliss, will not have the fear of transmigration.

He will not repent with the thought that 'why I did not perform good deeds', 'why I committed sins'. Because, he who knows the Supreme God as of infinite bliss, will get rid of the effects of both good deeds and sins. One who knows this will also be not affected by the good deeds and the sins. This is the secret teaching.

उप–ॐ सह नाववतु सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ॥ २-२२ ॥

इति तैत्तिरीयोपनिषदि ब्रह्मवल्ली नाम द्वितीयवल्ली समाप्ता

॥ भृगुवल्ली ॥

उप–ॐ सह नाववतु सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ॥

BHRIGU APPROACHES VARUṆA FOR INSTRUCTIONS

भृगुर्वै वारुणिः वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तस्मा एतत् प्रोवाच । अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति । तं होवाच यतो

वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभि-संविशन्ति । तद्विजिज्ञासस्व तद्ब्रह्मेति ॥ ३-१ ॥

Bhrigu the son of Varuṇa approached his father with the request-Revered Sir, teach Brahman to me. Varuṇa taught Brahman to him as follows : Anna, Prāṇa, Chakṣus, Srotra, Manas, Vāk, Vijñāna and Ānanda are the forms of Brahman.

Brahman is he from whom all beings arise, by whom all beings are sustained, into whom all beings enter during pralaya and whom all beings reach when liberated. Meditate upon him by Sravaṇa, Manana and Nididhyāsana.

BHĀRGAVI VIDYA

उप—स तपोऽतप्यत स तपस्तप्त्वा अन्नं ब्रह्मेति व्यजानात् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभि-संविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तं होवाच । तपसा ब्रह्म विजिज्ञासस्व ॥ ३-२ ॥

Bhrigu meditated and realised Brahman designated as Annamaya i.e., Aniruddha, present in Anna. All beings arise from Annamaya, are sustained by Annamaya, enter into Annamaya during Pralaya and reach Annamaya when liberated. Having comprehended Annamaya i.e., Aniruddha, he approached his father again and requested : Revered Sir! teach me to comprehend further. Varuṇa said : know the Brahman of eight forms by meditation.

उप—तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा । प्राणो ब्रह्मेति व्यजानात् । प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते । प्राणेन जातानि जीवन्ति । प्राणं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय पुनरेव वरुणं पितर-मुपससार । अधीहि भगवो ब्रह्मेति । तं होवाच । तपसा ब्रह्म विजिज्ञासस्व ।

Brahman is Tapah i.e., Jñānasvarūupa. Bhrigu meditated upon such Jñānasvarūpa Brahman again. Then, he comprehended Brahman designated as Prāṇamaya i.e., Pradyumna. All beings arise from Praṇa, are sustained by Prāṇa, enter into Prāṇa during Pralaya and reach Prāṇa when liberated. Having comprehended Prāṇamaya he approached his father again and requested : Revered Sir ! teach me to comprehend further. Varuṇa said, know Brahman of eight forms by meditation.

उप–तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा। मनो ब्रह्मेति व्यजानात्। मनसो ह्येव खल्विमानि भूतानि जायन्ते। मनसा जातानि जीवन्ति। मनः प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तं होवाच तपसा ब्रह्म विजिज्ञासस्व।

तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा। विज्ञानं ब्रह्मेति व्यजानात्। विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते। विज्ञानेन जातानि जीवन्ति। विज्ञानं प्रयन्त्यभिसंविशन्तीति तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तं होवाच। तपसा ब्रह्म विजिज्ञासस्व।

तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा । आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति आनन्दं प्रयन्त्यभिसंविशन्तीति ॥ ३-३ ॥

Brahman is Tapah i.e., Jñānasvarūpa. Bhrigu meditated upon the eight forms of the Supreme God. Then, he comprehended Brahman designated as Manomaya i.e., Samkarṣaṇa. All these beings arise from Manomaya, are sustained by Manomaya, enter into Manomaya during Pralaya, and reach Manomaya when liberated. Having comprehended Manomaya Bhrigu approached again his father and requested : Revered Sir ! teach me to comprehend further. Varuṇa said know the Brahman of eight forms by meditation.

Brahman is Tapah i.e., Jñānasvarūpa. Bhrigu meditated upon the eight forms of the Supreme God. Then, he comprehended Brahman designated as Vijñānamaya i.e., Vāsudeva. All these beings arise from Vijñānamaya, are sustained by Vijñānamaya, enter into Vijñānamaya during Pralaya and reach Vijñānamaya when liberated. Having comprehended Vijñānamaya Bhrigu approached his father again and requested : Revered Sir ! teach me to comprehend further. Varuṇa said Know the Brahman of eight forms by meditation.

Brahman is Tapah i.e., Jñānasvarūpa. Bhrigu meditated upon the eight forms of the Supreme God. Then, he comprehended Brahman designated as Ānandamaya i.e., Nārāyaṇa. All beings arise from Ānandamaya, are sustained by Ānandamaya, enter into Ānandamaya during Pralaya, and reach Ānandamaya when liberated.

उप—सैषा भार्गवी वारुणी विद्या। परमे व्योमन् प्रतिष्ठिता। य एवं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिः ब्रह्मवर्चसेन। महान् कीर्त्या ॥ ३-४ ॥

This knowledge is taught by Varuṇa and practised by Bhrigu. This is about the all-pervasive Supreme God. He who knows this will have firm faith in the Supreme God. He will be protected by the Supreme God designated as Annamaya and sustained by him. He will have good disciples, knowledge, lustre of a Brahmajñānin, and attain greatness by reputation.

ANNA AND ANNADA FORMS OF THE SUPREME GOD

उप—अन्नं न निन्द्यात्। तद्व्रतम्। प्राणो वा अन्नम्। शरीरमन्नादम्। प्राणे शरीरं प्रतिष्ठितम्। शरीरे प्राणः प्रतिष्ठितः। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान्

भवति । प्रजया पशुभिः ब्रह्मवर्चसेन । महान् कीर्त्या अन्नं न परिचक्षीत । तद्व्रतम् ॥ ३-५ ॥

One should not derogate the Supreme God designated as Anna. This should be observed as an vow. Prāṇa i.e., the Supreme God designated as Prāṇa and present in Prāṇa in the body is Anna. Śarīra i.e., the Supreme God present in Jīva is Annada. Similarly, Śarīra is Anna and Prāṇa is Annada. The Supreme God designated as Śarīra is the enjoyer and the Supreme God designated as Prāṇa is the enjoyed. Similarly, Prāṇa is the enjoyer and Śarīra is the enjoyed. Thus both are enjoyer and enjoyed. He who knows this is protected by the God designated as Anna and sustained by him. He will have good disciples, knowledge, lustre of a Brahmajñānin and attain great reputation. Anna i.e., the Supreme God should not be forsaken. This should be observed as a vow.

उप–आपो वा अन्नम् । ज्योतिरन्नादम् । अप्सु ज्योतिः प्रतिष्ठितम् । ज्योतिष्यापः प्रतिष्ठिताः । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान् भवति । प्रजया पशुभिः ब्रह्मवर्चसेन । महान् कीर्त्या । अन्नं बहु कुर्वीत । तद्व्रतम् ।

पृथिवी वा अन्नम् । आकाशोऽन्नादः । पृथिव्यामाकाशः प्रतिष्ठितः । आकाशे पृथिवी प्रतिष्ठिता । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान् भवति प्रजया पशुभिः ब्रह्मवर्चसेन । महान् कीर्त्या ॥ ३-६ ॥

The Supreme God designated as Ap is Anna i.e., enjoyed. The Supreme God designated as Jyoti is Annada i.e., enjoyer. Ap is enjoyed and Jyoti is enjoyer. Jyoti is enjoyed and Ap is enjoyer. Thus both are the enjoyer and enjoyed. He who knows

this is protected by the Supreme God designated as Anna and sustained by him. He will be great, will have good disciples, knowledge, lustre of a Brahmajñānin and will attain great reputation. The God should not be forsaken. This should be observed as a vow.

The Supreme God designated as Prithivi is Anna i.e., enjoyed. The Supreme God designated as Ākāśa is enjoyer. Prithivi is enjoyed and Ākāśa is enjoyer. Both are enjoyed and enjoyer. He who knows this is protected by the Supreme God designated as Anna and sustained by him. He will be great, will have good disciples, knowledge, lustre of Brahmajñānin and will attain great reputation. The God should not be forsaken. This should be observed as a vow.

NO STUDENT BE DENIED

उप–न कञ्चन वसतौ प्रत्याचक्षीत । तद्व्रतम् । तस्माद् यया कया च विधया बह्वन्नं प्राप्नुयात् । अराध्यस्मा अन्नमित्याचक्षते । एतद्वै मुखतोऽन्नं राद्धम् । मुखतोऽस्मा अन्नं राध्यते । एतद्वै मध्यतोऽन्नं राद्धम् । मध्यतोऽस्मा अन्नं राध्यते । एतद्वा अन्ततोऽन्नं राद्धम् । अन्ततोऽस्मा अन्नं राध्यते । य एवं वेद ॥ ३-७ ॥

No student who approaches for study should be denied the opportunity to study. This should be observed as a vow. A student should get to know the Supreme God designated as Anna by making all efforts. The Supreme God designated as Anna will make himself available to him. He who studies right from the young age will be able to see the face of the Supreme God in his aparokṣa vision. He who studies in the middle age will be able to see the middle portion of the Supreme God. He who studies in the old age will be able to see the feet of the Supreme God. He who knows this will also see in the same way.

ADHYĀTMA AND ĀDHIDAIVA MEDITATIONS

उप–क्षेम इति वाचि । योगक्षेम इति प्राणापानयोः । कर्मेति हस्तयोः । गतिरिति पादयोः । विमुक्तिरिति पायौ । इति मानुषीः समाज्ञाः । अथ दैवीः । तृप्तिरिति वृष्टौ । बलमिति विद्युति । यश इति पशुषु । ज्योतिरिति नक्षत्रेषु । प्रजातिरमृतमानन्द इत्युपस्थे । सर्वमित्याकाशे ॥ ३-८ ॥

The Supreme God should be meditated upon as Kṣema i.e., he who provides welfare, present in Vāk, he should be meditated upon as Yoga i.e., he who fulfills desires, present Prāṇa, as Kṣema present in Apāna, as Karma i.e., he who enables to undertake activity, present in hands, as Gati i.e., he who enables to walk, present in feet, as Vimukti i.e., he who enables secretion, present in Pāyu. These meditations are with reference to the God present in human body.

Now with reference to the forms present in deities : The Supreme God should be meditated upon as Tripti i.e., delighter, present in the rain i.e., Parjanya the abhimāni deity of rain, he should be meditated upon as Bala i.e., giver of strength, present in Vāyu, as Yaśa i.e., giver of fame, present in Paśu i.e., the abhimāni deity of Paśu i.e., Dakṣaprajāpati, as Jyotih i.e., giver of light, present in Stars, as Prajati, Amrita and Ānanda i.e., giver of progeny, and happiness, present in Upastha i.e., the abhimāni deity of Upastha i.e., Śiva, as Sarva i.e., giver of all, present in Ākāśa i.e., Prakriti.

उप–तत्प्रतिष्ठेत्युपासीत । प्रतिष्ठावान् भवति । तन्मह इत्युपासीत । महान् भवति । तन्मन इत्युपासीत । मानवान् भवति तन्नम इत्युपासीत । नम्यन्तेऽस्मै कामाः । तद्ब्रह्मेत्युपासीत । ब्रह्मवान् भवति । तद्ब्रह्मणः परिमर इत्युपासीत । पर्येण म्रियन्ते द्विषन्तः सपत्नाः । परि येऽप्रिया भ्रातृव्याः ॥ ३-९ ॥

The Brahman i.e., the Supreme God present in Ākāśa i.e., Prakriti be meditated upon as Pratisthā i.e., he who places the deities in their respective positions. He who meditates upon the Supreme God in this way will be able to place the people lesser to him in their due positions. Brahman i.e., the Supreme God should be meditated upon as Mahas i.e., great, the meditator will become great by obtaining knowledge, he should be meditated upon as Manas i.e., revered, the meditator will become respectable among people, he should be meditated as Namah i.e., to be praised by all, the meditator will obtain his desires, he should be meditated upon as Brahman i.e., Gunapūrṇa, the meditator will be protected by the Supreme God, he should be meditated upon as the destroyer of Chaturmukhabrahmā, the external enemies, and lust, anger, greed etc., internal enemies of the meditator will be destroyed.

IDENTITY OF THE DIFFERENT FORMS OF THE SUPREME GOD

उप—स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः । स य एवंवित् । अस्माल्लोकात् प्रेत्य । एतमन्नमयमात्मानमुपसंक्रम्य । एतं प्राणमयमात्मानमुपसंक्रम्य । एतं मनोमयमात्मानमुपसंक्रम्य । एतं विज्ञानमयमात्मानमुपसंक्रम्य । एतमानन्दमयमात्मानमुपसंक्रम्य ।

इमान् लोकान् कामान्नीकामरूप्यनुसञ्चरन् । एतत्सामगायन्नास्ते । हा३वु हा३वु हा३वु । अहमन्नमहमन्नमहमन्नम् । अहमन्नादो३-हमन्नादो-३हमन्नादो३हमन्नादः । अहङ्लोककृदहङ्लोककृदहङ्लोककृत् ॥ ३-१० ॥

The Supreme God present in Puruṣa i.e., in Vāk etc., in the body of Puruṣa, and in Āditya etc., deities is one. Chaturmukhabrahmā knows the Annamaya etc., eight forms of the Supreme God more clearly. He, when liberated, attains Annamaya i.e., Aniruddha, Prāṇamaya i.e., Pradyumna,

Manomaya i.e., Saṁkarṣaṇa, Vijñānamaya i.e., Vāsudeva and Ānandamaya i.e., Nārāyaṇa. Then enjoying all his desires and assuming the forms he desires, enabling the other liberated Jīvas to move in whatever worlds they desire to be, he himself moving in different worlds invisibly, he sings the Samans hā, Vuhā, Vuhā, Vu, I am enjoyed and I am enjoyer, I declare the glory of the God.

उप—अहमस्मि प्रथमजा ऋता३स्य । पूर्वं देवेभ्योऽमृतस्य ना३भाइ । यो मा ददाति स इ देव मा३वाः । अहमन्नमन्नमदन्तमा३िद्म । अहं विश्वं भुवनमभ्यभवा३म् । सुवर्णज्योतीः । य एवं वेद । इत्युपनिषत् ॥ ३-११ ॥

Chaturmukhabrahmā declares that I am born from Viṣṇu before other gods. I am the abode of the liberated. He who propagates the glory of the lord Viṣṇu comes to me. I am enjoyed by Viṣṇu. I enjoy all Jīvas. I occupy the whole world. But I am directed by the Supreme God. Chaturmukhabrahmā primarily knows this glory of the Supreme God.

मध्वित्यानन्द उद्दिष्टो वेति तीर्थमुदाहृतम् ।
मध्व आनन्दतीर्थः स्यात् तृतीया मारुतीतनुः ॥
दशेति सर्वमुद्दिष्टं सर्वं पूर्णमिहोच्यते ।
प्रज्ञा प्रमतिरुद्दिष्टा पूर्णप्रज्ञः ततः स्मृतः ॥

॥ इति श्री तैत्तिरीयोपनिषदि भृगुवल्ली नाम तृतीयवल्ली समाप्ता ॥

इति श्री पाण्डुरङ्गि तमण्णाचार्यसूनु कृष्णाचार्य विरचितः तैत्तिरीयोनिषदः आङ्ग्लभाषानुवादः समाप्ता

NOTES AND EXPLANATION

शिक्षावल्ली

[I-1] Expl. (1) This is a prayer offered by Bhrigu at the commencement of the study of Upaniṣad. ब्रह्मविद्यामभ्यसन् भृगुः विघ्ननिघातार्थं देवान् प्रार्थयते । (R.K.)

(2) वायोः ब्रह्मविद्याप्रवर्तकेषु मुख्यत्वात् परब्रह्मणो मुख्याधिष्ठानत्वाच्च तन्नतिस्तुती कुर्वन् पृथक् प्रार्थयते । (R.K.)

(3) ब्रह्मणे–परब्रह्माधिष्ठानाय, ज्ञानादिगुणबृंहिततया ब्रह्मपदवाच्याय वा ।

(4) अक्षि अक्षि प्रति प्रत्यक्षं नियामकतया सर्वेन्द्रियस्थमिति प्रत्यक्षमित्यर्थः । प्रत्यक्षभूतप्राणापानादि वायुवृत्तिशरीरकत्वात् प्रत्यक्षमित्युक्तिः । (R.K.)

(5) ऋतम्–यथार्थज्ञानवन्तम्, सत्यम्–यथार्थज्ञानपूर्वकं वक्तारं कर्तारं च, ॐवाय्वादौ सर्वत्र व्याप्ततया रक्षकत्वेन च ॐपदवाच्येन विष्णुना शान्तिरस्तु । दिव्यान्तरिक्षभौमानिष्टनिरासाय शान्तिरिति त्रिरुक्तिः । आध्यात्मिकाधिभौतिकाधिदैविकानिष्टनिरासार्थं त्रिरुक्तिरित्येके । (R.K.)

[I-2] Expl. (1) Varṇa, Svara etc., that constitute the Vedic phonetics are stated here and their spiritual significance is explained.

ब्रह्मविद्याभ्यासार्थिनः पूर्वं शिक्षणीयमर्थं प्रतिज्ञापूर्वकमाह शीक्षामिति । शिक्ष्यते इति शिक्षा । शीक्षेति दैर्घ्यं छान्दसम् । (R.K.)

(2) वर्णः–अकारादिवर्णोच्चारणस्थानानि कण्ठताल्वादीनि, स्वरः–उदात्तादिः, मात्रा–एकमात्रादिः, बलम्–वर्णोच्चारणप्रयत्नः विवृतादिः, साम वर्णानां सन्धिः, सन्तानः–वर्णमाला न केवलं वर्णोत्पत्तिस्था नादिकमेव ज्ञातव्यम् ।

(i) वरणीयत्वहेतुना वर्णनामकं वर्णस्थं वर्णवाच्यं पुरुषे वर्णोच्चरणादिक्रियाप्रदं विष्णो रूपं वर्ण इति ज्ञेयम् ।

(ii) स्वस्मिन् रमते इति व्युत्पत्त्या उदात्तादिस्वरनामकं स्वरवाच्यं स्वरगतं पुरुषे स्वरोच्चारणक्रियाप्रदं विष्णो रूपं स्वर इत्यनेन ज्ञेयम् ।

(iii) मानात् ज्ञानात् निमित्तात् त्रातेति व्युत्पत्त्या मात्रानामकं मात्रास्थितं मात्रावाच्यं मात्रोच्चारणक्रियाप्रदं रूपं मात्रेत्यनेन ज्ञेयम् ।

(iv) बलरूपतया बलनामकं बलस्थं विवृतादिपुरुषगतप्रयत्नरूपक्रियाप्रदं रूपं बलमित्यनेन ज्ञेयम् ।

(v) सर्वरूपेषु समत्वहेतुना सामनामकं सामवाच्यं सामशब्दितसन्धिस्थं पुंगतसन्ध्युच्चारणक्रियाप्रदं रूपं सामेति ज्ञेयम् ।

(vi) गुणादिना सन्ततत्वनिमित्तेन सन्ताननामकं वर्णसन्ततिस्थितं सन्तानवाच्यं पुरुषगतसन्तानोच्चारणक्रियाप्रदं सन्तान इत्यपि ज्ञेयम् । (R.K.)

[I-3] Expl. (1) The Vyūha forms of the Supreme God present in Samhita are described here.

(2) सः—प्रागुक्तः मित्रादिः नौ—गुरुशिष्ययोः यशस्करः ब्रह्मवर्चस्करः भवतु ह ।

(3) (i) संहितायाः—पूर्वोत्तरवर्णसन्धिसन्धानभेदेन चतूरूपायाः उपनिषदं रहस्यं प्रतिपाद्यत्वेन स्थितं भगवतः रूपजातं व्याख्यास्यामः ।

(ii) चतुरात्मकलोकादिवर्गपञ्चके प्रत्येकं चतुरात्मतया स्थितं नारायणाद्य-निरुद्धान्तं रूपपञ्चकं चतुरात्मकसंहिताप्रतिपाद्यत्वेन तत्स्थत्वेन व्याख्यास्यामः इत्यर्थः।

(iii) उक्तविधभगवद्रूपप्रतिपादिकाः सकलवेदगताः संहिताः महद्ब्रह्मप्रति-पादकतया महासंहिता इत्याचक्षते । (R.K.)

[I-4] Expl. (1) The four forms of the Supreme God conveyed by the four aspects of Samhitā with reference to Adhiloka are described here.

लोकेषु स्थितं भगवद्रूपचतुष्टयं चतूरूपसंहिताप्रतिपाद्यं तत्स्थं वा व्याख्यास्यामः ।

(2) (i) पृथिवीस्थितं पृथिवीनामकं नारायणवासुदेवाख्यं पूर्वरूपम् ।

(ii) द्युलोकस्थं द्युनामकं नारायणसंकर्षणाख्यं रूपं संहितायाः उत्तररूपम् ।

(iii) आकाशस्थम् आकाशनामकं नारायणप्रद्युम्नाख्यं संधिः संनिकर्षप्रतिपाद्यम् ।

(iv) वायुस्थं वायुनामकं नारायणानिरुद्धाख्यं रूपं सन्धानं सन्धिकार्यप्रतिपाद्यम् ।

प्रतिपाद्यप्रतिपादकाभिप्रायेण पृथवीपूर्वरूपमित्याद्युक्तिः । (R.K.)

[I-5] Expl. (1) The four forms of the Supreme God conveyed by the four aspects of Saṁhitā with reference to the luminaries are described here.

चतुरात्मकज्योतिर्गतरूपचतुष्टयं चतुःस्वरूपसंहितासम्बन्धीत्येतद् व्याख्यास्यामः । (R.K.)

(2) (i) अग्निः–पृथिवीगताग्निस्थमग्निनामकं वासुदेव–वासुदेवाख्यं संहितायाः पूर्वरूपं पूर्ववर्णप्रतिपाद्यं पूर्ववर्णस्थमिति द्वेधा पूर्वरूपत्वं ध्येयम् । एवमुत्तरत्रापि ।

(ii) द्युलोकगतादित्यस्थं आदित्यनामकं वासुदेव-संकर्षणात्मकं रूपं संहितायाः उत्तररूपम् ।

(iii) अप्सु स्थितम् अप्नामकं वासुदेवप्रद्युम्नाख्यं रूपं सन्धिः संहितायाः सन्निकर्षः ।

(iv) विद्युत्समूहगतं वैद्युताख्यं वासुदेवानिरुद्धाख्यं सन्धानमित्यर्थः । (R.K.)

[I-6] Expl. (1) The four forms of the Supreme God conveyed by the four aspects of Saṁhitā with reference to the learning are described here.

(2) (i) आचार्यः–आचार्यस्य आचार्यनामकं संकर्षण-वासुदेवात्मकं रूपं संहितायाः पूर्वरूपं पूर्ववर्णस्थं पूर्ववर्णप्रतिपाद्यम् ।

(ii) अन्तेवासिस्थं अन्तेवासिनामकं संकर्षण-संकर्षणात्मकं उत्तररूपम् ।

(iii) गुरुशिष्यसंघर्षजं ज्ञानं विद्या । विद्यास्थं विद्यानामकं संकर्षणप्रद्युम्नाख्यं रूपं सन्धिः ।

(iv) प्रवचनस्थं प्रवचननामकं संकर्षणानिरुद्धाख्यं रूपं सन्धानं सन्धिकार्यम् । (R.K.)

[I-7] Expl. (1) The four forms of the Supreme God conveyed by the four aspects of Saṁhitā with reference to the progeny are described here.

(2) (i) माता–मातृस्थं मातृनामकं प्रद्युम्नवासुदेवात्मकं रूपं संहितायाः पूर्वरूपम् ।

(ii) पितृस्थं पितृनामकं प्रद्युम्नसंकर्षणात्मकं रूपं संहितोत्तररूपम् ।

(iii) प्रजास्थं प्रजानामकं प्रद्युम्नप्रद्युम्नाख्यं रूपं सन्धिः ।

(iv) प्रजननस्थं प्रजनननामकं प्रद्युम्नानिरुद्धाख्यं रूपं सन्धानम् ।

[I-8] Expl. (1) The four forms of the Supreme God conveyed by Samhitā with reference to the body are described here. The benefit of the knowledge of the forms of the Supreme God conveyed by all the Samhitas described here are mentioned.

(2) अध्यात्मं–आत्मनि देहे अधीति विग्रहः, वेद–उपास्ते, साक्षात् करोति ।

(3) विष्णुरूपमहार्थकत्वात् महासंहिताः । प्रजयेत्यादिना स्वयोग्यसर्वभोगः उपलक्ष्यते, सुवर्गलोकपदेन श्वेतद्वीपादिविष्णुस्थानग्रहः, अन्नाद्येन–अन्नादिना । (R.K.)

[I-9] Expl. (1) Here the Supreme God is described as a repository of Veda and all knowledge. He is appealed to preserved our knowledge of Vedas. विद्याभ्यासिनः मेधाप्राप्त्यर्थं काञ्चन विद्यामाह । (R.K.)

(2) इन्द्रः–परमेश्वरः, छन्दसां ऋषभः अधिपतिः, विश्वरूपः–पूर्णविग्रहस्वरूपः, नानारूपः इति वा, अमृतात्–अमृतेभ्यः नित्येभ्यः, अधिसम्बभूव–अधिकतया सुव्यक्तः, स्पृणोतु–बलयतु, अमृतस्य–नित्यस्य वेदस्य, विचर्षणं विशिष्टाः चर्षणयः प्रजाः यस्य तत् विशिष्टशिष्यप्रजायुक्तं भूयात्, मधुमती–सुखसाधनभगवद्बोधक-वेदोच्चारणवती ।

(3) This Śruti passage is commented upon in Karmanirṇaya Teeka. व्याख्याता एषा श्रुतिः कर्मनिर्णयटीकायाम् ।

[I-10] Expl. (1) Here a prayer to the Supreme God is offered appealing to provide prosperity, food, cloth and wealth. Goddess Lakṣmi is referred to here as decorated with matted hair.

(2) आत्मनः–जीवजातस्य चीरं चिरं सर्वभोगानावहन्ती,

(3) स्वाहा–सुष्ठु आहूयते वेदैः प्रतिपाद्यते इति स्वाहेत्युक्तः गोविन्दः, लोमशाम्–बहुकेशवतीम्, सुशिखण्डाम्, 'चतुष्कपर्दा युवतिरिति' श्रुतेः 'चतुःशिखण्डे'ति श्रुत्यन्तराच्च । (R.K.)

[I-11] Expl. (1) Here, the seer Bhrigu appeals to God to bless him by providing good disciples.

(2) ब्रह्मचारिणः मा–माम्, आयन्तु, वि–विविधाः, प्र–प्रकृष्टाः, दमाः–इन्द्रियनिग्रहवन्तः, शमाः–विष्णुनिष्ठावन्तः, जने–जनेषु, यशस्वी–व्याख्याता अयमिति कीर्तिमान्, वस्यसः–सुखस्य विषये श्रेयान् प्रशस्ततरः अविरतसुखवान् स्याम्, भग–षड्गुणपूर्ण, सहस्रशाखे–सहस्राणि शाखा इव शाखा रूपाणि यस्य तस्मिन् बहुरूपतया सहस्रशाखपदोक्ते, विमृजे–प्रक्षालये पापमिति शेषः ।

[I-12] Expl. (1) Bhrigu continues his appeal to the God to provide pupils to him.

(2) अहर्जरम्–अहानि जीर्यन्ते अत्रेति अहर्जरं संवत्सरम्, प्रतिवेशः–प्रतिवेष्टुं योग्यः श्रमापनयनस्थानं आसन्नगृहं प्रतिवेशः तादृशोऽसि इत्यर्थः, मां प्रति प्रभा हि व्यक्तो भव, मां प्रपद्यस्व । (R.K.)

[I-13] Expl. (1) The forms of the Supreme God conveyed by the Vyāhritis and also the attributes conveyed by Vyāhriti are described here. व्याहृतिनिष्ठोपासनामाह ।

(2) व्याहृतयः–अनिरुद्धादिचतुरात्मनः विष्णोः व्याहरणात्, सर्ववेदोक्तसर्वस्वव्याहरणात्, विशेषेण आहरन्ति विष्णुं भक्तं प्रतीति वा व्याहृतयः इत्युच्यन्ते ।

(3) चमसशब्दस्य महत्पदेन समासे सति महाचमसशब्देन अतिचमत्कृतिमत्वात् व्याहृतिचतुष्टयप्रतिपाद्यः वक्ष्यमाणदिशा षोडशात्मा हरिरुच्यते । तं महाचमसं जानातीति माहाचमस्यः व्याहृत्यर्थविष्णुंज्ञानी ब्रह्मेति ध्येयम् ।

(4) ज्ञानरूपत्वात् भूः, भूरिवीर्यत्वात् भुवः, सुबलरूपत्वात् सुवः, पूर्णत्वात् महः इत्यादि प्रवृत्तिनिमित्तेन विष्णोः व्याहृतत्वात् भूरादेः व्याहृतिशब्दितत्वं ज्ञेयम् ।

(5) (i) तद्ब्रह्म–भूरादिचतुःशब्दव्याहृतम् अनिरुद्धादि–रूपचतुष्टयं ब्रह्म, गुणैः, बृंहितत्वात् ब्रह्मेत्यर्थः । स चतुरात्मा ब्रह्मपदोक्तः आत्मा देवादीनां सर्वेषां स्वामी, अन्याः देवताः ब्रह्मादयः अङ्गानि गुणभूतानि तत्परिवारभूतानि ।

(ii) तद्ब्रह्मेत्यनेन तत्पदेन मह इति चतुर्थ–व्याहृतिवाच्यं विष्णुरूपं परामृश्य तस्य ब्रह्मेति वासुदेवाख्यचतुर्थरूपत्वमुच्यते । स वासुदेवः आत्मा मध्यदेहः । अन्या देवताः अनिरुद्धप्रद्युम्नसंकर्षणरूपाः अंगानि शिरोबाहुपादरूपांगानि ।

रूपाणां 'न स्थानतोपीति'न्यायेन अभेदेपि चत्त्वार इति विशेषशक्त्या संख्या-मात्रविशेषेण अन्या देवता इत्यन्यत्वोक्तिरिति ज्ञेयम् । 'अङ्गाङ्गित्वेन भगवान् क्रीडते पुरुषोत्तमः' इति सूत्रभाष्योक्तेः । (R.K.)

[I-14] Expl. (1) The four forms of the Supreme God present in the worlds, luminaries etc., are described in this section.

भूरादिशब्दचतुष्टयवाच्यरूपचतुष्टयस्य लोकज्योतिर्वेदप्राणाख्यवर्गचतुष्टय-रूपस्थानान्याह ।

(2) (i) समीपस्थसर्वाधारत्वहेतुभ्यां 'अयं लोकः' इति शब्दवाच्यः भूलोकस्थः भूरित्युक्तः अनिरुद्धानिरुद्धः ।

(ii) अन्तरीक्षणीयत्वहेतुना अन्तरिक्षनामा अन्तरिक्षस्थः भुव इत्युक्तः अनिरुद्धप्रद्युम्नः ।

(iii) प्राणस्थितत्व सर्वाधारत्वाभ्यां 'असौ लोकः' इत्युक्तः द्युलोकस्थः सुवः शब्दवाच्यः अनिरुद्धसंकर्षणः ।

(iv) अदितिसुतत्वहेतुना आदित्यस्थः आदित्यनामा महः इति शब्दवाच्यः अनिरुद्धवासुदेवः ।

(3) आदित्येन—महः इति शब्दवाच्यानिरुद्धवासुदेवाख्येन सर्वे लोकाः पृथिव्यादि-लोकत्रयस्थाः अनिरुद्धानिरुद्धाद्याख्याः तिस्रो मूर्तयः सर्वे लोकाः इत्युच्यमानाः महीयन्ते पूज्यन्ते । क्रीडया पूज्यपूजकभावेन वर्तन्ते इत्यर्थः । (R.K.)

Expl. (1) The forms of the Supreme God present in Agñi etc., luminaries are described here.

(2) (i) अंगनेतृत्वादिना अग्निनामा अग्निस्थः प्रद्युम्नानिरुद्धः भूः ।

(ii) वयति बध्नाति जगदिति वायुनामा वायुस्थः प्रद्युम्नप्रद्युम्नः भुवः ।

(iii) आदित्यस्थः आदित्यनामा प्रद्युम्नसंकर्षणः सुवः ।

(iv) आह्लादरूपत्वेन चन्द्रमाः चन्द्रस्थः प्रद्युम्न-वासुदेवः महः । (R.K.)

Expl. (1) The forms of the Supreme God present in Rik etc. Vedas are described here.

(2) (i) अर्च्यत्वशब्दितपूज्यत्वहेतुना ऋङ्नामा ऋक्स्थितः संकर्षणानिरुद्धः भूः ।

(ii) समत्वहेतुना सामनामा सामस्थितः संकर्षणप्रद्युम्नः भुवः ।

(iii) याज्यस्वरूपतया यजुर्नामा यजुषि स्थितः संकर्षण-संकर्षणः सुवः ।

(iv) बृहत्वात् अखिलवेदाद्युक्तत्वहेतुना ब्रह्मनामा ब्रह्मशब्दिताखिलवेदसमुदायस्थः संकर्षणवासुदेवः महः । (R.K.)

Expl. (1) The forms of the Supreme God present in Prāṇa, Apāna etc., are described here. The benefits of knowing these four forms of the Supreme God with reference to four places are mentioned here.

(2) (i) प्रकृष्टनयनहेतुना प्राणनामा प्राणस्थः वासुदेव-अनिरुद्धः भूः ।

(ii) अवाङ् नयनहेतुना अपाननामा अपानस्थः वासुदेवप्रद्युम्नः भुवः ।

(iii) विविधनयनहेतुना व्याननामा व्यानस्थः वासुदेव-संकर्षणः सुवः ।

(iv) सर्वजीवोपजीव्यत्वरूपाद्यत्वहेतुना अन्ननामा अन्नस्थः वासुदेव-वासुदेवः महः ।

(3) व्याहृतिभिः वाच्याः षोडशमूर्तीः ब्रह्मपदयोग्यः यः वेद उपास्ते साक्षात् करोति स एव ब्रह्म गुणबृंहितं विष्णुं वेद । अस्मै मुक्तब्रह्मणे सर्वे मुक्तौ स्थिताः देवाः बलिमावहन्ति पूजां आहरन्ति । (R.K.)

[I-15] Expl. (1) The four forms of the Supreme God present in the body are described here.

भूरादिव्याहृतिचतुष्टयवाच्यस्य अनिरुद्धादेः देहेऽपि स्थानविशेषानुपास्त्यर्थमाह । (R.K.)

(2) मनोमयः–ज्ञानप्रचुरः, अमृतः–नित्यः, हिरण्मयः–विलक्षणानन्दप्रचुरः, पुरुषः–अनिरुद्धः । (R.K.)

(3) इन्द्रयोनिः–इन्द्रस्य परमेश्वरस्य प्रद्युम्नस्य योनिः स्थानम्, वि–अविभक्तिको निर्देशः विः–सुपर्णरूपः संकर्षणः, व्यपः–व्यप इत्युक्तः वासुदेवः, व्यपगतेऽपि जगति स्थाता इति व्यपः वासुदेवः ज्ञेयः । (R.K.)

(4) (i) हिरण्यं बाह्यसुखविलक्षणसुखम्, हिरण्मयः–इतरविलक्षणपूर्णानन्दस्वरूपः इत्यर्थः, अथवा सुवर्णवर्णत्वात् हिरण्मयः ।

(ii) जगति व्यपगते सति प्रलयकाले स्थातृत्वेन व्यपः—वासुदेवः । (S.T.)

(5) य एष हृदयाकाशः अनिरुद्धस्तु तद्गतः ।
प्रद्युम्नः तालुमध्यस्थो लंबिन्यामिन्द्रनामकः ॥
व्याख्यः सुपर्णरूपत्वात् केशान्ते वर्तते तु यः ।
संकर्षणः सुपर्णात्मा वासुदेवो व्यपः स्मृतः ॥
यस्माद् व्यपगतः स्थाता जगति प्रलये विभुः ।
अशीर्षके कपालेऽसौ कपालादुपरिस्थितः ॥ (M.B.)

[I-16] Expl. (1) The four forms present in Agni etc., are described here.

(2) भूरित्युक्तः अनिरुद्धः, भुव इत्युक्तः प्रद्युम्नः, सुवरित्युक्तः संकर्षणः, महरित्युक्तः वासुदेवः ।

(3) ब्रह्मणि—चतुर्मुखे स्थिः वासुदेवः स्वाराज्यं जगत् व्याप्नोति, मनसस्पतिमनिरुद्धं व्याप्नोति, नित्यैश्वर्यबलात् स्वव्यापी जगद्व्यापी च ।

(4) स्वाराज्यं—स्वस्य अधीनतया आसमन्तात् स्थितम् अव्याकृताकाशादिकं जगत्, मनसस्पतिं—स्वकीयमनिरुद्धाख्यं रूपं नित्यैश्वर्ययुक्तत्वात् आप्नोति, विज्ञानपतिः बुद्धिरूपेन्द्रियपतिः, वासुदेवः वागादिपतिः । (S.T.)

(5) अनिरुद्धस्तु भूर्नामा हुताशे संव्यवस्थितः ।
प्रद्युम्नो भगवान् वायौ भुव इत्येव कीर्तितः ।
संकर्षणः सुवर्नामा सूर्ये तिष्ठति केशवः ॥
महो नामा वासुदेवः ब्रह्मणिस्थश्चतुर्मुखे ।
स वासुदेवः स्वाराज्यं व्याप्यास्मिन् मनसस्पतौ ।
अनिरुद्धेन संव्याप्तः ततो वागादिनां पतिः ।
वागादिषु स्थितो नित्यं भवत्येव जनार्दनः ॥
स्वव्यापी च जगद्व्यापी नित्यैश्वर्यात् स ईश्वरः ॥ (M.B.)

[I-17] Expl. (1) Here certain special qualities of Vāsudeva are described.

(2) आकाशशरीरम्–आकाशवद्व्याप्तदेहम्, सत्यात्म–साधुगुणपूर्णम्, प्राणारामम्–प्राणस्य वायोः विशेषेण रामं रमकम्, सुखोन्नतिरूपत्वात् शान्त्यात्मकम्, स्वतः पूर्तेः समृद्धं, अमृतम्–देहतोऽपि नित्यम् ।

(3) प्राचीनयोग्य–अधिकारिणां प्राथमिकयोग्य चतुर्मुख उपास्व इति प्राह भगवान् ऋषिः विष्णुः चतुर्मुखमिति ज्ञेयम् । (R.K.)

(4) आकाशवद्व्याप्तदेहः सत्यात्मा गुणपूर्तितः ।
वायोर्विशेषरमकः बलानन्दस्वरूपवान् ।
ज्ञानानन्दस्वरूपोऽसौ शान्तिनामा सुखोन्नतेः ।
अन्तगत्वात् स्वतःपूर्तेः समृद्धं तत्प्रकीर्तितम् ।
इत्युपास्व प्राथमिको योग्यस्त्वं मदुपासने ।
प्राधान्यादिति पूर्वं हि प्राह विष्णुश्चतुर्मुखम् । इति ब्रह्मसारे । (M.B.)

[I-18] Expl. (1) The four forms of the Supreme God present in Ādhibhūta and Ādhyātma are described here.

पृथिव्याद्यधिभूतपञ्चकत्रये प्राणाद्यध्यात्म–पञ्चकत्रये च क्रमान्नारयणाद्यनिरुद्धान्ताः मूर्तयः पृथिव्यादिषु स्थिताः पृथिव्यादिशब्दैः पञ्चभिः पञ्चभिः उच्यन्ते ।

(2) आत्मशब्दः अहंकारतत्वपरः भूताधिकारत्वात्, पाङ्क्तेन-पञ्चत्वसंख्यायुक्तेन नारायणादिरूपेणैव, पाङ्क्तं पञ्चत्वसंख्यायुक्तं पृथिव्यादिकं स्पृणोति स्वस्वव्यापारशक्तं करोति । (R.K.)

(3) पृथिव्याद्यं पाङ्क्तषट्कं पाङ्क्तेनैव स्वयं हरिः ।
नारायणादिरूपेण बलयत्यञ्जसा प्रभुः ।
इत्युवाच स्वयं विष्णुर्वेदद्रष्टा गुणादिक । इति तत्वसंहितायाम् । (M.B.)

[I-19] Expl. (1) The fact that the Supreme God Viṣṇu is called 'Om' and he is addressed as 'Om' at the commencement of study, sacrifice etc., is explained here. This knowledge is known as Praṇavavidyā. वेदविद्याभ्यासार्थिनः पूर्वभाविनीं प्रणवविद्यामाह ।

(2) ब्रह्म विष्णुः ओमित्युच्यते । अकारोकारौ अधिकोच्चत्ववाचकौ । योग्यतया गुणानामन्वयः । अधिकोच्चगुणत्वेन हेतुनेत्यर्थः ।

(3) इदं सर्वं मत्स्यादिसर्वरूपजातं ओमित्युच्यते । सर्वरूपाणामधिक-गुणपूर्णत्वादिति भावः ।

(4) ओं अधिकोच्चहोतृस्थविष्णो श्रावय-स्वमूलरूपं श्रावय इति आश्रावयन्ति उच्चैः उच्चारयन्ति अध्वर्यवः होतृस्थहरिं प्रतीत्यर्थः ।

(5) ओं इत्येतदोंकारानुकरणरूपं प्रसिद्धम् ।

(6) (i) उद्गातृप्रस्तोतृ-प्रतिहर्तृ-सुब्रह्मण्याख्याः चत्वारः उद्गातारः ।

(ii) होतृमैत्रावरुणाच्छावाकग्रावसुतश्चेति चत्वारः होतृगणस्थाः ।

(7) ओं श-अत्युच्च सुखरूप विष्णो अत्र, प्रसौति-सोममभिषुणोति, प्रवस्यन्-व्याकरिष्यन् स्वाध्यायाध्ययनादिकं करिष्यन् । (R.K.)

(8) ॐ नामा भगवान् विष्णुः अधिकोच्चगुणत्वतः ।
यद्यद्रूपं भगवतः तदिदं सर्वमेव च ।
ओमेवाधिकपूर्णत्वात् तस्माद्यज्ञेषु चर्त्विजः ।
ओमित्येव स्वकर्माणि कुर्वन्त्युद्दिश्य केशवम् ॥ (M.B.)

[I-20] Expl. (1) The preparatory code of conduct for those who desire to study the Vedas is described here. वेदाख्य ब्रह्मविद्याकामस्य तत्प्राप्त्यर्थं तत्पूर्वभाविनः यमनियमानाह ।

(2) ऋतम्-यथार्थज्ञानम्, सत्यम्-यथार्थज्ञानपूर्वकं वचनं तत्पूर्वकं करणं च, तपः-ध्यानं सत्यं पूज्यपूजा, दमः-इन्द्रियनिग्रहः, शमः-भगवन्निष्ठा, अग्नयः-अग्नीनामाधानम्, मानुषम्-देवादेः उत्तमस्य मनुष्यत्वे प्राप्ते ज्ञानाद्यतिशये सत्त्वेपि तदप्रकाशेन मनुष्यसम्बन्धिधर्मप्रदर्शनं मानुषम्, प्रजा-सुतोत्पत्तिः, प्रजननम्-तद्रक्षणम्, प्रजातिः-पित्रा पुत्रस्य द्विजत्वसंस्कारेण प्रकृष्टजातिकरणम् । (R.K.)

(3) (i) ऋतं यथार्थविज्ञानं सत्यं तत्पूर्विका कृतिः ।
ध्यानसत्ये पूज्यपूजा तप इत्यभिधीयते ।
इति शब्दनिर्णये ।

(ii) सर्वकर्मकृतिकालेष्वपि स्वाध्यायप्रवचनयोः
कर्तव्यत्वात् तयोः सर्वत्र अनुषङ्गः ।

(iii) मन्त्रो मन्त्रार्थवचनमन्यस्य स्वात्मनोऽपि वा ।
सर्वकर्मसु कर्तव्यौ सर्वकर्मात्मकौ यतः ।। इति कर्मतत्वे ।
आत्मनश्चेत् मनसैव अर्थवचनम् ।

(iv) सत्ये तपसि वा चीर्णे सर्वकर्म कृतं भवेत् ।
स्वाध्याये च प्रवचने ह्यन्तर्भावो विशेषतः ।। (M.B.)

[I-21] Expl. (1) The importance of study and teaching is stressed here.

(2) सत्यम्–यथार्थज्ञानपूर्वकं वचनं करणं च श्रेयः तपः ध्यानादिरूपं श्रेयः, नाको नाम ऋषिः ।

(3) ऋतादेः सर्वस्य स्वाध्यायप्रवचनयोः अन्तर्भावात् एतयोः अनुष्ठाने सर्वं तेन कृतं भवत्येवेत्यभिप्रायः । तदुक्तम् ।

सम्यग्ज्ञात्वा तु यो विष्णुं व्याख्यायीत जपेत वा ।
न तस्य किञ्चिदकृतं कर्तव्यं मुच्यते च सः ।। (R.K.)

[I-22] Expl. (1) The benefits of the study and teaching of Veda are described here.

(2) स्वाध्यायप्रवचनादिसम्पत्त्या अपरोक्षज्ञानानन्तरम् अहम् आदौ ऊर्ध्वेन अत्युत्कृष्टेन विष्णुना पवित्रः पावितः अप्रारब्धसमस्तपापरहितः । तदनन्तरं प्रारब्धकर्मणां भोगेन क्षये चरमदेहपातानन्तरम् अर्चिरादिद्वारेण सूर्यलोकं प्राप्य तत्र वाजिनी वसुना विष्णुना अमृतं प्रारब्धकर्मशेषनिर्मुक्तश्चास्मि । वाजिरूपश्च नेता च वाजिनीः सूर्यः तत्र वसतीति वाजिनीवसुः तेन वाजिनीवसुना विष्णुना । अमृतं प्रारब्धकर्मदोषनिर्मुक्तश्चास्मि । अनन्तरं साधनसम्पूर्त्यनन्तरं कार्यात्यये तदध्यक्षेण सह विरजां प्राप्य तत्र लिङ्गशरीराख्यवृक्षस्य रेरिवा छेत्तास्मि । अनन्तरं भगवदिच्छावरकापगमानन्तरं तदनुज्ञया योग्यस्थानं प्राप्य तदनुग्रहेणैव सवर्चसम् अनुभूयमानं द्रविणं धनं सुखंचास्मि । योग्याशेषानन्दानुभववानस्मीति यावत् । सुमेधाः सुष्ठु अभिव्यक्तं मेधाज्ञानं यस्यासौ सुमेधाश्चास्मि । अमृतेन मरणरहितेन विष्णुना उक्षितः सिक्तः व्याप्तः । तत्सन्निधानविशेषयुक्तश्चास्मि । व्याख्याता एषा श्रुतिः गीताभाष्यटीकायां पञ्चदशे अध्याये । (S.T.)

(3) संसारवृक्षच्छेत्ताहं मत्कीर्तिः पर्वतोपमा ।
अत्युत्कृष्टेन नेता च वाजिनीः सूर्य उच्यते ।
तत्रस्थो भगवान् विष्णुः संप्रोक्तो वाजिनीवसुः ।
तेनामृतोऽस्मि द्रविणं नित्यानन्दस्वरूपतः ।
तेनामृतेन सिक्तोहं तेन व्याप्तो यतः सदा ।
इत्याह मन्त्रदृक्पूर्वं त्रिशंकुर्मानवो नृपः । (M.B.)

(4) इत्येवं मनुवंशोत्पन्नस्य हरिश्चन्द्रपितुः त्रिशंकोः तन्नाम्नः राज्ञः वेदानुवचनं वेदप्रवचनजन्यं फलम् । (S.T.)

[I-23] Expl. (1) The code of conduct to be followed in life is beautifully described here for those who are to enter life after the completion of their education.

(2) स्वाध्यायान्मा प्रमदः–स्वाध्यायं मा विस्मार्षीः, कुशलात्-श्रेयोहेतुव्यापारात्, प्रश्वासः-श्रमापनोदनम्, श्रिया-प्रसन्नेन मनसा ।

(3) धर्मं चर-धारकत्वात् धर्मं भगवन्तं चर जानीहि, स्वाध्यायान्मा प्रमदः-अनध्यायातिरिक्तदिवसेषु व्याख्यानविषये प्रमादयुक्तो मा भूः, भूत्यै-ज्ञानमोक्षाख्यैश्वर्य-विषये यद्वा भूत्यै भूत्या दैवान्महैश्वर्यप्राप्त्या तत्प्राप्तावपि उक्तसत्यादिविषये न प्रमदितव्यम्, नो इतराणि दैवादस्माभिः देहादौ प्रतिबन्धकवशेन कदाचित् स्नानादि-कर्तव्यं परित्यक्तं चेत् त्वया न परित्याज्यम्, अश्रद्धया देयम्–गुणभूतश्रद्धाभावे प्रधानं दानं न परित्याज्यम्, गुणप्रधानयोः विरोधे गुणेत्वन्यायकल्पनमिति न्यायात् । (S.T.)

[I-24] Expl. (1) It is stated here that in the absence of one's teacher one should follow the model of the learned men in the place where one lives.

(2) कर्मविचिकित्सा–भगवदाराधनकर्मविषये सन्देहः, वृत्तविचिकित्सा कर्माङ्गा-चारविषये सन्देहः, संमर्शिनः–विमर्शकारिणः, युक्ताः–योगयुक्ताः, आयुक्ताः–स्वधर्मानुष्ठानाग्रहयुक्ताः, अलूक्षाः–अरुक्षाः प्रश्ने कृते कोपरहिताः, धर्मकामाः–अदृष्टार्थिनः, अभ्याख्यातेषु निन्दितेषु ।

(3) एषः आदेशः इयमाज्ञा हरेः, वेदोपनिषत् वेदरहस्यम्, अनुशासनम्–शिक्षा । (R.K.)

इति तैत्तिरीयोपनिषदि शिक्षावल्ली समाप्ता

ब्रह्मवल्ली

[II-1] Expl. (1) This is a prayer offered at the commencement of Brahmavidyā. विघ्नविधातिनीं शान्तिं पठति स ह नौ इति ।

(2) सः अवतु-प्रविशतु । अवरक्षणगतिकान्तिप्रवेशेत्यादि धातुपाठात् । आवयोः सन्निधीयतामित्यर्थः, सः भुनक्तु-पालयतु, व्याख्यानविषये वीर्यं करवावहै, अधीतं तेजस्वि-फलप्रदमस्तु, प्रमादकृतापराधात् प्राप्तं विद्वेषं नैव करवाव । (R.K.)

(3) सः-मित्रादिः, अवतु-रक्षतु, विघ्नान् परिहृत्य इतिशेषः, सः मित्रादिः भुनक्तु-अन्नादिदानेन पालयतु, व्याख्यानादिजनितमौक्तानन्दं भोजयत्विति वा, वीर्यं-व्याख्यानविषये प्रयत्नं करवाव । (S.T.)

[II-2] Expl. (1) The teaching of Brahmavidya commences from here. प्रधानब्रह्मविद्यामाह । (R.K.)

(2) ब्रह्मवित्-परब्रह्मज्ञानी परं ब्रह्म प्राप्नोति । एतेन परब्रह्मप्राप्तिकामः परं ब्रह्म विद्यात् इत्युक्तं भवति । (R.K.)

(3) The Upanisadic statement 'ब्रह्मविदाप्नोति परम्' states that he who knows Brahman attains him. This raises three questions viz.:

(i) What is the definition of Brahman ?

(ii) What is the nature of knowledge ?

(iii) What is the nature of attaining him ?

Since Brahman is infinite his knowledge is beyond the reach of an ordinary seeker. Since Brahman is everywhere, there is no question of reaching or attaining him. Therefore, these question arise.

(i) तत्र किं लक्षणकं ब्रह्म । (ii) कथं च तद्वेदनम् । नहि ब्रह्मपदेन प्रतीतस्य अपरिच्छिन्नस्य साक्षात्कारः युक्तः । (iii) कीदृशी च तत्प्राप्तिः ज्ञानसाध्या सर्वगतत्वेन नित्यप्राप्तत्वात् इत्युत्पन्नशङ्कात्रयस्य क्रमेण परिहारार्थं मन्त्रमुदाहरति उपनिषत् । (R.K.)

(4) The above questions are answered in the Upaniṣad passage 'सत्यं ज्ञानमनन्तं ब्रह्म etc.'

(i) The first question viz., किं लक्षणकं ब्रह्म? is answered as 'सत्यं ज्ञानमनन्तं ब्रह्म'. This passage gives definitions of Brahman.

(ii) The second question कथं च तद्वेदनम् ? is answered by 'यो वेद निहितं गुहायाम्'.

Though Brahman is infinite with reference to space, time and attributes he reveals himself to the seeker at the heart of the speaker.

अपरिच्छिन्नपरिमाणस्यापि स्वशक्त्या भक्तानुकम्पया अल्पपरिमाणं प्रकटयत् सर्वजीवप्रेरकतया तद्धृदयगुहास्थितं यो वेद । (R.K.)

(iii) The third question कीदृशी च तत्प्राप्तिः? is answered by सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता.

The attaining of Brahman is not reaching him physically but realising the happiness of liberation in his presence and under his control.

न संयोगादिमात्रं तत्प्राप्तिः । येन ज्ञानसाध्या न स्यात् । किन्तु विपश्चिता ब्रह्मणा सह सर्वान् स्वयोग्यान् कामान् भुङ्क्ते । तेन सह तदधीनतया सुखभोग एव तत्प्राप्तिरिति तदभिप्रायः ।

(5) (i) The definition सत्यं ज्ञानमनन्तं ब्रह्म needs further elaboration.

The expression सत्य yields the definitions जगत्स्रष्टृत्वम्, जगज्जीवनप्रदत्वम्, जगच्चेष्टकत्वम् and जगत्संहर्तृत्वम् । सदिति सद्भावः जन्मेति यावत् । सत्त्वं जीवनं प्रवर्तनं च । सत्वं विशरणं नाशमिति यावत् ।

(ii) The expression ज्ञानम् yields the definition स्वपरगताशेषसामान्यविशेषविषयकज्ञानरूपत्वम् ।

(iii) The expression अनन्तम् yields the definition देशकालगुणापरिच्छिन्नत्वम् ।

Thus these three expressions give the definitions of Brahman. (R.K.)

(6) गुहायाम्–हृदयगुहायाम्, परमे व्योम्नि-दहराकाशे, विपश्चिता ब्रह्मणा-विरिञ्चेन परेण च सह तद्वश्यः सन् अश्नुते, सर्वान् कामान् स्वयोग्यान् आनन्दादीन् । अनेन हृदि तद्वेदनं तत्प्राप्तिश्च तत्समीपं प्राप्य तदधीनतया भोगानुभवरूपेत्युक्तं भवति । (S.T.)

(7) स्वयोग्यं ब्रह्मविद्भुङ्क्ते विरिञ्चेन परेण च ।
ब्रह्मणा सह तद्वश्यः सुखमेव न दुष्कृतम् ॥ (M.B.)

[II-3] Expl. (1) The जगत्कारणत्व definition of Brahman is elaborated here. सत्यपदोक्तं जगत्कारणत्वं विवृणोति ।

(2) तस्मात् सत्यत्वादिना लक्षितात् आत्मनः आकाशः सम्भूतः जातः ।

(3) (i) Here the words Ākāśa etc., stand for the element concerned, its abhimāni deity, the body of the abhimāni deity and the Supreme God present in these.

अत्र प्रकरणे आकाशादिशब्दैः भूतं भूताभिमानी तद्देहः तत्त्रितयान्तर्गतः हरिश्चेति चत्वारः ग्राह्याः । हरेः त्रितयान्तर्गतिश्च तत्सत्ताशक्त्यादिप्रदत्वेन ।

(ii) Birth is in case of the Supreme God is abhivyakti, in case of abhimāni deity it is abhimāna, and in case of the element and the body of abhimāni it is परिणाम ।

संभूतपदोक्तं जन्म यथासंभवं हरेः अभिव्यक्तिः अभिमानिनः अभिमानः तद्देहस्य भूतस्य च परिणामः इति ज्ञेयम् ।

(4) (i) आकाशात् चतुर्विधात् चतुर्विधः वायुः चतुर्विधात् वायोः चतुर्विधः अग्निः and so on. चतुर्विधान्नात् पुरुषशब्दितः देहः तदभिमानी जीवः तदुभयान्तर्गतः हरिश्चेति त्रितयं सम्भूतमिति ज्ञेयम् ।

(ii) मुख्यवृत्त्या भूतोत्पत्तिपरत्वं अभिमानिनयन्यायेन अभिमानिपरत्वं परम-मुख्यवृत्त्या ब्रह्मपरत्वम् ।

(5) (i) ब्रह्मशब्दोदिते तस्मिन्नात्मशब्दं प्रयुज्य च । तस्मादाकाशसृष्टिं च प्रोवाचात्र चतुर्विधाम् ।

भूतं भूताभिमानी च तद्देहोन्तर्नियामकः ।
हरिश्चाकाशशब्दोक्तो मुख्यतो हरिरेव च ।

(ii) आसमन्तात् काशनात् आकाशः, बलज्ञानस्वरूपत्वात् वायुः, स्वतो न गच्छतीत्यगं तन्नयतीत्यग्निः, आपालनादापः, पृथितत्वात् पृथिवी, उष्टानां शरीरे जाठराग्निना दह्यमानानां आश्रयत्वात् ओषधयः, अत्तृत्वात् उपजीव्यतया अद्यत्वाद् अन्नम्, पुरि शेते इति पुरुषः । (S.T.)

[II-4] Expl. (1) Here Annamaya form of the Supreme God is described.

(2) Here the pronoun सः refers to आत्मन् mentioned as the cause of Ākāśa etc., earlier. आकाश etc., expressions also refer to आत्मन् as he is the cause at each stage. Therefore, it is clear that सः refers to आत्मन् or ब्रह्मन् referred to at the commencement of this discourse and एषः also refers to him. It is this आत्मन् who is described as अन्नरसमय here but not the ordinary body.

सः आत्मनः इति मूलकारणत्वेन उक्तः वै प्रसिद्धः एषः आकाशादिपदैः मुख्यवाच्यतया प्रकृतः पुरुषः जीवदेहस्थः पुरुषनामा हरिः अन्नरसमयः ।

(3) अन्नरसमयः-अन्नशब्दोऽत्र 'अद्यते अत्ति च भूतानि' इति वाक्यशेषात् भूतोपजीव्यत्वरूपाद्यत्वभूतात्तृत्वरूपसंहर्तृत्वपरः रसशब्दः सार वाची अन्नेषु-अन्नशब्दार्थेषु रसः सारः अन्नरसः तत्प्रचुरः अन्नरसमयः । सर्वभूतोपजीव्यत्वेन सर्वभूतसंहर्तृत्वेन च निमित्तेन अन्नरसमयशब्दवाच्यः प्राकृतान्नविकारदेहस्थः अनिरुद्धः इत्यर्थः । अन्नपदस्य प्राकृतान्नपरत्वनिवृत्त्यर्थं अन्नमय इत्यनुक्त्वा अन्नरसमय इत्युक्तम् । एतेन सत्यपदस्य सर्वजीवनहेतुत्वसर्वसंहर्तृत्वरूपार्थद्वयमपि विवृतं ध्येयम् ।

(4) (i) अन्नमयकोशस्थस्यानिरुद्धस्य अन्नरसमयशब्दवाच्यस्य शिरः प्रभृत्यवयवानां कोशशिरःप्रभृत्यवयवा एव स्थानानि ।

(ii) अयमात्मा-मध्यदेहः जीवदेहमध्यदेहः तस्य मध्यदेहः, प्रतिष्ठा-पादौ ।

[II-5] Expl. (1) The सृष्टिकर्तृत्व, जीवनप्रदत्व and संहारकर्तृत्व definitions of Brahman are further explained here. अन्नमय form of the Supreme God is described.

(2) अन्नाद्–अन्नरसमयात्, नामैकदेशे नामग्रहणम्, भौतिकान्नविकारदेहस्थात् अन्नरसमयनामकात् अनिरुद्धात् प्रजाः देहयोगेन जायन्ते, प्रलयकाले अन्नरसमयाख्यं अनिरुद्धमपियन्ति ।

(3) ओषाः संसारे दह्यमानाः, सर्वे ओषा धीयन्ते अस्मिन्निति सर्वौषधं संसारदग्धानामाश्रयः ।

(4) अत्तृत्वात् सर्वलोकानामन्नमित्युच्यते हरिः ।
उपजीव्यश्च भूतानामिति चान्नं जनार्दनः ॥
स ज्यायान् सर्वभूतेभ्यः तस्मात् सर्वौषधं स्मृतः ।
संसारे दह्यमानानामाश्रयत्वात् स औषधम् ॥ (M.B.)

[II-6] Expl. (1) Prāṇamaya i.e., Pradyumna present in Prāṇamayakośa is described here.

(2) अन्तरः-अन्तस्थः, आत्मा-नियामकः, प्राणमयः-वायुविकारप्राणमय-कोशस्थः, प्राणन्ति प्रवर्तन्ते जीवन्ति वा बाहुल्येन भूतानि अनेन इति व्युत्पत्त्या प्राणमयशब्दवाच्यः प्रद्युम्नाख्यः तिष्ठति ।

(3) प्राणमयेन प्रद्युम्नेन प्राणमयकोशस्थेन अन्नमयकोशस्थः अन्नरसमयः अनिरुद्धः निःछिद्रतया पूर्णः प्राणमयनामा प्रद्युम्नः पुरुषविधः पुरुषाकार एव प्राणमयस्य पुरुषाकारतानुसारेण अन्नमयकोशस्थः अनिरुद्धः पुरुषकारः ।

(4) आकाशपृथिवीशब्दाभ्यां उदानसमानौ ग्राह्यौ, प्राणमयकोशप्राणादयः प्रद्युम्नाधीनाः । (R.K.)

(5) प्राणमय आत्मा प्रद्युम्नः अन्तरः अन्नमयनामकानिरुद्धान्तरावस्थितः देहिवत् ज्ञातव्यः अन्नमयस्तु बहिष्ठत्वात् देहवत् ज्ञातव्यः । (S.T.)

[II-7] Expl. (1) Prāṇamaya i.e., Pradyumna form of the Supreme God present in Prāṇamayakośa is described here.

(2) प्राणं प्राणमयं अनुप्राणन्ति प्राणमयप्रेरणया प्राणन्ति चेष्टन्ते हिताहित-प्राप्तिपरिहारार्थं प्रवृत्तिमन्तः भवन्ति जीवन्ति च, आयुः-जीवनहेतुः, प्राणं-प्राणमय-कोशस्थं प्राणमयशब्दवाच्यं प्रद्युम्नं ब्रह्म देशकालगुणापरिच्छिन्नतया ब्रह्मपद-वाच्यमुपासते जानन्ति च ।

(3) शारीर आत्मा देहिवद् वर्तते इत्यर्थः । (R.K.)

(4) The two forms of the Supreme God viz., Aniruddha and Pradyumna are not different. Therefore, mentioning one as body and the other as Ātman, mentioning them as one within the other, and also mentioning one as different from the other in this context should be understood in one of the ways mentioned below :

(i) रूपयोः अभेदेऽपि देहदेहिभावान्यत्वान्तरत्वादिकं अधिष्ठानभूतकोशयोः तथात्वात् तन्निष्ठरूपयोरपि तथात्वं उपचरितं वा ।

(ii) भेदप्रतिनिधिविशेषेण ऐश्वर्यबलेन च मुख्यमेवेति वा ज्ञेयम् । (R.K.)

(i) The difference is mentioned from the point of the difference in the kośa in which the two forms of the Supreme God are presented. Really there is no difference among different forms of the Supreme God.

(ii) Even though there is no difference among the Supreme. God, he reveals himself in different forms by viśeṣa and his achintyaśakti.

(5) पूर्वस्य तस्य अन्नमयस्य शरीरस्थानीयस्य अनिरुद्धस्य य एषः प्राणमयः प्रद्युम्नः स एव शारीर आत्मा शरीरान्तर्गतात्मा अन्तर्व्याप्तिविशेषेण शरीरस्थानीय इत्यर्थः । (S.T.)

[II-8] Expl. (1) Manomaya form of the Supreme God is described here.

(2) This section is an elaboration of ज्ञानम् in the passage सत्यं ज्ञानमनन्तं ब्रह्म. In the earlier sections the import of सत्यं was elaborated.

लक्षणवाक्यस्थसत्यपदार्थं प्रकरणत्रयेण विवृत्य इदानीं अखिलवस्तुगताखिल-सामान्यविषयकज्ञानवत्वरूपं ज्ञानत्वलक्षणं विवृणोति । (R.K.)

(3) आत्मा-व्यासः, मनोमयः मनसा ज्ञानेन प्रचुरः इति व्युत्पत्त्या अशेषवस्तुगत-सामान्याकारगोचरज्ञानप्राचुर्यवत्त्वनिमित्तेन मनोमयनामकः मनोमयाख्यकोशस्थः संकर्षणः ।

(4) (i) यजुः–यज्ञहरणनिमित्तेन यजुर्नामकं यजुः संस्थितम्, ऋक्–अर्चन-स्वीकारहेतुना ऋङ्नामकः ऋक्स्थः, साम–सम्यक्करणहेतुना सामनामा सामस्थः, आदेशः–शतकोटिविस्तृतया अतिविस्तृतत्वहेतुना आदेशाख्यः आदेशशब्दितपञ्च-रात्रस्थः, अधरत्वाङ्गिरसत्वहेतुभ्यां अथर्वांगिरसनामकौ ।

(ii) यजुरादिकं तस्य शिरःप्रभृत्येकैकावयवप्रतिपादकं न साकल्येन तत्स्वरूपप्रतिपादनक्षममिति तात्पर्यार्थः । (R.K.)

(5) भगवत्तनुविस्तृत्युपदेशरूपत्वेन आदेशनामकपञ्चरात्रप्रतिपाद्यत्वात् अत्यन्त-विस्तृतत्वाद् वा आदेशनामकः ।

अथर्वांगिरसाख्यमुनिद्वयदृष्टभागद्वयोपेताथर्वणवेदस्थितत्वात्, अधरं वर्तयतीति-व्युत्पत्त्या पातालाद्यधोलोकस्थितप्राणिजातप्रवर्तत्वाच्च अथर्वनामकम् । निर्वचनात् धकारस्य थकारः । अंगिनां प्रधानानां देवानां रसत्वात् श्रेष्ठत्वात् अंगिरसनामक-मित्यर्थः । (S.T.)

[II-9] Expl. (1) The inability of words and the mind to fully comprehend the Supreme God who is infinite is brought out here.

(2) ब्रह्मणः-मनोमयकोशस्थसंकर्षणरूपब्रह्मणः आनन्दं आनन्दरूपं ब्रह्म विद्वान् । भेदप्रतिनिधिविशेषात् ब्रह्मण इति षष्ठीप्रयोगः । (R.K.)

(3) अप्राप्य-साकल्येन अप्रतिपाद्य । (S.T.)

[II-10] Expl. (1) (i) Vijñānamaya form of the Supreme God is described here.

(ii) This is also an elaboration of ज्ञानम् in the passage सत्यं ज्ञानमनन्तं ब्रह्म.

स्वपरगताशेषविशेषविषयकत्वरूपविज्ञानत्वमपि लक्षणवाक्यस्थज्ञानपदार्थः इति भावेन तद्विवृणोति ।

(2) विशेषज्ञानप्राचुर्येण निमित्तेन विज्ञानमयशब्दाभिधेयः विज्ञानमयकोशस्थः वासुदेवः ।

(3) श्रुतिधर्तृत्वयोगेन श्रद्धानामकं श्रद्धास्थं शिरः, ज्ञानदातृत्वयोगेन ऋतनामकः ऋतस्थः दक्षिणबाहुः, सतां नियामकत्वहेतुना सत्यनामकः सत्यस्थः सव्यबाहुः, सर्वलोकयुक्तत्वहेतुना योगनामकः योगस्थः मध्यदेहः, महनीयत्वतो महर्नामकौ पुच्छमिव अन्त्यौ प्रतिष्ठा पादौ ।

[II-11] Expl. (1) The glory of Vijñānamaya is sung here.

(2) यज्ञं समुदायाभिप्रायं यजमानऋत्विगादिषु सर्वत्र स्थित्वा यज्ञान् तदङ्गकर्माणि च तनुते । (R.K.)

(3) अपरोक्षज्ञानद्वारा प्राक्शरीरे सति सम्पादितान् पाप्मनः अप्रारब्धपापानि हित्वा भस्मसाद् विधाय भोगेन प्रारब्धान् पाप्मनः हित्वा लिंगभंगानन्तरं योग्यान् सर्वान् कामान् सम्यगश्नुते । (S.T.)

[II-12] Expl. (1) The Ānandamaya form of the Supreme God is described here.

The expression अनन्त in the passage 'सत्यं ज्ञानं अनन्तं ब्रह्म' is elaborated here. The expression Ananta means infinite in respect of space, time and attributes. The fact that the Supreme God has such Anantatva could be comprehended by realising that he is Ānandamaya. Therefore, his Ānandamayatva is described here.

देशकालगुणापरिच्छिन्नत्वरूपानन्तत्वं लक्षणवाक्यस्थानन्तपदार्थ इत्युक्तम् । तत्कुतः प्रमाणात् प्रतिपत्तव्यमित्यतः पूर्णानन्दहेतुनेति भावेनाह । तस्माद्वा इत्यादिना । (R.K.)

(2) आनन्दप्राचुर्यत्वहेतुना आनन्दनामकः आनन्दमयकोशस्थः नारायणः, प्रियम्–परैः प्राप्यत्वहेतुना प्रियनामकं उपकारजप्रियशब्दितसुखे स्थितं शिरः, मोदः- मोदते इति व्युत्पत्त्या मोदनामकः दक्षिणबाहुः । विषयजमोदनामकसुखे तिष्ठतीत्यर्थः । प्रकर्षेण मोदते इति व्युत्पत्त्या प्रमोदनामा सव्यबाहुः । प्रकृष्टविषयजे प्रमोदनामके सुखे तिष्ठतीत्यर्थः । आततत्वहेतुना आत्मा मध्यदेहः । स्वरूपानन्दे अस्तीत्यर्थः । सृष्ट्या जगद्बृंहणहेतुना ब्रह्मनामकौ पुच्छमिव स्थितौ प्रतिष्ठा पादौ । ब्रह्माख्यप्रधानवायौ तिष्ठतः इत्यर्थः । प्रियमोदादिसुखविशेषाः वायुश्चेत्येते सर्वे आनन्दमयस्थनारायणाधीनाः इति तात्पर्यम् । (R.K.)

(3) सूत्रभाष्ये तु आनन्दमयाख्यो नारायणः पुनः नारायणादिरूपेण पञ्चधा भिन्नः शिरः प्रभृत्यात्मना तिष्ठतीत्युक्तम् । (R.K.)

(4) सत्यत्व, ज्ञानत्व and अनन्तत्व definitions mentioned here, though are in different forms of the Supreme God, there is no difficulty in considering them as the definitions of one Supreme God since the different forms of the God are ultimately not different.

ननु लक्षणवाक्योक्तसत्यत्वादिलक्षणानां अनेकरूपस्थतया एकत्रैव अभावात् कथं तेषां लक्षणत्वमिति चेत् । रूपाणामभेदात् सर्वरूपाणां प्रत्येकं सत्यत्वादि-लक्षणवत्त्वेऽपि भेदप्रतिनिधिविशेषबलेन अदनप्राणनादि तत्तद्गुणदातृत्वस्य व्यवस्थया प्रकाशनान्नाभेदः पञ्चरूपत्वसंख्यादिकं च युक्तमिति ज्ञेयम् । (R.K.)

(5) Annamaya etc., are the names and forms of the Supreme God. These do not refer to Jīva or mere Kośas.

एवमन्नमयादीनां पञ्चानामपि योऽन्नं ब्रह्मेत्यादिना ब्रह्मशब्दाभ्यासात् ब्रह्मत्वमेव न जीवत्वं कोशत्वं वा । यथोक्तं सूत्रकृता 'आनन्दमयोऽभ्यासात्' इति । उक्तं चानुव्याख्याने–

येऽन्नं ब्रह्मेत्यादिरूपादभ्यासात्तैत्तिरियके ।
अन्यासु चैतद्रूपासु शाखास्वपि सहस्रशः ॥
आनन्दमय इत्याद्यैः शब्दैः वाच्यः हरिः स्वयम् । (S.T.)

(6) (i) अभेदोप्यविशेषोऽपि परमैश्वर्ययोगतः ।
देहदेहिवदेवासौ पञ्चधाऽवस्थितो हरिः ॥

(ii) अत्तृत्वं च प्रणेतृत्वं बोधो विविधवेत्तृता ।
आनन्दश्च यतः पूर्णः ततोऽन्नादिमयाः स्मृताः ॥
अत्त्यादिदास्ते प्रत्येकं सर्वे सर्वगुणा अपि ।
नामभेदस्ततस्तूक्तः सर्वनामवतामपि ॥ (M.B.)

Expl. (1) It is stated here that those who think that the Brahman of five forms Annamaya etc., is not there apart from Jiva

suffer. But those who realise that Brahman of these five forms is distinct from Jīva will quality for the liberation.

स वा एष पुरुष इत्युपक्रम्य रूपपञ्चकनिरूपणेन सत्यत्वादिलक्षणानि विवृत्य इदानीं पञ्चरूपमपि ब्रह्म न जीवाद्भिन्नमिति जानतां भिन्नमिति जानतां चोभयेषां फलभेदोक्त्या जीवान्यब्रह्मत्वं पञ्चानां श्लोकेन स्थापयति । तदप्येष इति ।

(2) ब्रह्म जीवव्यतिरेकेण असत् नास्तीति वेद चेत् सः असन्नेव दुःखी एव भवति । जीवादन्यत् ब्रह्म अस्तीति वेद चेत् एनं सन्तं सुखिनं मुक्तियोग्यं विदुः । (R.K.)

(3) सद्भाववाचकाः शब्दाः सर्वे ते सुखवाचकाः । अभाववाचकाः शब्दाः सर्वे ते दुःखवाचकाः । इति वचनेन सत् शब्दस्य सुखार्थकत्वात् । (S.T.)

(4) पञ्चरूपं च तद्ब्रह्म जीवादन्यं न विद्यते ।
इति ये तु विजानन्ति तेऽसन्तः तम आलयाः ॥
जीवादन्यत् परं ब्रह्म पञ्चरूपं च ये विदुः ।
सन्तस्त इति विज्ञेयाः मोक्षयोग्या हि ते ध्रुवम् ॥ (M.B.)

[II-13] Expl. (1) After the full exposition of the definitions of Brahman and the elaboration of the five forms of the Supreme God Annamaya etc., Varuṇa asks Chaturmukhabrahmā three juestions. These questions and the reply given by Brahmā are tated here.

अथ अन्नमयादिपञ्चरूपनिरूपणानन्तरं अतः 'ब्रह्मविदाप्नोतिपरम्' इति वाक्येन ह्मविदः परब्रह्मप्राप्तेः उक्तत्वात् तत् श्रुतवता वरुणेन चतुर्मुखं प्रति कृताः अनुप्रश्नाः चनिर्णयानुकूलाः प्रश्नाः क्रियन्ते । (S.T.)

(2) (i) उत अविद्वान् अविद्वानपि यः कश्चन प्रेत्य अमुंलोकं गच्छति आहो द्वान् प्रेत्यामुं लोकं गच्छतीत्यनुकर्षः । अयमेकः प्रश्नः ।

(ii) विद्वानित्यत्रापि किं सर्वोऽपि गच्छति कश्चिदेवेति द्वितीयः प्रश्नः ।

(iii) सर्वोऽपि इत्यत्रापि किं सर्वोऽपि सम्यक् अश्नुते उत कश्चिदेव समश्नुते न ऽपीति तृतीयः प्रश्नः । इति प्रश्नत्रयं ध्येयम् । (R.K.)

(3) सर्वोऽपि ज्ञानी सम्यगश्नुते कश्चिदेव वा सम्यगश्नुते इति चरमप्रश्नानन्तरम् उ इत्युक्त्या कश्चिदेव ज्ञानी विरिञ्चिपदयोग्यः समश्नुते इति पक्षस्य अङ्गीकारप्रतीत्या अज्ञानी नैव ब्रह्म प्राप्नोति ज्ञानिनः अखिलाः प्राप्नुवन्ति इत्यर्थलाभात् । अन्यथा कश्चिदिति न इति विशेषणवैयर्थ्यापातात् । (R.K.)

(4) ब्रह्मविदिति निरवधारणोक्तेः कश्चन अविद्वान् उत, अमुंलोकं परलोकं वैकुण्ठादिस्थं ब्रह्म गच्छतीति प्रश्नः ।

(5) (i) अज्ञानिनः ब्रह्म नैव आप्नुवन्ति तमेवं विद्वानमृत इह भवति इत्यादिवचनविरोधात् तस्मात् ज्ञानिनः एव ब्रह्म प्राप्नुवन्ति ।

(ii) तत्रापि अखिला अपि ज्ञानिनः ब्रह्म प्राप्नुवन्ति न केचिदेव । न कश्चिद् ब्रह्मवित् सुक्तिमनुभवतीत्यादिप्रमाणविरोधात् ।

(iii) तत्रापि सर्वज्ञानिनः ब्रह्म न सम्यक् समाप्नुयुः । किन्तु सम्यक् प्राप्तिः विरिञ्चस्यैव सर्वदा । अन्येषां तारतम्येन तत्प्राप्तिः इत्यभिप्रायेण समासेन उत्तरमाह । 'उ' इति । (S.T.)

(6) अज्ञाः न प्राप्नुयुः ब्रह्म प्राप्नुयुः ज्ञानिनोऽखिलाः ।
तत्रापि सम्यक् प्राप्तिस्तु विरिञ्चस्यैव सर्वदा ॥
अन्येषां तारतम्येन प्राप्तिः सुखविशेषतः ॥

[II-14] Expl. **(1)** Here, in order to bring home the glory of the Supreme God the creation made by him is explained. विष्णोः स्वातन्त्र्यादिमहिमाज्ञापनार्थं सृष्टिं सृष्टौ प्रवेशं चाह । (R.K.)

(2) (i) प्रजायेय-जगत् प्रजनयेय जगत् सृजानि, तन्नियामकतया च अहं बहुरूपः स्यामिति अकामयत, प्रजायेय प्रादुर्भवानीत्यर्थः, तपः आलोचनं अतप्यत अकरोत् व्यचिन्तयदित्यर्थः ।

(ii) असृजत-स्वोदरस्थं जगत् बहिः निर्गमयामास इत्यर्थः ।

(iii) सत्वादिगुणयोगेन सदादिपदवाच्यः सन् स्वसंबंधेन जगतोऽपि सदादिशब्दवाच्यतासम्पादकः अभवत् ।

(3) (i) सीदति अवसादयति इति सत् । सन्नामा सन् सन्नामकजगद्गतः अभवत् इत्यर्थः । एवमग्रेपि । तनोतीति त्यत्, जगतः निरुक्तत्वप्रदत्वात् निरुक्तनामा,

निर्वक्तुमशक्यत्वहेतोः अनिरुक्तनामा, सर्वाधारत्वात् निलयः, श्रीब्रह्मप्राणेभ्यः अन्यजगतः असाधुताप्रदत्वात् अनिलयननामा, सर्वं जानातीति विज्ञाननामा, जगतः अविज्ञप्तिज्ञातृत्वात् अविज्ञाननामा, साधुस्वरूपत्वात् सत्यनामा, जगतः दौर्बल्यदातृत्वहेतुना अनृतनामा ।

From the above explanation it is clear that सत्, त्यत् etc., expressions indicate the respective attributes of the Supreme God and therefore are the designations of the God. These also indicate the State, the nature or the aspects of the world in the process of creation and the presence of the Supreme God in the same with the relevant designations.

(ii) अत्र त्यच्चानिरुक्तं निलयनं विज्ञानमिति महान् ब्रह्मा उच्यते । सत्यमिति श्रीप्राणरूपं जगत् । सन्निरुक्तानिलयनाविज्ञानानृतशब्दैः प्रकृतिप्राणमहद्भ्यः अन्यत् जगदिति ज्ञेयम् ।

(4) (i) तत् सर्वत्र अनुप्रविष्टं रूपं तद्दोषेण लिप्यते किं नेत्याह–तत् सत्यमभवत् साधुस्वरूपं निर्दोषस्वरूपं सत् सत्यनामा अभवत् ।

Though the Supreme God is present in सत्, त्यत् etc., aspects of the world he is not at all affected by the drawbacks of these. This is stated by तत् सत्यमभवत्.

(ii) ननु उक्तरीत्या अवसादनादिनिमित्तेन सन्निरुक्तानिलयनाविज्ञानानृतवाच्यत्वे अवसादनान्तवत्त्वाज्ञानादिदोषिता स्यादित्यत आह । यदिदं किञ्चेति । यदिदं किञ्च सन्निरुक्तादिशब्दार्थत्वमुक्तं तत्सर्वं सत्यं साध्वेव आचक्षते । तदधीनत्वादितिन्यायेन अन्यगतावसानादिकं प्रति स्वातन्त्र्यहेतुना तच्छब्दवाच्यत्वोक्तौ दोषाभावादिति भावः।

(5) सृष्ट्वा जगदिदं सर्वं नियामकतयास्य तु ।
ब्रह्मरूपो भवानीति स्याज्जगच्चेत्यचिन्तयत् ।
स्यादित्यालोचनान्नात्यत् तपो विष्णोः कदाचन ।
अवतारेष्वनुकृतिः बाह्यवृत्त्या तपस्विनाम् ।
सृष्टिर्नाम स्वरूपात्तु बहिर्निष्क्रमणं स्मृतम् ।
यद्यपीदं जगत्सर्वं स्वोदरस्थं महात्मनः ।

(4) चेष्टारूपप्रवृत्तिहेतूनां रागद्वेषदुःखोद्रेकसुखोद्रकरूपाणां चतुर्णां मध्ये 'निरनिष्ठो निरवद्य' इति श्रुत्या आद्यत्रयस्य अभावनिश्चयेन सुखोद्रेकस्याप्यभावे जगत्प्रवृत्तिः निर्हेतुका नोपपद्येत। उत्पद्यते च अतः भवति जगत्प्रवर्तकः आनन्दरूप इति।

अयं चेत् न चेष्टयेत् तर्हि कोहि एव अन्यात् चेष्टयेत्। (R.K.)

(5) अनासाद्यस्त्वसन्नामा पूर्वं नारायणाभिधः।
स आसाद्यश्च सन्नाभा वासुदेवोऽभवत् प्रभुः॥
स वासुदेवः स्वात्मानं चक्रे संकर्षणादिकम्।
तस्मात् तत् सुकृतं नाम स आनन्दो रसस्ततः॥
आनन्दमेनं सम्प्राप्य मुक्तो मोदेत् न चान्यथा॥ (M.B.)

[II-16] Expl. (1) The glory of the Supreme God is described here.

(2) अदृश्ये-साकल्येन ज्ञानागोचरे, अनात्म्ये-आत्मनः जीवस्य इमे गुणाः आत्म्याः तद्रहिते, जीवगुणहीने, आत्मैव आत्म्यं स्वामी तद्रहिते वा, अनिरुक्ते-साकल्येन निर्वचनागोचरे, अनिलयने-अनन्याश्रये हरौ प्रतिष्ठां ध्यानरूपां विन्दते, अथ अनन्तरं सः उपासकः अभयं भगवन्तं गतः भवति।

(3) उदरं-उत् उत्कृष्टः अः अकारवाच्यः विष्णुः येभ्यः जीवेभ्यः ते उदाः जीवाः विष्णुतः नीचाः इत्यर्थः। तेषु जीवेषु रमते इत्युदरं जीवेषु परस्परं विद्यमानं भेदम् एतस्मिन् विष्णौ एषः ज्ञानी अज्ञो वा कुरुते। भगवद्रूपाणामन्योन्यं मूलरूपस्य च भेदं जानीते। अथ अनन्तरमेव तस्य भयं भवति। (R.K.)

(4) विदुषः ज्ञानिनः, अमन्वानस्य अज्ञानिनश्च भयं भवति। एतावान् विशेषः। विदुषः यावन्मुक्ति किञ्चिद्भयकृत् पश्चादभयकृत्। अज्ञस्य संसारभयकृत्। विपरीतज्ञस्य तु महाभयकृत्। (R.K.)

[II-17] Expl. (1) In order to bring home the point that the Supreme God has infinite bliss, the hierarchy of the bliss enjoyed by the liberated in described here.

ब्रह्मणः जगच्चेष्टकत्वादिना पूर्णानन्दत्वमुक्तम्। तज्ज्ञानिनां मुक्तानां च सुखतारतम्योक्तिपूर्वं विवृणोति।

(2) (i) तत्र मानुषोत्तममारभ्य विरिञ्चपर्यन्तमानन्दतारतम्यं वक्तुं मनुष्योत्तम-चक्रवर्त्यानन्दं पूर्वावधिभूतं वक्तुं मुक्तचक्रवर्तिनः विशेषणान्याह। युवा स्यादित्यादिना।

(ii) साधुयुवा–युश्चासौ वा च युवा विष्णुना सह गच्छतीति युवा 'प्राज्ञेन आत्मना अन्वारूढः उत्सर्जद्यातीति श्रुतेः। साधुभिः गुणैः युक्तत्वात् साधुयुवा। अनुव्याख्याने युवा नित्यतरुणः साधुना विष्णुना युतः साधुयुवा इत्युक्तम्। अध्यायकः–सम्यगध्ययनकर्ता सम्यक्त्वं च मुक्त्याख्याध्ययनफलवत्त्वम्। आशिष्ठः-आ समन्तात् शम् अस्येति आशः अतिशयेन आशः आशिष्ठः नित्यपूर्ण-सुखवानित्यर्थः।

(3) एवंरूपविशेषणयुक्तस्य मुक्तचक्रवर्तिनः त्रेतायुगे संसारदशायाम् इयं सर्वा पृथिवी वित्तेन पूर्णा स्यात् तदा तस्य यत् सुखं स एको मानुषआनन्दः मनुष्य-मुक्तचक्रवर्तिसम्बन्धी एकः आनन्दः। ते प्रसिद्धाः ये शतं मानुषाः मनुष्य-चक्रवर्तिसम्बन्धिनः आनन्दाः स एकः मनुष्यगन्धर्वाणां मुक्तानामानन्दः। (R.K.)

(4) श्रोत्रियस्य चाकामहतस्य-श्रोत्रियाणाम् अकामहतानामिति वचनव्यत्ययेन योज्यम्। एवमग्रेपि सर्वत्र विशेषणद्वयस्य वचनव्यत्ययेन पूर्वोक्तसामानाधिकरण्यं ज्ञेयम्। (R.K.)

The adjectives श्रोत्रियस्य and अकामहतस्य occurring in the next passage have to be taken with मनुष्यगन्धर्वाणाम्. To take in this way these have to be read as श्रोत्रियाणां अकामहतानाम्. These two adjectives indicate that the reference is to the liberated. This is necessary because, some commentators have failed to realise the significance of these adjectives and treated this hierarchy of bliss as that of Amuktas i.e., unliberated.

परैः सर्वममुक्तविषयतैव व्याख्यातमिति तद्व्युदासाय मुक्तपरत्वमेव युक्तम्। तल्लिङ्गानां श्रोत्रियत्व अकामहतत्वादीनां श्रवणात्। (R.K.)

(5) (i) एषा आनन्दमीमांसा आनन्दवैचित्र्यविषयकः विचारः क्रियमाणः भवति।

(ii) पूर्वं अमुक्तव्यवस्थायां चरमजन्मनि वित्तस्य पूर्णा इयं पृथिवी यस्य अधीना स्यात्। यः पूर्वं त्रेतायुगे वित्तपरिपूर्णपृथिवीपतिरिति यावत्। अतिशयेन सर्वभोगैः

सम्पन्नः इत्यपि ग्राह्यं 'सर्वैः मानुषकैः भोगैः सम्पन्नतमः' इति बृहद्भाष्योक्तेः । तथा च तदानीं तस्य महानन्दः भवति ।

(iii) यश्च लिङ्गभङ्गानन्तरं युवा स्यात् । विष्णुना युक्तः सन् गच्छतीति युवा, अध्यापकः-अधीतिफलसंपूर्णः, आशिष्ठः, दृढिष्ठः-अविकारः ।

अतिशयेन बली बलिष्ठः अतिशयश्च स्वाभाविकत्वम् ।

(6) तस्य मुक्तस्य पूर्वं चक्रवर्तित्वावस्थायां यावान् आनन्दः अभूत् अभिव्यक्तः तावानेव आनन्दः मानुष आनन्द इत्युच्यते । अत्र मानुषशब्दः क्षितिपपरः । तदवरः मनुष्योत्तमोऽपि अत्र ग्राह्यः । 'अन्येभ्योपि विमुक्तेभ्यः आनन्दश्चक्रवर्तिनाम् । मुक्तानां हि शतोद्रिक्तः' इति बृहद्भाष्ये कथितत्वात् । स च मौक्तः क्षितिपानन्दः वस्तुगत्या चतुर्गुणोपासकमुक्तमनुष्यापेक्षया शतगुण एवेति द्रष्टव्यम् । शतोद्रिक्त इत्युक्तेः ।

Here two important points are made : (i) तस्येयं सर्वा पृथिवी वित्तस्य पूर्णा स्यात् gives an idea of the happiness enjoyed by the chakravaartins before the liberation. But this itself is not the type of bliss realised after liberation. It is the स्वरूपसुख that manifests after the liberation. This is indicated here by the expression तावान् अभिव्यक्तः, the reference to the happiness derived before liberation by possessing the plenty of wealth is intended only to give an idea.

(ii) Though a beginning is made from the bliss enjoyed by the liberated chakravartin, the liberated Manuṣyottama bliss also should be taken into account as the earlier step and chakravartin's bliss should be understood as hundred types of that.

(7) उत्तरत्र शतगुणानन्दादिगणनायाः सम्यक् बुद्ध्यारोहाय । स एक इति । सः क्षितिपानां यावान् आनन्दः अस्ति मनुष्योत्तमानन्दात् शतगुणः तावान् सर्वोपि मिलित्वा एकः एकत्वेन विवक्षितः इति योज्यमिति सम्प्रदायः ।

(8) मनुष्यगन्धर्वाणाममुक्तत्वप्रतीतिवारणाय तान् विशिनष्टि । श्रोत्रियाणां सम्यक् श्रुतिफलं प्राप्तानाम्, अकामहतानां अवाप्तकामत्वेन कामकृतोपद्रवरहितानां

मनुष्यगन्धर्वाणामित्यन्वयः । प्रकृतमुक्तमनुष्यगन्धर्वाणां श्रोत्रियत्वादिविशेषण-समुच्चायकः चशब्दः इति ज्ञातव्यम् । एवमेव उत्तरत्रापि योजना द्रष्टव्या । (S.T.)

[II-18,19,20] Expl. (1) The hierarchy of the bliss enjoyed by the liberated is detailed here.

(2) ये साक्षात् देवप्रेष्याः ते देवगन्धर्वाः, चिरकालीनः लोकः चिरलोकः स एव लोकः येषां ते चिरलोकलोकाः, देवेषु अनाख्याताः अकथिताः या देवताः देवकुले जाताः ते आजानजदेवाः, ये बल्यादयः कर्मणा देवत्वं अपियन्ति ते कर्मदेवाः, देवानां सृष्ट्यादौ देवत्वं प्राप्तानां तत्त्वाभिमानिदेवानामित्यर्थः इन्द्रस्य-इन्दुं रावयतीति व्युत्पत्त्या दक्षप्रजेश्वरस्य, बृहस्पतेः-महेन्द्रत्वहेतुना बृहंश्चासौपतिश्चेति बृहस्पति शब्दितपुरन्दरस्य, प्रजापतेः–प्रजननेशितृत्वहेतुना प्रजापतिनाम्नः रुद्रस्य, ब्रह्मणः–चतुर्मुखस्य । (R.K.)

(3) आनन्दनीचोच्चतोक्तिः उपलक्षणं ज्ञानभक्तिबलादावपि ज्ञेयम् । (R.K.)

(4) चिरलोकलोकानां पितरः अनेके सन्ति । तत्र अर्यमाद्युत्तमपित्रधिष्ठितः लोकः चिरलोकः इत्युच्यते । चिरलोके विद्यमानत्वादेव चिरपितरः तेषां प्रसिद्धिः । तथाच चिरलोक एव लोकः येषां ते चिरलोकलोकाः । मुक्तानामपि पितॄणां चिरलोकलोकत्वाभावात् तस्येयं पृथिवीत्यादिवत् पूर्वभावव्यपेक्षया इदं व्याख्येयम् । प्रयोगे सति निमित्तानुसरणं न तु निमित्तमस्तीति प्रयोगः । (S.T.)

(5) देवकुले उत्पन्नाः नामविशेषेण अनाख्याताः आजनजाः-बल्याद्याः यज्ञे नामनाय महीदानादिरूपकर्मणा देवान् भावप्रधानो निर्देशः देवत्वानि अपयन्ति ते कर्मदेवाः, देवानां सृष्ट्यादावेव देवत्वं प्राप्तानां तत्वाभिमानिनां पुष्करमारभ्य प्रवहान्तानाम् ।

(6) प्रजापतेः रुद्रस्य अत्र रुद्रपदेन शेषः ग्राह्यः । मुक्तप्रसंगात् । यथा हि लोके कस्यचित् चतुर्थाश्रमरूपावस्थान्तरापत्तावपि तदभिज्ञाः पूर्वनाम्नैव तं व्यवहरन्ति । (S.T.)

(7) यथानन्दे तथा ज्ञाने विष्णुभक्तौ बलादिके ।
सर्वैः गुणैः शतगुणाः क्रमेणोक्तेन तेऽखिलाः ।
अथवा सहस्रगुणिताः अनन्तगुणितास्तथा ।

परिमाणे शतगुणेप्यानन्दस्फुटतावशात् ।
उत्तरेषामुत्तरेषां गुणा एवमतिस्फुटाः ॥
प्रतिबिम्बा यतः पूर्वे ब्रह्मान्तानां नरादयः ।
अतो स्पष्टस्वरूपास्ते स्फुटरूपास्तथोत्तराः ॥ (M.B.)

[II-21] Expl. (1) The importance of the realisation of the fact that there is no difference among the forms of Supreme God is stressed here. It is also stated that the liberated will reach the five forms of the Supreme God.

सर्वत्र स्थितभगवद्रूपाणामभेदेनैव जीवादिभ्यो भेदेनैव ज्ञानं पुमर्थहेतुर्नान्यथेति भावेनाह-स यश्चायमिति ।

(2) पुरुषे–सर्वनृजीवसमूहे, आदित्यपदोपलक्षितदेवेषु च स्थितः एक एव, एवंवित्-जानन्, जीवांश्च तारतम्येन वित्, अस्मात् लोकात्-भौतिकदेहात् प्रेत्य-तं देहं त्यक्त्वा, अन्नमयमात्मानं अनिरुद्धं एवं प्रद्युम्नादीनि प्राणमयादिशब्दितान्यपि रूपाणि प्राप्नोति । (R.K.)

(3) पुरुषे–तदुपलक्षितापकृष्टजीवेषु नियामकतया तिष्ठति आदित्ये-तदुपलक्षितोत्कृष्टजीवेषु नियामकतया तिष्ठति सः विष्णुः एक एव ।

(4) भोगेन प्रारब्धं क्षपयित्वा अनन्तरं अस्मात् चरमत्वेन प्रसिद्धात् लोकात् शरीरात् प्रेत्य हृदयाग्रप्रज्वलनप्रकाशितनाडीद्वारा देहात् निष्क्रम्य अर्चिरादिद्वारा यथायोग्यं कार्यं अकार्यं च प्राप्य अवस्थितः कार्यात्यये तदध्यक्षेण ब्रह्मणा सह अन्नमयं तन्नामकं भूम्यब्गं अनिरुद्धं, प्राणमयम् अग्न्यादिषु स्थितं प्रद्युम्नं, मनोमयं मनस्तत्वादिसंस्थं संकर्षणं, विज्ञानमयं महति स्थितं वासुदेवं, आनन्दमयं अव्यक्ततत्वगतं नारायणं एवं पञ्चरूपिणं भगवन्तं प्राप्य संसारभयरहितः सन् तिष्ठति । (S.T.)

[II-22] Expl. (1) The benefits of knowing the Supreme God as blissful are described here. पूर्णानन्दत्वज्ञानिन एव तत्प्राप्तिः इत्यर्थे श्लोकोप्यस्ति ।

(2) यतः यस्मात् ब्रह्मानन्दतः वाचः मनसा सह निवर्तन्ते, अप्राप्य-साकल्येन अविषयीकृत्य, ब्रह्मणः आनन्त्यहेतुना वाङ्मनसागोचरमानन्दं विद्वान् ।

(3) सः एते पुण्यपापे स्पृणुते जहाति । प्रियाप्रियेषु नृषु इति शेषः । सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामित्यादेः । (R.K.)

(4) यतः यस्मात् मनसा सह वाचः निवर्तन्ते । आनन्त्यादिति शेषः । एतादृशं ब्रह्मणः आनन्दं आनन्दरूपिणम् आनन्दमयं नारायणाख्यं परं ब्रह्मेति यावत् । इदमुपलक्षणम् अन्नमयादिशब्दवाच्यानिरुद्धादिरूपचतुष्टयमपि ग्राह्यम् । (S.T.)

(5) न बिभेति–संसारभयवान् न भवति एवमुक्तमाहात्म्योपेतत्वेन परमात्मानं विद्वान् अनिष्टं अप्रारब्धं यत् काम्यं पुण्यं अप्रारब्धं पापं चेत्येवमेते पुण्यपापे स्पृणुते स्तृणुते प्रियाप्रियेषु आस्तृणोति विस्तारयति । जहातीति यावत् । (S.T.)

(6) उपनिषत्–त्वद्योग्या रहस्यभूता च ब्रह्मविद्या त्वां प्रति मया उपदिष्टा । (S.T.)

इति तैत्तिरीयोपनिषदि ब्रह्मवल्ली समाप्ता

भृगुवल्ली

[III-1] Expl. (1) The forms of Brahman i.e., Annamaya, Prāṇamaya etc., that are described in Brahmavalli are further explained here by quoting an episode of the dialogue between Bhrigu and Varuṇa.

ब्रह्मवल्युक्तार्थे संवादितया कांचन आख्यायिकां प्रागुक्तशान्तिपठनपूर्वकमाह । (R.K.)

(2) वरुणस्य अपत्यं वारुणिः, अधीहि–अध्यापय ।

(3) In Brahmavalli Annamaya etc., five are mentioned, Chakṣus, Srotra and Vāk are not mentioned. Here in Bhriguvalli Vijñānamaya and Ānandamaya are not mentioned but Anna, Prāṇa, Chakṣus, Srotra, Manas and Vāk, these six are mentioned. Here three are common with the earlier list while three are new. However, in VadhulaŚakha eight are mentioned putting together the five of Brahmavalli and the three additional of Bhriguvalli. Therefore, we have to take all eight both in the context of Brahmavalli and Bhriguvalli.

अत्र विज्ञानानन्दौ ग्राह्यौ । पूर्वत्र चक्षुः श्रोत्रवाचः ग्राह्याः । उक्तार्थे समाख्यारूपत्वात् । (S.T.) तथाहि उक्तं वाधूलशाखायाम् । (R.K.)

(4) 'पूर्णदर्शनशक्तित्वात् चक्षुर्मय इतीरितः' इत्यैतरेयभाष्योक्तरीत्या पूर्णदर्शन-शक्तित्वपूर्णश्रवणशक्तित्वपूर्णवक्तृत्वशक्तिरूपाः । (R.K.)

(5) अत्तृत्वात् अन्नं प्रकृष्टचेष्टकत्वात् प्राणं चष्टे इति चक्षुः, श्रवणात् श्रोत्रं मन्तृत्वात् मनः, वक्तृत्वात् वाक्, विवेचनात् विज्ञानं, आनन्दरूपत्वादानन्दं एतन्नामकं ब्रह्मेत्युवाच । (S.T.)

(6) जीवन्ति चेष्टन्ते, यत् प्रयन्ति प्रलये, यदभि स्वेच्छया संविशन्ति मुक्तौ । (S.T.)

(7) तद्विजिज्ञासस्व–तद्विषयकश्रवणमनननिदिध्यासनरूपजिज्ञासां कुरु । (R.K.) न श्रवणमात्रेण कृती भवान् श्रवणमात्रस्य ब्रह्मसाक्षात्कारासाधनत्वात् साक्षात्कारस्यैव मोक्षहेतुत्वात् अतः तत्साधनीभूतजिज्ञासां कुरु इत्यर्थः । (S.T.)

(8) चक्षुः स चष्टे यद्विष्णुः श्रोत्रं श्रोतृत्वतो विभुः ।
वाक् वक्तृत्वतो नित्यं मनोमन्तृत्वतस्तथा ।
तपो ज्ञानस्वरूपत्वात् विज्ञानं तु विवेचनात् ॥
ज्ञानानुसन्धानरूपतपसा तं जनार्दनम् ।
क्रमाद् भृगुः व्यजानात् तमन्नादिबहुरूपिणम् ॥ (M.B.)

[III-2] Expl. (1) On the instruction from Varuṇa Bhrigu commences his meditation here.

(2) तप आलोचनं, आलोचनं कृत्वा अन्नमयं अनिरुद्धं ब्रह्मेति व्यजानात् साक्षात् कृतवान्, अन्नात्-अन्नमयात्, द्वितीयरूपमपि साक्षात् कर्तुं गुर्वनुज्ञार्थं पुनर्गुरुमुपसाद्य अनुज्ञामादाय तपः शब्दितं आलोचनं कृत्वा प्राणमयाख्यं द्वितीयं प्रद्युम्नरूपं अपरोक्षीकृतवान् । (R.K.)

(3) अधीहि–अनुज्ञां देहि, तपसा-ज्ञानानुसन्धानरूपालोचनेन । (R.K.)

(4) एवमुपदिष्टाष्टरूपः भृगुः युगपत् सर्वस्य साक्षात् कर्तुं अशक्यत्वात् आदौ अन्ननामकभगवत्साक्षात्काराय तपः मनननिदिध्यासनरूपं अतप्यत ।

(5) अन्नादिरूपाष्टकमपि पुनरधीहि–अनुजानीहि । तत्र अनुजानीहि इति वक्तव्ये यदधीहि इति वदति तदहंकारनिरासार्थम् । यथोक्तमनुव्याख्याने ।

दृष्ट्वैकैकं स्वरूपं तु समस्तोक्तानुदर्शनम् ।
इच्छतान्नां गुरोः प्राप्य तपसैवापरोक्षितम् ॥

एवमुपसरणानन्तरं पुनः वरुणः अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमितीत्येवं विज्ञानानन्दसहितम् अन्नादिरूपाष्टकमपि पुनरादिशच्चेति ग्राह्यम् । कुत इति व्याख्येयमिति चेत् । उच्यते । एतदवष्टम्भेनैव लिङ्गाच्चेति सूत्रे श्रवणाद्यावृत्तेः कर्तव्यतायाः सूत्रकारेण साधितत्वात् । उक्तं च तत्वप्रकाशिकायाम् । श्रुतान्नादिरूपविषये भृगोः पुनः पुनः प्रश्नात् । तथैव वरुणोक्तेश्च । अत एवान्नादिशच्चेति पूर्वटीकाकारैः पूरित-मित्यवगन्तव्यम् ।

Varuṇa taught all the eight forms of the Supreme God. Bhrigu meditated upon these forms one by one and comprehended. But every time he returned to the father, the father taught all and asked him to meditate. This way of explanation is necessary, because, this even is quoted in support of the repetition of श्रवण etc., in the Sūtra 'लिङ्गाच्च'.

[III-3] Expl. (1) Bhrigu understood Prāṇamaya form in the second step and requested the father to permit him to meditate further.

(2) तपो ब्रह्म ज्ञानरूपं ब्रह्मेत्यर्थः । तपसः ब्रह्मज्ञानहेतुत्वात् तपो ब्रह्मेत्यभेदोपचारः इति ग्रन्थान्तरे ।

(3) एवं प्राणमयप्रकरणानन्तरं चक्षुर्मय श्रोत्रमय वाङ्मयप्रकरणानि यथोद्देशं ध्येयानि । त्रीणि रूपाणि कानीत्याकांक्षायां प्राङ्गैरुपदेष्टव्यानि । (R.K.)

(4) ब्रह्म तपः ज्ञानस्वरूपमिति ज्ञात्वा विजिज्ञासस्वेति सम्बन्धः । एवमेव उत्तरत्रापि योजना । (S.T.)

(5) प्राणादिशब्दाः प्रद्युम्नादिरूपपराः द्रष्टव्याः । एवं चक्षुर्ब्रह्मेति व्यजानात्, श्रोत्रं ब्रह्मेति व्यजानात्, वाचं ब्रह्मेति व्यजानात् इत्यादिकं च ग्राह्यम् । उक्तं चानुव्याख्याने -

तच्च वाधूलशाखायामष्टरूपमुदाहृतम् ।
विज्ञानानन्दसहितं पृथक् सृष्ट्यादिलक्षणैः ॥
आवापोद्वापतः शाखा यतः आहुः परंपदम् ॥

[III-4] Expl. (1) The advantages of knowing the lore taught by Varuṇa and practised by Bhrigu are described here.

(2) वरुणेन उपदिष्टा भृगुणा अनुशिष्टा विद्या, व्योम्नि व्योमनिभे हरौ प्रतिष्ठिता तत्परा इति यावत् । ब्रह्मप्रश्नोत्तरत्वात्, ब्रह्मलक्षणात् ब्रह्मशब्दाभ्यासात्, तपसा अपरोक्षीकृतत्वलिङ्गाच्च ।

(3) यः अधिकारी एवमुक्तरूपाष्टकं जगज्जन्मादिहेतुत्वलक्षणयुक्तं ब्रह्मत्वेन वेद सः, अन्नवान्–रक्षकत्वेन अन्ननामकविष्णुमान्, तद्रक्ष्यः इति यावत्, अन्नादः– अन्ननामकं हरिं अत्ति उपजीवति इति अन्नादः, प्रजया-शिष्यप्रजया, कीर्त्या च महान् भवति । (R.K.)

(4) अन्नवान्–मुक्तौ अन्ननामकभगवान्, तेन सदा गुप्तः भवतीत्यर्थः, अन्नादः– अन्ननामकं भगवन्तम् अत्ति उपजीवति, सदा तदुपजीवकत्वानुसन्धानवान् भवति, प्रजया–प्रकृष्टत्वेन जननात् नित्योदिततया स्थितत्वात् प्रजेति ज्ञानम्, पशुभिः–पान्ति शं साधनं चेति पशवः वेदाः तैः, ब्रह्मवर्चसेन–ब्रह्मणः विष्णोः वरुणादेव सम्यक् चायितम् अभिवृद्धं यत् स्वरूपं तेजः तद् ब्रह्मवर्चसं तेन महान् भवति, संसृतौ अल्पं अल्पतेजश्च जीवरूपं भगवान् मुक्तौ महन्महातेजश्च करोतीति हि ।

अल्पतेजस्तथैवाल्पं जीवरूपं हि संसृतौ ।
तदेव समुहत्तेजः करोतीशो महत्तदा ॥

इति प्रमाणप्रसिद्धम् । कीर्त्या च महान् भवति । लौकिकफलेप्सूनां एतज्ज्ञानात् प्रसिद्धप्रजादिकमपि फलं यथायोग्यं भवतीत्यपि व्याख्येयम् ।

[III-5] Expl. (1) The enjoyer and the enjoyed roles of the Supreme God are described here.

(2) अन्नं भगवन्तं न निंद्यात्, प्राणः देहस्थप्राणगतः प्राणनामा हरिः, अन्नं वै अन्ननामकः, शरीरं-शरः जीवः तं ईरयति प्रेरयतीति शरीरं जीवप्रेरकं जीवस्थं रूपं, अन्नादं-अन्नाख्यरूपानुभवितृ ।

(3) तदेतद्रूपद्वयं अन्योन्यं अन्नं अन्ने प्रतिष्ठितं च । अन्योन्यभोग्य-भोक्तृत्वशब्दितमन्योन्यप्रतिष्ठितत्वं लीलया हरेः युक्तम्, अन्नं न परिचक्षीत-अन्नाख्य भगवत्परिवर्जनं न कार्यम् । (R.K.)

(4) अन्ननामकं भगवन्तं न निंद्यात् दोषित्वनिर्गुणत्व अल्पगुणित्वादिना निन्दां न कुर्यात् । प्रकृष्टानन्दबलवत्वेन प्राणनामा विष्णुः अन्नं भोग्यः, शरीरं-शीर्यते देहनाशेन नश्यति इति शरः जीवः तं ईरयति प्रेरयति इति शरीरं तच्छब्दवाच्यरूपम् अन्नादं भोक्तृ ।

(5) प्राणे तदाख्ये रूपे भोग्ये सति शरीरं तन्नामकं रूपं भोक्तृतया प्रतिष्ठितम् । शरीरे तन्नामके रूपे भोग्ये सति प्राणः तन्नामाविष्णुः भोक्तृतया प्रतिष्ठितः । अन्नं न परिचक्षीत न निराकुर्यात् निराकरणं च अयोग्येषु उपदेशः ।

[III-6] Expl. (1) The enjoyer and enjoyed roles of Ap, Jyotih, Prithivi and Ākāśa are described here.

(2) अन्नं बहुकुर्वीत-बहुगुणकर्मवत्वेन अन्ननामकं प्रतिपादयेत् इति यावत् । (R.K.)

(3) आपालनात् आपः, ज्योतिः प्रकाशरूपत्वात्, एवमेव ज्योतिरन्नं आपो वा अन्नादाः इत्यपि द्रष्टव्यम् । अप्सु भोग्यभूतासु सतीषु ज्योतिः प्रतिष्ठितं भोक्तृतया । ज्योतिषि भोग्ये सति आपः भोक्तृतया ।

(4) पृथुत्वात् पृथिवीनामकं रूपं, आकाशः—सर्ववेत्तृत्वात् तन्नामकं रूपम् । आकाशः अन्नं पृथिवी अन्नादा इत्यपि ग्राह्यम् । पृथिव्यां भोग्यभूतायां सत्यां आकाशः भोक्तृतया । आकाशे भोग्य सति पृथिवी भोक्तृतया । एकस्यापि भगवतः भोक्तृभोग्यभावः क्रीडया इति न कोपि दोषः इति भाष्ये स्पष्टम् ।

(5) स विष्णुः पृथिवी नामा पृथुत्वात् प्राणनामकः ।
प्रकृष्टानन्दबलतः आकाशः सर्ववेत्तृतः ।
शराख्यदेहिनश्चैव शरीरं प्रेरणात् स्मृतः ।
एतैश्चतुर्भिर्भगवान् रूपैश्च चतुरात्मभिः ।
भोग्यभोक्तृस्वरूपेण तिष्टति क्रीडया स्वयम् ।। (M.B.)

[III-7] Expl. (1) The nature of the vision of the Supreme God in Aparokṣa experience is described here.

(2) विद्यार्थित्वेन आगतस्य वासविषये कमपि न प्रत्याचक्षीत प्रत्याख्यानं न कार्यम्, बहु अन्नम्—बहुतरां भगवद्विद्याम् अतिप्रयत्नेन विहितप्रकारेण प्राप्नुयात्, अन्नम्—अन्नाख्यं भगवद्रूपम्, अराधिसिद्धं भवति ।

(3) मुखतः—बाल्यमारभ्य बाल्ये वयसि एतदन्नाख्यं रूपं राद्धं सिद्धं तीव्रोपासनया विज्ञातं चेत् अस्मै उपासकाय मुखतः पादमारभ्य अन्नाख्यं रूपं राध्यते सिद्धयति । पादावारभ्य शिरः पर्यन्तं सर्वावयवोपेतं रूपं दृश्यते । अतो बाल्य एव प्रयत्नः कार्यः ।

मध्यतः—मध्ये वयसि राद्धं उपासनया येन विज्ञातं अस्मै मध्यावयवः हरेः उपलक्ष्यते, अन्यदङ्गजातं तेजोमण्डलवदेव दृश्यते । अन्ततः—चरमवयसि येन राद्धं उपासनया ज्ञातं अस्मै अन्ततः पादावेव राध्येते उपलक्ष्येते । अन्यत् सर्वं तेजोमण्डलवदेव दृश्यते ।

यः अधिकारी वेद सोऽपि भगवदुपासनया तद्दृष्टिं लभते । (R.K.)

(4) वसतौ-गुरुकुलवासेच्छया आगतम्, यया कया च विधया-येन केनापि विहितप्रकारेण गुरुसेवादिरूपातियत्नेन यद्वा बहुभ्यः गुरुभ्यः बहुधाश्रवणरूपाति-यत्नेन, अन्नम्-भगवन्तम्, बहुपूर्णम् । (S.T.)

(5) विद्युद्वन्मानुषा विद्युः सूर्यमण्डलवत्सुराः ।
प्रतिबिम्बवच्च गिरिशः ब्रह्मैनं पश्यति स्फुटम् । (M.B.)

[III-8] Expl. (1) A seeker is advised to meditate upon the forms of the Supreme God present in the body and the deities here. The names given indicate the favour made by the respective forms.

(2) क्षेमकृत्वहेतुना क्षेमनामकः हरिः वाचि अस्तीति उपासीत, काम्ययोजकत्व-हेतुना योगनामा देहगतप्राणे, क्षेमकृत्त्वेन क्षेमनामा अपाने, कर्मकृत्वेन कर्मनामा हस्तयोः, गतिदत्वेन गतिनामा पादयोः, विसर्गदत्वेन विमुक्त्याख्यः पायौ । मानुषीः मनुष्यदेहसम्बन्धिन्यः समाज्ञाः उपास्तयः । (R.K.)

(3) तृप्तिदत्वेन तृप्तिनामा हरिः वृष्टौ वृष्ट्यभिमानिनि पर्जन्ये अस्तीति उपासीत । बलदत्वेन बलनामा विद्युदभिमानिनि वायौ, यशः प्रदत्वेनहेतुना यशोनामा पशुषु–यज्ञपश्वाभिमानिनि दक्षप्रजापतौ, प्रजातिः–पुत्रः, अमृतं–सन्ततिपरम्परा, आनन्दः–सुखम्, प्रजा सन्तत्या आनन्दप्रदातृत्वात् प्रजातिरित्यादिनामकः सन् उपस्थे–उपस्थाभि-मानिनि शिवे अस्तीत्यर्थः सर्वदत्वेन सर्वनामा सन् आकाशे प्रकृतौ अस्ति । (R.K.)

(4) वृष्टौ–तदभिमानिनि पर्जन्ये तन्नामके आदित्ये, नक्षत्रेषु–अश्विन्यादिषु, सर्वं–सत्ताप्रतीत्यादि सर्वप्रदत्वात् सर्वनामकम् । (S.T.)

(5) क्षेमकृत्वात् क्षेमनामा वाचिस्थः स परो हरिः ।
योगनामा तथा प्राणे सर्वकामनियोजनात् ॥
क्षेमनामा क्षेमकृत्वादपाने हि हरिः स्वयम् ।
कर्मनामा हस्तगतः कर्मकृत्वाज्जनार्दनः ॥
गतिदत्वाद्गतिर्नामा पादस्थः पुरुषोत्तमः ।
विसर्गकृद्विमुक्त्याख्यः पायुस्थः परमो विभुः ॥
अध्यात्मस्थ इति प्रोक्तोऽथाधिदैवगतं शृणु ।
पर्जन्ये तृप्तिनामासौ तृप्तिदत्वाज्जनार्दनः ।
वायौ च बलनामा च बलदत्वात् सदैव हि ॥
यशः प्रदत्वात् दक्षे तु यशः पश्वभिमानिनि ।
नक्षत्रेषु ज्योतिराख्यो ज्योतिदातृत्वतो हरिः ।
उपस्थमानिनि शिवे प्राजात्यानन्दसन्ततेः ॥
दातृत्वात् तत्तदाख्योऽसौ सन्ततिस्त्वमृतं स्मृतम् ।
सर्वं सर्वप्रदत्वात्तु प्रकृतौ पुरुषोत्तमः ॥ (M.B.)

[III-9] Expl. (1) The meditation of the Supreme God present in prakriti in different ways is described here.

(2) प्रतिष्ठा–तत्तत्पदेषु देवादिस्थापकत्वेन प्रतिष्ठाशब्दवाच्यम्, नम्यत्वात्–सर्वदेवैः स्तुत्यत्वात् नमः, द्विषन्तः–बाह्याः वैरिणः, भ्रातृव्याः–कामक्रोधाद्यान्तराः शत्रवः । (S.T.)

(3) महान् ज्ञानादिना भवति, ब्रह्मवान्-रक्षकत्वेन तद्वान्, स्वयोग्यपूर्तिमान् वा भवति, ब्रह्मणः-विरिञ्चस्य, परिमरः-मारकः ।

(4) स प्रतिष्ठा स्थापकत्वान्मनो मान्यत्वतो हरिः ।
नमो नम्यत्वतो नित्यं महश्चापि महत्त्वतः ॥
विरिञ्चमारकश्चासौ ब्रह्मपूर्णगुणत्वतः । (M.B.)

[III-10] Expl. (1) The liberated Chaturmukhabrahma's experience and joys are described here.

(2) सः यः पुरुषे पुरुषस्थितवागादौ विद्यमानः, यश्चासौ वृष्टिशब्दोक्तादित्ये विद्युदादिषु च स्थितः स एकः परस्परं मूलरूपेण च अत्यन्ताभिन्न एव ।

(3) एवम् अन्नमयादिरूपाष्टकविषयक स्फुटापरोक्षज्ञानवान् ब्रह्मा अस्मात् लोकात् चरमदेहात् प्रेत्य मुक्तः एतमन्नमयमात्मानं अनिरुद्धं प्राणमयं प्रद्युम्नं मनोमयं संकर्षणं विज्ञानमयं वासुदेवं आनन्दमयं नारायणम् उपसंक्रम्य, उपलक्षणमेतत् चक्षुर्मयं श्रोत्रमयं वाङ्मयमित्यपि ग्राह्यम् ।

(4) कामान्नी–अन्नाद्युपलक्षितकामितसमस्तभोगवान् कामरूपीकामितसमस्तरूपी, लुक् प्रकाश इति धातोः प्रकाशरूपत्वात् मुक्ताः लोकशब्देन उच्यन्ते यथोक्तमनुव्याख्याने–

लोकाभिधाश्चापि यतो हि मुक्ताः ।
प्रकाशरूपाः सततं च सर्वे ॥

(5) तान् अनु सम्यक् चारयन् गमयन् नियामयन् यथोक्तमनुव्याख्याने–

मुक्तस्वकीयान्तरयन्त्रतास्ति मुक्तावपि ब्रह्मपुरस्सराणाम् ।

यद्वा इमान् 'स यदिपितृलोककामो भवती'त्यादि–प्रमाणप्रमितान् लोकान् सञ्चरन् सञ्चारयन्, इमान् लोकान् प्रसिद्धान् भूरादीन् सञ्चारयन् अप्रत्यक्षतया तत्र सञ्चारं कुर्वन्नित्यत्यर्थः इत्याहुः ।

(6) अहं अन्नं भोग्यः अद्यः मुक्तस्वावरान् प्रति उपजीव्यत्वात्, अन्नादः–यथेष्टभोगभोक्ता, श्लोककृत्, शिष्येषु भगवदुपदेशेन तत्कीर्तिविस्तारकर्ता । (S.T.)

[III-11] Expl. (1) The fact of Chaturmukha being the prime knower of the glory of the God is explained here.

(2) ऋतस्य ज्ञानरूपस्य हरेः प्रथमजः अहमस्मि, अमृतस्य मुक्तवर्गस्य नाभिः आश्रयः, माः–प्रमाः विष्णुमहिमाप्रतिपादकप्रमाणानि ददाति–भक्तेभ्यः उपदिशति सः इदेव–जीवन्मुक्तदशायां मा-मां अवाः–आगच्छति, 'कार्यं बादरिरस्य गत्युपपत्तेः' इति सूत्रात् ।

(3) अहं अन्नं हरेः । मुक्तस्वावरोपजीव्यत्वाद्वा । अदन्तं जीवजातमहमस्मि मम अन्नं सर्वजीवाः इत्यर्थः सुवर्णज्योतीः–सुवर्णः शोभनोत्तमानन्दरूपः स्वर्णकान्तिश्च हरिः ज्योतिः प्रेरकः अस्य तथोक्तः उपनिषत्–रहस्यम् । (R.K.)

(4) (i) अमृतानां मुक्तानां नाभाइ नाभिः–आश्रयः, यः अधिकारी प्रतीकालम्बनः माः ज्ञानानि विष्णुतत्वविषयकाणि शिष्येभ्यः ददाति उपदिशति सः साधनजनितापरोक्षज्ञानानन्तरं चरमदेहादुत्क्रान्तः सन् अर्चिरादिपथा इत्थमेव अतिनिश्चयेन माम् आगच्छति ।

(ii) अहमन्नं विष्णुना अहमद्यः संहार्यः 'ब्रह्मचर्मशिरःपट्टी' इत्यादिवचनात्,

यद्वा अहमन्नं भोग्यः विष्णुकर्तृकभोगविषयः भगवान् स्वेच्छया गृहीतस्त्रीरूपवता मुक्तब्रह्मणा सह मिथुनीभावेन क्रीडते इति छान्दोग्यभाष्ये अभिहितम् सुवर्णज्योतिः विष्णुः ईः प्रेरकः यस्य सः सुवर्णज्योतीः । (S.T.)

(5) (i) ऋतरूपस्य विष्णोस्तु पुत्रः प्रथमजोह्यहम् ।
देवेभ्यः पूर्वजश्चाहं मुक्तानामाश्रयः सदा ॥
यो ददाति च मां सम्यग् विष्णुतत्त्वप्रदर्शकः ।
स इत्थमेव मां याति विष्णोरन्नमहं सदा ॥
ममान्नं सर्वजीवास्तु भोग्या मम यतस्सदा ।
सर्वमभ्यभवं चाहं गुणैः सर्वैश्च नित्यकैः ॥
सुवर्णो भगवान् विष्णुः ज्योतिः स ममनेरकः ।
योऽहमेवंविदभवं तस्य मे माधवः पतिः ।
इति ब्रह्मा गायमानो मुक्तश्चरति सर्वदा ॥ (M.B.)

(ii) ब्रह्मा हि स्थिरचिद्रूपो बहुलात्मा विशेषतः ।
अन्ये क्रमादबहुलास्तथा चञ्चलतेजसः ।
तस्मात् सम्यङ् न पश्यन्ति हरिं ब्रह्मा तु पश्यति ।
इति हरिवंशवचनाच्च ब्रह्मैवैनं सम्यग् वेद । (M.B.)

॥ इति श्री पाण्डुरङ्गि तम्मण्णाचार्यसूनु कृष्णाचार्यविरचिता श्रीमन्मध्वभाष्यानुसारेण श्रीमत्तैत्तिरीयोपनिषदांग्लभाषा टिप्पणी समाप्ता ॥

॥ श्री ॥

ऐतरेयोपनिषत्

This Upaniṣad is a part of Aitareya Āraṇyaka of Āśvalāyana Śākhā of Ṛgveda. Chapter II and III of this Āraṇyaka constitute Aitareya Upaniṣad. Mahidāsa who is an incarnation of the Supreme God is the deity as well as the Ṛṣi for this Upaniṣad. Ramādevi, Chaturmukhabrahmā are also Ṛṣi. The name Mahidāsa conveys that great personalities like Ramā, Brahmā etc., are His Dāsas. (महिनः दासाः अस्येति महिदासः)

In this Upaniṣad the most secret aspect of the Supreme God i.e., Viṣṇu (Viṣṇurahasya) is described. Therefore, this Upaniṣad is called Mahāvibhūti. The doctrine of Sarvaśabdavāchyatva i.e., all words convey the Supreme God is especially brought out in this Upaniṣad. The importance of Brihatisahasra is brought out. Certain interesting things like bad omens, indications of untimely death, implications of bad dreams etc., are also described here. Ardhanārī Nārāyaṇa form of the God and the Spiritual Significance of each syllable of the name Viṣṇu are also brought out.

Śri Madhvāchārya had a special attachment to this Upaniṣad. He taught this Upaniṣad to his own teacher. While discoursing on this Upaniṣad at Ananteswara temple in Udupi He became invisible in the heap of flowers showered on him by the deities and left for Badarikāśrama.

द्वितीयारण्यके प्रथमोऽध्यायः

हरिःॐ ॥ एष पन्थाः एतत् कर्मैतद् ब्रह्मैतत्सत्यं तस्मान्न प्रमाद्येत् तन्नातीयात् न ह्यत्यायन् पूर्वे येऽत्यायन् ते पराबभूवुः ।

He i.e., Sankarṣaṇa is the Path, he i.e., Aniruddha is Karma, he i.e., Vāsudeva is Brahma, he i.e., Pradyumna is Satya.

Therefore, one should not transgress him, one should not abandon him. The ancients i.e., Ramā and Chaturmukhabrahma did not abandon him. Those who abandon him suffer.

उप–तदुक्तमृषिणा

प्रजा ह तिस्रो अत्यायमीयुः
न्यन्या अर्कमभितो विविश्रे ।
बृहद्ध तस्थौ भुवनेष्वन्तः
पवमानो हरित आविवेशेति ॥

Three transgressed the Supreme God. Among those who did not transgress, men meditated upon Arka i.e., Viṣṇu designated as Arka, sages meditated upon Brihat i.e., Viṣṇu designated as Brihat present in all the worlds, and gods meditated upon Pavamāna i.e., Viṣṇu designated as Pavamāna present in all quarters.

उप–प्रजा ह तिस्रो अत्यायमीयुरिति या वै ता इमाः प्रजास्तिस्रो अत्यायमायंस्तानीमानि वयांसि वङ्गावगधाश्चेरपादाः ॥

The three who transgress the Supreme God are : Piśāchas, Rākṣasās and Asurās.

उप–'न्यन्या अर्कमभितो विविश्रे' इति ता इमाः प्रजा अर्कमभितो निविष्टा इममेवाग्निं बृहद्ध तस्थौ भुवनेष्वन्तारित्यद उ एव बृहद्भुवनेष्वन्तरसावादित्यः ।
'पवमानो हरित आविवेशेति वायुरेव पवमानो दिशो हरित आविष्टः ॥ २-१-१ ॥

Among those who do not transgress the Supreme God, Men meditate upon the God designated as Arka and present in Agni, sages meditate upon the God designated as Brihad present in the worlds, and also designated as Āditya and present in Aditya, gods meditate upon the God designated as Pavamāna and present in all quarters.

UKTHA VIDYA

उप–उक्थमुक्थमिति वै प्रजा वदन्ति तदिदमेवोक्थमियमेव पृथिवीतो हीदं सर्वमुत्तिष्ठति यदिदं किञ्च तस्याग्निरर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते ।

That which the wise designate as 'Uktha' 'Uktha' is this i.e., the Supreme God Viṣṇu. He is present in Prithivi and is designated as Prithivi. It is from Prithivi that all arise. The Suparṇa form of the God present in Garuda and in Agñi and designated as Agñi is Arka i.e., Vāhana of the Supreme God designated as Prithivi. The usual food is the food.

Like aśīti i.e., a set of eighty units of hymns of Brihatīsahasra each unit consisting of three hymns, this food is also enjoyable to him. He is present in Anna and designated as Anna. Therefore, it is enjoyable to him.

उप–अन्तरिक्षमेवोक्थमन्तरिक्षं वा अनुपतन्त्यन्तरिक्षमनुधावयन्ति तस्य वायुरर्को अन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते । असावेव द्यौरुक्थममुतः प्रदानाद्धीदं सर्वमुत्तिष्ठति यदिदं किञ्च तस्यासावादित्योर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमिदमश्नुत इत्यधिदैवतम् ।

The form of the Supreme God Viṣṇu present in Antarikṣa and designated as Antarikṣa is Uktha. It is because of his presence in antarikṣa that the birds fly and horse etc., move in antarikṣa. The Suparṇa form of the Supreme God present in Garuda, and in Vāyu and designated as Vāyu is Arka i.e., Vāhana. The usual food is the food. Like a set of eighty units of the hymns of Brihatīsahasra each unit consisting of three hymns, this food is also enjoyable to him. He is present in anna and designated as Anna. Therefore it is enjoyable to him.

The form of the Supreme God Viṣṇu present in Dyuloka and designated as Dyu is Uktha. It is because of his presence in

Dyuloka that it rains and plants and crops grow. The Suparṇa form of the Supreme God present in Garuda and in Āditya and designated as Āditya is Arka i.e., Vāhana. The usual food is the food. Like a set of eighty units of the hymns of Brihatisahasra each unit consisting of three hymns, this food is also enjoyable to him. He is present in anna and is designated as anna. Therefore, it is enjoyable to him. This is adhidaivata.

उप—अथाध्यात्मं पुरुष एवोक्थमयमेव महान् प्रजापतिरहमुक्थमस्मीति विद्यात् तस्य मुखमेवोक्थं यथा पृथिवी तथा तस्य वागर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते ।

नासिके एवोक्थं यथान्तरिक्षं तथा तस्य प्राणोऽर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते तदेतद् ब्रध्नस्य विष्टपं यदेतन्नासिकायै विनतमिव ।

Now Adhyātma forms of the Supreme God.

The form of the Supreme God present in the body and designated as Puruṣa is Uktha. He is the great creator of all, being present in all parents. He alone knows that he is the creator of all. Therefore, he is Uktha.

Just as Prithivi is Uktha among adhidaivas, his mouth is Uktha among adhyātmas. The Suparṇa form of the Supreme God present in Garuda and in Vāk and designated as Vāk is Arka i.e., Vāhana. The usual food is the food. Like a set of the eighty units of the hymns of Brihatīsahasra each unit consisting of three hymns, this food is also enjoyable. He is present in anna and is designated as anna. Therefore, it is enjoyable to him.

Just as Antarikṣa is Uktha among adhidaivas, his Nāśikā is Uktha among adhyātmas. The Suparṇa form of the Supreme God present in Gāruda and in Prāna and designated as Prāna is Arka i.e., Vāhana. The usual food is the food. Like a set of eighty units of hymns of Brihatīsahasra each unit consisting of three hymns,

GOD ENTERS CHATURMUKHA BRAHMA

उप–तं प्रपदाभ्यां प्रापयत ब्रह्मेमं पुरुषं यत्प्रपदाभ्यां प्रापयत ब्रह्मेमं पुरुषं तस्मात् प्रपदे तस्मात् प्रपदे इत्याचक्षते ।

शफाः खुरा इत्यन्येषां पशूनां तदूर्ध्वमदसर्पत्ता ऊरू अभवतामुरु गृणीहीत्यब्रवीत्तदुदरमभवत्तदुर्वेव मे कुर्वित्यब्रवीत्तदुरोऽभवदुदरं ब्रह्मेति शार्कराक्ष्या उपासते ।

हृदयं ब्रह्मेत्यारुणयो ब्रह्मा हैव ता ३ इ ऊर्ध्वंत्त्वेवोदसर्पत्तच्छिरोऽश्रयत तच्छिरोऽभवत्तच्छिरसः शिरस्त्वं ता एताः शीर्षं च्छ्रियः श्रिताः चक्षुः श्रोत्रं मनो वाक् प्राणः श्रयन्तेऽस्मिंच्छ्रियो य एवमेतच्छिरसः शिरस्त्वं वेद ॥ २-१-३ ॥

Brahma i.e., Vāsudeva came to Chaturmukhabrahmā at prapada i.e., foreparts of the feet. Since Brahma i.e., Vāsudeva came at the foreparts, these are called prapada. The foreparts of all men are also called prapada. In case of animals these are called Sapha or Khura i.e., hoofs. The Brahma i.e., Vāsudeva proceeded further (with Vāyu). Therefore, the portions above the feet were called Ūrū i.e., thighs. Then, he said take me up further, this became Uras i.e., Chest.

The Śārkarakṣyas meditate upon Brahma as Udara. The Āruṇis meditate upon Brahma as Hridaya. These two Brahmas are one and the same.

Then Brahma i.e., Vāsudeva proceeded further and entered into the head (with Vāyu and other gods). The head is called Śiras, because, the God dwells therein. The gods i.e., Chakṣus, Śrotra, Manas, Vāk and Prāṇa dwell in the head of Chaturmukha brahmā. Because of this Śiras is called Śiras. Prosperities will dwell in one who knows this.

SUPERIORITY OF MUKHYAPRĀṆA

उप—ता अहिंसन्ताहमुक्थमस्म्यहमुक्थमस्मीति ता अब्रुवन् हन्तास्माच्छरीरादुत्क्रामाम तद्यस्मिन्नुत्क्रान्त इदं शरीरं पत्स्यति तदुक्थं भविष्यतीति।

वागुदक्रामदवदन्नश्नन् पिबन्नास्तैव चक्षुरुदक्रामदपश्यन्नश्नन् पिबन्नास्तैव श्रोत्रमुदक्रामदशृण्वन्नश्नन् पिबन्नास्तैव मन उदक्रामन्मीलित इवाश्नन् पिबन्नास्तैव प्राण उदक्रामत् तत्प्राण उत्क्रान्तेऽपद्यत।

तदशीर्यताशारीर्ती ३ तच्छरीरमभवत् तच्छरीरस्य शरीरत्वं शीर्यते ह वा अस्य द्विषन् पाप्मा भ्रातृव्यः परास्य द्विषन् पाप्मा भ्रातृव्यो भवति य एवं वेद।

The gods reproached one another saying that I am superior, I am superior. They said: Let us move out of this body, and he on whose departing this body collapses is superior. First Vāk i.e., Agñi the abhimāmi deity of Vāk moved out, but the body speech. The Chakṣus i.e., Sūrya the abhimāni deity of Chakṣus moved out, but the body remained intact eating, drinking without only speech. The chakṣus i.e., Sūrya the abhimāni deity of Chakṣus moved out, but the body remained intact eating, drinking without only seeing. The Śrotra i.e., Chandra the abhimāni deity of Chandra moved out, but the body remained intact eating, drinking without hearing. Manas i.e., Śankara, Śeṣa, Suparṇa and Indra the abhimāni deities of Manas moved out, but the body remained intact eating, drinking with drowsing as it were. The Prāṇa moved out, then, the body of Chaturmukhabrahmā collapsed. Śarīra is called Śrīra because it collapses. The sin that is like an enemy and a companion like a brother of a person who knows the above will vanish. The enemy who hates and who is sinful will also vanish.

उप—ता अहिंसन्तैवाहमुक्थमस्म्यहमुक्थमस्मीति ता अब्रुवन् हन्तेदं पुनः शरीरं प्रविशाम तद्यस्मिन्नः प्रपन्न इदं शरीरमुत्थास्यति तदुक्थं भविष्यतीति

वाक् प्राविशदशयदेव चक्षुः प्राविशदशयदेव मनः प्राविशदशयदेव प्राणः प्राविशत् तत्प्राणे प्रपन्न उदतिष्ठत् तदुक्थमभवत् तदेतदुक्थं प्राण एव प्राण उक्थमित्येव विद्यात् तं देवा अब्रुवन् त्वमुक्थमसि त्वमिदं सर्वमसि तव वयं स्मस्त्वमस्माकमसीति तदप्येतदृषिणोक्तं त्वमस्माकं तव स्मसीति ॥२-१-४॥

The gods reproached one another again saying that I am superior, I am superior. They said in dispair: Let us enter into this body of Chaturmukhabrahmā. He, among us, on whose entry this body rises is superior. The Vāk i.e., the abhimāni deity of Vāk entered but the body remained lying, the chakṣus entered but the body remained lying, Manas entered but the body remained lying, Prāṇa entered, the body arose, hence, Prāṇa is superior.

Prāṇa on whose departure the body collapsed and on whose entry the body arose is superior. One should know that Prāṇa is superior. The gods said: O Prāṇa! You are superior, you regulate all our functions such as speech, seeing, etc. We are all your servants and you are our master. This is stated by the sage 'you are our master and we are your servants.'

उप–तं देवाः प्राणयन्त स प्रणीतः प्रातायत प्रातायतीं ३ तत्प्रातरभवत् समागादितीं ३ तत्सायमभवदहरेव प्राणो रात्रिरपानो वागग्निश्चक्षुरसावादित्यश्चन्द्रमा मनो दिशः श्रोत्रं स एष प्रहितां संयोगोऽध्यात्ममिमा देवता अद उ आविरधिदैवतमित्येतत्तदुक्तं भवत्येतद्ध स्म वा ॥

The gods (who heard the glory of the Supreme Lord from Vāyu) taught the glory of the Supreme God and that of Vāyu to their disciples and their disciples. Thus taught, the Vāyu entered into them. Because he entered and extended into them. Because he entered and extended into them he is called Prātah. He is also called 'Sāyam' because he joined them. Similarly, Ahan is Prāṇa and Rātri is Apāna. Vāk is Agni, Chakṣus is Āditya, Manas is

Chandrama, Śrotra is Dik. This adhyātma grouping of gods is due to the Supreme God only. These are merely deities. This Visṇu alone is the Supreme God. None else. This is established by all Pramāṇas.

SIGNIFICANCE OF THE NAME SATYA

उप–एतद्धिद्वानाह हिरण्यदन् वैदो न तस्येशे यं मह्यं न दद्युरिति प्रहितां वा अहं अध्यात्मं संयोगं निविष्टं वेदैतद्ध तदनीशानानि ह वा अस्मै भूतानि बलिं हरन्ति य एवं वेद तत्सत्यं सदिति प्राणस्तीत्यन्नं यमित्यसावादित्यस्तदेतत् त्रिवृत् त्रिवृदिव वै चक्षुः शुक्लं कृष्णं कनीनिकेति स यदि ह वा अपि मृषा वदति सत्यं हैवास्योदितं भवति य एवमेतत् सत्यस्य सत्यत्वं वेद ॥ २-१-५ ॥

One Hiraṇyadan a Vedic Seer who knew the Supremacy of the God said : None can prevent my receiving the desired. I know the entering of gods into the body as directed by the Supreme God. Therefore, others who are lesser than me bring me offerings. These are unable to prevent those who know this from obtaining their desires.

The Supreme God is called Satya. The Prāṇa is called Sat, Anna i.e., Chaturmukhabrahmā is Ti, and Aditya is called 'Ya'. These three together are called Satya. The chakṣus also has three aspects viz., white portion, dark portion and the corner. One who knows that the Supreme God is Satya and these three gods are also called Satya together, his words will be true, even when he does not talk truly.

उप–तस्य वाक् तन्तिः नामानि दामानि तदस्येदं वाचा तन्त्या नामभिर्दामभिः सर्वं सितं सर्वं हीदं नामनी ३ सर्वं वाचाभिवदति वहन्ति हवा एनं तन्तिसम्बद्धा य एवं वेद ।

तस्योष्णिग् लोमानि त्वग् गायत्री त्रिष्टुप् मांसमनुष्टुप् स्नावान्यस्थि जगती पङ्क्तिर्मज्जा प्राणो बृहती स च्छन्दोभिश्छन्नोयच्छन्दोभिश्छन्नस्तस्मा-

च्छन्दांसीत्याचक्षते छादयन्ति ह वा एनं छन्दांसि पापात् कर्मणो यस्यां कस्यांचिद्दिशि कामयते य एवमेतच्छन्दसां छन्दस्त्वं वेद ।

The Speech of the Supreme God viz., the Vedic Speech is a large rope. The names of Brahmā, Rudra, etc., and Brāhmaṇa, Kṣatriya etc., are the threads within that large rope. The entire world is bound by this large rope and the threads within it. All the things in the world have names. The Supreme God Speaks about these with Vedic speech and names. The Vedic deities offer the food to one who knows this. (or the abhimāni deities of Panchabūtas Vighneśa etc., carry him assuming the form of horses.)

The speech of Vāyu viz., the Vedic speech is a large rope. The names of the Vedic deities are the threads within it. The entire world is bound by this large rope i.e., the speech of Vāyu and the threads within it i.e., the names of Vedic deities etc. All the things in the world have names. The Vāyu speaks about these with Vedic speech and names. The Vedic deities offer the food to one who knows this (or the abhimani deities of Panchabhūtas i.e., Vigneśa etc., carry him assuming the form of horses).

The Supreme God's hairs are Uṣṇik, skin is Gāyatri, flesh is Triṣṭup, muscles and bones are Jagati, marrow is Paṅkthi, and Prāna is Brihatī. (Vāyu's hairs are Uṣṇik, skin is Gāyatri, etc. second interpretation is also to be taken). The Supreme God is covered by the chandas Uṣṇik etc. These are called chandas because, the Supreme God is the abode of these, and these cover him. He who knows this will be protected from the sins in the places where he desires remains.

उप–तदुक्तं ऋषिणा ।

अपश्यं गोपामित्येष वै गोपा एष हीदं सर्वं गोपायत्यनिपद्यमानमिति न ह्येष कदाचन संविशत्या च परा च पथिभिश्चरन्तमित्या च ह्येष परा च

पथिभिश्चरति स सध्रीचीः स विषूचीर्वसान इति सध्रीचीश्च ह्येष विषूचीश्च वस्त इमा एव दिश आवरीवर्ति भुवनेष्वन्तरित्येष ह्यन्तर्भुवनेष्वावरीवर्त्यथो आवृतासोऽवतासो न कर्तृभिरिति ।

सर्वं हीदं प्राणेनावृतं सोऽयमाकाशः प्राणेन बृहत्या विष्टब्धः तद्यथा-यमाकाशः प्राणेन बृहत्या विष्टब्ध एवं सर्वाणि भूतान्यापिपीलिकाभ्यः प्राणेन बृहत्या विष्टब्धानीत्येव विद्यात् ॥ २-१-६ ॥

This is stated by a Vedic Seer : I saw the protector. The Supreme God present in Vāyu is the protector. He protects all those who know the Vedic lore. The Supreme God present in Vāyu is never stationary. He never remains passive. He moves inside and outside the Panchabhūtas. He is present in the four quarters and also in between these quarters. He is present in the whole Universe.

Like the wealth hidden by the rich persons the Jīvas are hidden in you. All sentient and non-sentient beings are hidden in Vāyu, Chitprakriti and the Supreme God. The Chitprakriti and Vāyu are supported in Prāṇa i.e., the Supreme God designated as Brihati. All beings from ants onwards are supported by Prāṇa the Supreme God designated as Brihati, Chitprakriti and Vāyu.

GLORY OF THE LIMBS OF THE SUPREME GOD

उप—अथातो विभूतयोऽस्य पुरुषस्य तस्य वाचा सृष्टौ पृथिवीचाग्निश्चा-स्यामोषधयो जायन्तेऽग्निरेनाः स्वदयतीदमाहरतेदमाहरतेत्येवमेतौ वाचं पितरं परिचरतः पृथिवीचाग्निश्च यावदनु पृथिवी यावदन्वग्निस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतयोर्न जीर्यते पृथिव्याश्चाग्नेश्च य एवमेतां वाचो विभूतिं वेद ।

Now the glories of the Supreme God will be described. Prithivi and Agni are created from his mouth. The plants are

produced from the earth. Agni sweetens them saying bring these to me, bring these to me to cook. This way Prithivi and Agni serve the mouth of the Supreme God (present in the mouths of all) the creator of Prithivi and Agñi. He who knows this glory of the mouth of the Supreme God will attain the world in which the Prithivi and Agñi are extended. So long as this world continues to the held by Prithivi and Agñi, he also holds.

उप–प्राणेन सृष्टावन्तरिक्षं च वायुश्चान्तरिक्षं वा अनुचरन्त्यन्तरिक्षमनु शृण्वन्ति वायुरस्मै पुण्यं गन्धमावहत्येवमेतौ प्राणं पितरं परिचरन्तोऽन्तरिक्षं च वायुश्च यावदन्वन्तरिक्षं यावदनु वायुस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतयोर्न जीर्यतेन्तरिक्षस्य च वायोश्च य एवमेतां प्राणस्य विभूतिं वेद ।

Antarikṣa i.e., Vighnesa the abhimāni deity of antarikṣa, and Vāyu i.e., Mukhya Prāṇa are created from Prāna i.e., ghrānendriya of the Supreme God. All beings are enabled to move and hear by Antarikṣa i.e., Vigneṣa, Vāyu brings fragrant smell. In this way Antarikṣa and Vāyu serve their creator i.e., ghrānendriya of the Supreme God. He who knows this glory of ghranendriya of the Supreme God will attain the respective worlds. So long as these worlds continue to be held by Antarikṣa and Vāyu, he also holds.

उप–चक्षुषा सृष्टौ द्यौश्चादित्यश्च द्यौर्हास्मै वृष्टिमन्नाद्यं च सम्प्रयच्छयत्यादित्योऽस्य ज्योतिः प्रकाशं करोत्येवमेतौ चक्षुः पितरं परिचरतो द्यौश्चादित्यश्च यावदनु द्यौर्यावदन्वादित्यस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यंत यावादेतयोर्न जीर्यत दिवश्चादित्यस्य च य एवमेतां चक्षुषो विभूतिं वेद ।

Dyu i.e., the abhimāni deity of Dyu, and Āditya are created from the eye of the Supreme God. Dyu i.e., the abhimāni deity of Dyu provides rain and food to the beings. Āditya provides

light. In this way Dyu and Āditya serve their Creator i.e., chakṣus of the Supreme God. He who knows this glory of the chakṣus of the Supreme God will attain the worlds in which Dyu and Āditya are extended. So long as these worlds continue to be held by Dyu and Āditya, he also holds.

उप—श्रोत्रेण सृष्टा दिशश्चन्द्रमाश्च दिग्भ्यो हैनमायन्ती ३ दिग्भ्यो विभृणोति चन्द्रमा अस्मै पूर्वपक्षापरपक्षान् विचिनोति पुण्याय कर्मणे एवमेते श्रोत्रं पितरं परिचरन्ति दिशश्च चन्द्रमाश्च यावदनु दिशो यावदनु चन्द्रमास्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतेषां न जीर्यते दिशां च चन्द्रमसश्च य एवमेतां श्रोत्रस्य विभूतिं वेद।

मनसा सृष्टा आपश्च वरुणश्चापो हास्मै श्रद्धां सन्नमन्ते पुण्याय कर्मणे वरुणोऽस्य प्रजां धर्मेण दाधारैवमेते मनः पितरं परिचरन्त्यापश्च वरुणश्च यावदन्वापो यावदनु वरुणः तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतेषां न जीर्यतेऽषां च वरुणस्य च य एवमेतां मनसो विभूतिं वेद ॥ २-१-७ ॥

The Quarters i.e., abhimāni deities of Quarters Mitra, Yama, Varuṇa, Kubera, and Chandramas are created from śrotra of the Supreme God. One is enabled to hear the sound by the Diks i.e., abhimāni deities of Diks. The sounds of Veeṇā, Veṇu, Mridanga etc, come to the Supreme God present in the śrotra of the jīva through the quarters. The Supreme God especially hears these sounds being present in the ear of the Jīvas. The chandramā causes the first and the latter half of the month to enable the Jīvas to perform the rituals of the respective times. In this way the abhimāni deities of the quarters and chandrama serve their creator i.e., the srotrendriya of the Supreme God. He who knows this glory of the śrotra of the Supreme God will attain the worlds in which abhimāni deities of śrotra and chandramā are extended.

So long as these worlds continue to be held by śrotra and chandramā he also holds.

The Ap i.e., the abhimāni deities of Ap i.e.; Brahmā, Vāyu, Śeṣa etc, all deities, and Varuṇa are created from Manas of the Supreme God. The Ap i.e., abhimāni deities of Ap give faith to the Jīvas in order to enable them to do the good deeds. Varuṇa enables the people to perform the holy deeds to please the Supreme God. In this way Ap i.e., the abhimāni deities of Ap and Varuṇa serve their creator i.e., Manas of the Supreme God. He who knows this glory of the Supreme God will attain the worlds in which the abhimāni deities of Ap and Varuṇa are extended. So long as these worlds continue to be held by Ap and Varuṇa he also holds.

उप–आपाः ३ इत्याप इति तदिदमाप एवेदं वै मूलमदस्तूलमयं पितैते पुत्रा यत्र ह क च पुत्रस्य तत्पितुर्यत्र वा पितुस्तद्वा पुत्रस्येत्येतत्तदुक्तं भवति।

एतद्ध स्म वै तद्विद्वानाह महिदास ऐतरेय आहं मां देवेभ्यो वेदा ओ मद्देवान् वेदेतः प्रदाना ह्येतः इतःसंभृता इति।

स एष गिरिश्चक्षुः श्रोत्रं मनो वाक् प्राणः तं ब्रह्मगिरिरित्याचक्षते गिरति ह वै द्विषन्तं पाप्मानं भ्रातृव्यं परास्य द्विषन् पाप्मा भ्रातृव्यो भवति य एवं वेद।

Goddess Ramā asks Mahidasa : why these Brahmā, Vāyu, Śeṣa etc, gods are called 'Apah'? Mahidasa replies : yes, these are called 'Apah', because, I am called 'Apah' as I possess all attributes. I (the Brahman) am the source of the entire universe. All others viz., chaturmukhabrahmā etc. arise from me. The Brahman is the father, the chaturmukha brahmā etc. gods are children. Whatever belongs to the children that belongs to the father and whatever belongs to the father that belongs to children. Thus, your question is answered.

Mahidasa the son of Itarā who possessed eternal knowledge said this: I know all from myself to all other gods, and from all other gods to myself. These gods owe their positions to me. The very existence, understanding and functioning of these is due to me. These are brought up by me. (by providing knowledge, activity, strength etc.)

The Supreme God is designated as Giri, Chakṣus, Śrotra, Manas, Vāk and Prāṇa (indicating the respective attributes). He is designated as Brahmagiri.

He who knows this will get rid of his past deeds that accompany one like an evil enemy. His outside enemy also perishes.

उप—स एषोऽसुः स एष प्राणः स एष भूतिश्चाभूतिश्च तं भूतिरिति देवा उपासाञ्चक्रिरे ते बभूवुस्तस्माद्धाप्येतर्हि सुप्तो भूर्भूरित्येव प्रश्वसित्यभूतिरित्य-सुरास्ते ह पराबभूवुर्भवत्यात्मना परास्य द्विषन् पाप्मा भ्रातृव्यो भवति य एवं वेद ।

The god Vāyu meditated upon the Supreme God as Asu the destroyer of all, Prāṇa possessed of infinite bliss, Bhūti possessed of infinite knowledge and glory, Abhūti giver of ignorance to Asuras. By such meditation they attained bliss, knowledge etc. That is why Vāyu present in a sleeping person praises the God as 'bhūh' 'bhūh.' Asuras meditate upon the God as Abhuti giver of ignorance and devoid of any glory. Therefore, the Asuras go down.

He who knows this will obtain knowledge, glory etc., with the grace of God. The enemy of such a person who hates him and who is evil minded goes down.

उप—स एष मृत्युश्चैवामृतं च तदुक्तं ऋषिणा 'अपाङ्प्राङेति स्वधया गृभीत' इत्यपानेन ह्ययं यतः प्राणो न पराङ् भवति 'अमर्त्यो मर्त्येना

सयोनि'रित्येतेन हीदं सर्वं सयोनि मर्त्यानि हीमानि शरीराणी ३ अमृतैषा देवता 'ता शश्वन्ता विषूचीना वियन्ता न्यन्यं चिक्युः न निचिन्वन्ति हैवेमानि शरीराणी ३ अमृतैवैषा देवताऽमृतो ह वा अमुष्मिन् लोके सम्भवत्यमृतः सर्वेभ्यो ददृशे य एवं वेद य एवं वेद ॥ २-१-८ ॥

The Supreme God causes life and death, transmigration and liberation. This is stated by the seer in the hymn 'apāṅ prāṅ' etc.

The Vāyu directed by the Supreme God moves below as 'apāna' and moves up as 'Prāṇa'. The Vāyu in his Prāṇa and Apāna forms is regulated by the God and therefore, does not go out of the body.

The Vāyu whose knowledge never disappears remains in the perishable bodies with the grace of the God. The bodies are the abode of Vāyu. The bodies are perishable while Prāṇa is eternal.

The two i.e., Vāyu and the body are ever present (the bodies are assumed one after the other, and Vāyu is also found in each kalpa). The paths of these two are different and opposite. The body is observed but Vāyu is not observed. Vāyu is eternal. He who knows this will attain liberation and remain in Vaikuntha. He will be observed by all who are liberated earlier.

इत्यैतरेयोपनिषत्सु द्वितीयारण्यके प्रथमोऽध्यायः

द्वितीयारण्यके द्वितीयोऽध्यायः

उप- य एष इमं लोकमभ्यार्चत् पुरुषरूपेण य एष तपति प्राणो वाव तदभ्यार्चत् प्राणो ह्येष य एष तपति तं शतं वर्षाण्यभ्यार्चत् तस्माच्छतं वर्षाणि पुरुषायुषो भवन्ति तं यच्छतं वर्षाण्यभ्यार्चत् तस्माच्छतार्चिन-स्तस्माच्छतार्चिन इत्याचक्षत एतमेव सन्तं स इदं सर्वं मध्यतो दधे यदिदं किञ्च स यदिदं सर्वं मध्यतो दधे यदिदं किञ्च तस्मान्माध्यमा-स्तस्मान्माध्यमा इत्यचक्षते ।

The Supreme God entered into the body of Jivas (with Lakṣmī and Vāyu) as antaryamin. The Supreme God shines in Sūryamaṇḍala. He is Prāṇa i.e., Nārāyaṇa. Prāṇa entered into the bodies of Jīvas, he shines in Sūryamaṇḍala. He entered into the bodies for hundred years. Therefore, the duration of the life of men is hundred years. As he remains in the bodies for hundred years he is designated as Śatārchin, he is called as śatārchin.

The Supreme God holds the Jīvas in his belly. He also holds them being within them. Therefore he is designated as Mādhyama, he is called Mādhyama.

NAMES OF THE SAGES ARE THE NAMES OF THE GOD

उप- एतमेव सन्तं प्राणो वै गृत्सोऽपानो मदः सः यत् प्राणो गृत्सोऽपानो मदस्तस्माद् गृत्समदस्तस्माद् गृत्समद इत्याचक्षत एतमेव सन्तं तस्येदं विश्वं मित्रमासीद्यदिदं किञ्च तद्यदस्येदं विश्वं मित्रमासीद्यदिदं किञ्च तस्माद्विश्वामित्रस्तस्माद्विश्वामित्र इत्याचक्षते ।

एतमेव सन्तं तं देवा अब्रुवन्नयं वै नः सर्वेषां वाम इति तं यद्देवा अब्रुवन्नयं वै नः सर्वेषां वाम इति तस्माद्वामदेवस्तस्माद्वामदेव इत्याचक्षते ।

एतमेव सन्तं स इदं पाप्मनोऽत्रायत यदिदं किञ्च स यदिदं सर्वं पाप्मनोऽत्रायत यदिदं किञ्च तस्मादत्रयस्तस्मादत्रय इत्याचक्षत एतमेव सन्तम् ॥ २-२-१ ॥

The Supreme God present in Prāṇa and called Prāṇa is Gritsa, present in Apāna and called Apāna is Mada. Therefore he is called Gritsamada.

The whole universe is liked by the Supreme God. Therefore he is called Viśvāmitra. The gods said that the Supreme God is Vāma i.e., auspicious to all of us. Therefore, he is called Vāmadeva. The Supreme God protects all from evil activities. Therefore, he is called Atri.

उप– एष उ एव बिभ्रद्वाजः प्रजा वै वाजस्ता एष बिभर्ति यद्बिभर्ति तस्माद् भारद्वाजः तस्माद् भारद्वाज इत्याचक्षत।

एतमेव सन्तं तं देवा अब्रुवन्नयं वै नः सर्वेषां वसिष्ठ इति तं यद्देवा अब्रुवन्नयं वै नः सर्वेषां वसिष्ठ इति तस्माद् वसिष्ठः तस्माद् वसिष्ठ इत्याचक्षत।

एतमेव सन्तं स इदं सर्वमभिप्रागाद्यदिदं किञ्च स यदिदं सर्वमभि-प्रागाद्यदिदं किञ्च तस्मात् प्रगाथाः तस्मात् प्रगाथा इत्याचक्षत।

एतमेव सन्तं स इदं सर्वमभ्यपवयत यदिदं किञ्च स यदिदं सर्वमभ्य-पवयत यदिदं किञ्च तस्मात् पावमान्यस्तस्मात् पावमान्य इत्याचक्षत।

एतमेव सन्तं सोऽब्रवीदहमिदं सर्वमसानि यच्च क्षुद्रं यच्च महदिति ते क्षुद्रसूक्ताश्चाभवन् महासूक्ताश्च तस्मात् क्षुद्रसूक्तास्तस्मात् क्षुद्रसूक्ता इत्याचक्षते।

The Supreme God supports the beings. The beings are called Vājas, he supports them. Therefore, he is called Bhāradvāja, he is called Bhāradvāja.

The gods said : the Supreme God resides everywhere independently. Since the gods called him Vasiṣṭha i.e., he who resides everywhere independently, he is designated as Vasiṣṭha.

The Supreme God recited the entire Veda. As he recited the entire Veda he is called Pragāthā, he is called Pragāthā.

The Supreme God purifies all. Therefore, he is called Pāvamānya, he is called Pāvamānya.

The Supreme God said : I will remain in all, in the small and in the big. Therefore, the forms of the God in the small are called Kṣudrasūkta, and the forms of the God present in the big are called Mahāsūkta. These are called Kṣudrasūkta and Mahāsūkta.

SŪKTA, RIK, AKṢARA etc., ARE ALSO THE NAMES OF THE GOD

उप– एतमेव सन्तं सूक्तं बतावोचतेति तत्सूक्तमभवत् तस्मात् सूक्तमित्याचक्षते ।

एतमेव सन्तमेष वा ऋगेष ह्येभ्यः सर्वेभ्यो भूतेभ्योऽर्चत स यदेभ्यः सर्वेभ्यो भूतेभ्योऽर्चत तस्मादृक् तस्मादृगित्याचक्षते ।

एतमेव सन्तमेष वा अर्धर्च एष ह्येभ्यः सर्वेभ्योऽर्द्धेभ्योऽर्चत स यदेभ्यः सर्वेभ्योऽर्द्धेभ्योऽर्चत तस्मादर्धर्चस्तस्मादर्धर्च इत्याचक्षते ।

एतमेव सन्तमेष वै पदमेष हीमानि सर्वाणि भूतानि पादि स यदिमानि भूतानि पादि तस्मात् पदं तस्मात् पदमित्याचक्षते ।

एतमेव सन्तमेष वा अक्षरमेष ह्येभ्यः सर्वेभ्यो भूतेभ्यः क्षरति न चैनमतिक्षरन्ति स यदेभ्यः सर्वेभ्यः भूतेभ्यः क्षरति न चैनमतिक्षरन्ति तस्मादक्षरं तस्मादक्षरमित्याचक्षते ।

एतमेव सन्तं ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषाः एकैव व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्यात् ॥ २-२-२ ॥

The Supreme God taught the Vedas to chaturmukhabrahmā etc., Therefore, he is called Sūkta.

The Supreme God is Rik. He moves away from the living beings when these die. Therefore he is called Rik. He is called Ardhircha as he moves from their bodies. He is called Pada as all beings approach him. He is called Akṣara as he bestows the desires of all.

All Riks convey him. All Vedas convey him. All sounds such as those of sea, cloud, drumbeating etc., also convey him. He is one who is conveyed by all. All Riks especially convey Prāṇa i.e., Nārāyaṇa.

AHAM, TVAM, ETC., ARE ALSO THE NAMES OF THE GOD

उप– स होवाच त्वामेव जानीयामिति तमिन्द्र उवाच प्राणो वा अहमस्मि ऋषे प्राणस्त्वं प्राणस्सर्वाणि भूतानि प्राणो ह्येष य एष तपति स एतेन रूपेण सर्वा दिशो विष्टोऽस्मि तस्य मेऽन्नं मित्रं दक्षिणं तद्वैश्वामित्रमेष तपन्नेवास्मीति होवाच ॥ २-२-३ ॥

I, Viśvāmitra would like to know you who is in Indra and your special attributes. Then, the Supreme God present in Indra said : I am designated as Prāṇa, Aham, Asmi, Tvam, Sarva and Sarvabhūta. It is Prāṇa who is present in the sun and shines. By this form I have pervaded all quarters. Ann i.e., the abhimāni deity of Ann i.e., Lakṣmi is my wife. She is called Dakṣiṇā as she is on my right side. The Anna referred to here is Brihatisahasra seen by Viśvāmitra. I am the same as one who is in the sun and shines.

THE COMPOSITION OF BRIHATISAHASRA

उप– तद्वा इदं बृहतीसहस्रं सम्पन्नं तस्य यानि व्यञ्जनानि तच्छरीरं यो घोषः स आत्मा य ऊष्माणः स प्राणः एतद्धस्म वै तद्विद्वान् वसिष्ठो वसिष्ठो बभूव तत एतन्नामधेयं लेभ एतदुहैवेन्द्रो विश्वामित्राय प्रोवाचैतदुहैवेन्द्रो भरद्वाजाय प्रोवाच तस्मात् स तेन बन्धुना यज्ञेषु हूयते ।

तद्वा इदं बृहतीसहस्रं सम्पन्नं तस्य वा एतस्य बृहतीसहस्रस्य सम्पन्नस्य षट्त्रिंशतमक्षराणां सहस्राणि भवन्ति तावन्ति शतसंवत्सरस्याह्नां सहस्राणि व्यञ्जनैरेव रात्रीराप्नुवन्ति स्वरैरहानि ।

When the hymns consisting of thirty-six thousand syllables are brought together it is brihatisahasra (these need not be one thousand hymns in Brihati metre only). The consonants in these hymns constitute the body, the ghoṣa syllables i.e., ya, ra, la, va are the Ātman, the ūṣmā syllables i.e., śa, ṣa, sa, ha are Prāṇa. He who knew this became Vasiṣṭha. He got this name.

Indra told this to Viśvāmitra, to Bhāradwāja. Therefore, Indra is invited at the sacrifice by the grace of the Supreme God.

The Brihatisahasra consists of thirty-six thousand consonants and thirty-six thousand vowels. The days of hundred years are of the same thousand. One obtains the results of the meditation of the abhimāni deities of night by reciting the consonants of Brihatisahasra and that of the abhimāni deities of the days by reciting the vowels of Brihatisahasra.

उप– तद्वा इदं बृहतीसहस्रं सम्पन्नं तस्य वा एतस्य बृहतीसहस्रस्य सम्पन्नस्य परस्तात् प्रज्ञामयो देवतामयो ब्रह्ममयोऽमृतमयः सम्भूय देवता अप्येति य एवं वेद ।

तद्योऽहं सोऽसौ योऽसौ सोऽहं तदुक्तमृषिणा सूर्य आत्मा जगतस्तस्थुषश्चेत्येतदुहैवोपेक्षेतोपेक्षेत ॥ २-२-४ ॥

Soon after the recitation of Brihatisahasra and after casting away the body, one will realise that the Supreme God is Prajñāmaya i.e., possess infinite knowledge, he is Devatāmaya i.e., has attributes krīḍā etc., he is Brahmamaya i.e., he has infinite attributes, and he is Amṛtamaya i.e., eternal. One who knows the Supreme God especially in this way will attain the deities upto Mukhyaprāṇa and ultimately the Supreme God i.e., Viṣṇu.

The forms of the Supreme God present in Brihatisahasra are in Puruṣa, the same are in sūryamaṇḍala. The form of the Supreme God designated as Aham and present in puruṣa is the same as the form present in sūryamaṇḍala.

This is stated in the hymn 'sūrya ātmā' etc., by the seer. The Supreme God present in sūrya and designated as sūrya is present in the moving things and static things, he is present in Jīvas. One should know that he is present in Jīvas as he is present everywhere.

इति द्वितीयारण्यके द्वितीयोऽध्यायः

द्वितीयारण्यके तृतीयोऽध्यायः

THE FIVE FORMS OF THE SUPREME GOD IN BRIHATISAHASRA

उप– यो ह् वा आत्मानं पञ्चविधमुक्थं वेद यस्मादिदं सर्वमुत्तिष्ठति स सम्प्रतिवित् पृथिवी वायुराकाश आपो ज्योतींषीत्येष वा आत्मोक्थं पञ्चविधमेतस्माद्धीदं सर्वमुत्तिष्ठत्येतमेवाप्येत्ययनं ह् वै समानानां भवति य एवं वेद ।

He who knows the Supreme God in his five forms and also his supremacy has the true knowledge. The God is Supreme because everything arises from him. The five forms of the Supreme God are Prithivi i.e., the Nārāyaṇa form present in Prithivi and designated as Prithivi, Vāyu i.e., Sankarṣaṇa form present in Vāyu and designated as Vāyu, Ākāśa i.e., Vāsudeva form present in Ākāśa and designated as Ākāśa, Apah i.e., Aniruddha form present in Ap and designated as Ap, Jyotis i.e., Pradyumna form present in Jyotis and designated as Jyotis. The God with these five forms is the Supreme God, because, everything arises from him and everything merges into him. He is the abode of all. He who knows this will be the abode for those who are similar to him.

उप– तस्मिन् योऽन्नं चान्नादं च वेदाह्यास्मिन्नन्नादो जायते भवत्यस्यान्नमापश्च पृथिवी चान्नमेतन्मयानि हि अन्नानि भवन्ति ।

ज्योतिश्च वायुश्चान्नादमेताभ्यां हीदं सर्वमन्नमत्त्यावपनमाकाश आकाशे हीदं सर्वं समोप्यत आवपनं हि समानानां भवति य एवं वेद ।

He who knows the form of the Supreme God present in Anna i.e., the objects to be enjoyed, and the form present in Annada i.e., the enjoyers of the objects, among his five forms becomes the enjoyer and the best enjoyed.

Among the five forms, the two forms viz., Ap i.e., Aniruddha present in Ap and designated as Ap, Prithivi i.e., Nārāyaṇa present in Prithivi and designated as Prithivi are Anna i.e., delighter of all beings present in the objects to be enjoyed. All objects to be enjoyed are regulated by these two forms of the God.

Jyotis i.e., Pradyumna present in Jyotis and designated as Jyotis, and Vāyu i.e., Sankarṣaṇa present in Vāyu and designated as Vāyu are Annāda i.e., enjoyers, and enable all to be the enjoyers. It is with the help of these that all enjoy the food.

Ākāśa i.e., Vāsudeva present in Ākāśa and designated as Ākāśa bestows room in the space. All beings find room in Ākāśa i.e., Vāsudeva present Ākāśa. Therefore, Ākāśa provides room for all beings. He who knows that it is Vāsudeva who provides room, provides room to those who are similar to him when liberated.

उप– तस्मिन् योऽन्नमन्नादं च वेदाह्यस्मिन्नन्नादो जायते भवत्यस्यान्न-मोषधिवनस्पतयोऽन्नं प्राणभृतोऽन्नादमोषधिवनस्पतीन् हि प्राणभृतोऽदन्ति ।

तेषां य उभयतोदन्ताः पुरुषस्यानुविधां विहितास्तेऽन्नादा अन्नमितरे पशवस्तस्मात्त इतरान् पशूनधीव चरन्त्यधीव ह्यन्नेऽन्नादो भवत्यधीवह समानानां जायते य एवं वेद ॥ २-३-१ ॥

He who knows the Anna and Annāda forms of the Supreme God among his five forms will become Anna and Annāda, that is to say, he will be the enjoyer and enjoyed.

Nārāyaṇa and Aniruddha designated as Oṣadhi and Vanaspati respectively and present in these are Anna. Ṣankarṣaṇa and Pradyumna designated as Prāṇabhrit and present in Prāṇabhrit are Annāda. Prāṇabhrit i.e., living beings eat Oṣadhi and Vanaspati i.e., plants and trees. Among the living beings those that have teeth both sides are like Puruṣa. These are Annāda

while others are Paśus and are Anna. The puruṣas ride over the Paśus. Therefore, Puruṣas are Annāda and Paśus are Anna. He who knows this will distinguish himself among the liberated.

उप– तस्य य आत्मानमाविस्तरां वेदाश्नुते ह्याविर्भूय ओषधिवनस्पतयो यच्च किञ्च प्राणभृत् स आत्मानमाविस्तरां वेदौषधिवनस्पतिषु हि रसो दृश्यते चित्तं प्राणभृत्सु प्राणभृत्सु त्वेवाविस्तरात्मा तेषु हि रसोऽपि दृश्यते न चित्तमितरेषु ।

पुरुषे त्वेवाविस्तरामात्मा स हि प्रज्ञानेन सम्पन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीप्सत्येवं सम्पन्नः ।

He who knows the Supreme God as manifesting himself in various objects obtains his grace. The Supreme God alone knows as to how he manifests himself in various objects viz., the plants, trees and living beings.

The plants and trees have juice (which stones etc., do not have). The living beings have mind. Therefore, the Supreme God manifests himself more in these. In plants and trees only juice is observed but not the mind.

Among the living beings, the Supreme God manifests himself more in human beings than other living beings. Human beings have greater intelligence. A human being can speak out what he knows and he can rationally understand what he knows. He can envisage tomorrow, this world and the other world. He desires to attain the external state leaving the temporary state. Thus, he possesses knowledge.

उप– अथेतरेषां पशूनामशनापिपासे एवाभिविज्ञानं न विज्ञातं वदन्ति न विज्ञातं पश्यन्ति न विदुः श्वस्तनं न लोकालोकौ त एतावन्तो भवन्ति यथाप्रज्ञं हि सम्भवाः ॥ २-३-२ ॥

The other living viz., animals etc., can understand only the hunger and thirst. These are not able to speak out what they know, these are not able to see what they know, these cannot envisage tomorrow, this world, and the other world. These have limitations. The animals are bore as per their early deeds and knowledge.

उप– स एष पुरुषः समुद्रः सर्वलोकमति यद्ध किश्चाश्नुतेऽत्येनं मन्यते यद्यन्तरिक्षलोकमश्नुतेऽत्येनं मन्यते यद्यमुं लोकमश्नुवीतात्येवैनं मन्येत ।

स एष पुरुषः पञ्चविधः तस्य यदुष्णं तज्ज्योतिर्यानि खानि स आकाशोऽथ यल्लोहितं श्लेष्मा रेतस्ता आपो यच्छरीरं सा पृथिवी यः प्राणः स वायुः ।

The Supreme God who manifests more in human beings is designated as Puruṣa and has infinite attributes. The Jīva who is also called Puruṣa attains all the worlds by the grace of the Supreme God; he also attains Vaikuṇṭha etc., the places of liberated. He has to realise that the Supreme God is infinitely superior to him. Even the liberated cannot be equal to him. When he attains Antarikṣa loka by the grace of the God, he has to realise that the God is infinitely superior to him, when he attains Svargaloka by the grace of God, he has to realize that the God is infinitely Superior to him.

The Supreme God designated as Puruṣa has five forms. In jātharāgni etc., the hot aspect of the human body his Pradyumna form designated as Jyotis is present; in the space in the ear etc., senses his Vāsudeva form designated as Ākāśa is present; in blood, retas etc., his Aniruddha form that has feminine form and many forms, and is designated as Āpah is present; in bones etc., hard part of the body his Nārāyaṇa form designated as Prithivi is present, in Prāṇa his Saṁkarṣaṇa form designated as Vāyu is present.

उप– स एष वायुः पञ्चविधः प्राणोऽपानो व्यान उदानस्समानस्ता एता देवताः प्राणापानयोरेव निविष्टाश्चक्षुः श्रोत्रं मनो वागिति प्राणस्य ह्यन्वपायमेता अपियन्ति स एष वाचश्चित्तस्योत्तरोत्तरिक्रमो यद्यज्ञः ॥

This Vāyu is of five forms viz., Prāṇa, Apāna, Vyāna, Udāna and Samāna. The abimāni deities of Jyoti etc., four bhūtas, and the abhimāni deities of Chakṣus etc., reside in Vāyu consisting of Prāṇa, Apāna etc., only. The abhimāni deities of Chakṣus etc., are chakṣus i.e., its abhimāni deity Ravi, Srotra i.e., its abhimāni deities Mitra, Dharma, Varuṇa and Kubera, Manas i.e., its abhimāni deities Śeṣa, Garuḍa, Indra, Kāma, Aniruddha, Guru and Chandra, Vāk i.e., its abhimāni deities Agni and Umā. The abhimāni deities of Chakṣus etc., leave the body when Vāyu leaves.

The Yajña arises from the abhimāni deities of Vāk, Chitta, Chakṣus and srotra in an ascending order.

उप– स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः स एष यज्ञानां सम्पन्नतमो यत्सोम एतस्मिन् ह्येताः पञ्चविधा अधिगम्यन्ते यत् प्राक् सवनेभ्यः सैका विधा त्रीणि सवनानि यदूर्ध्वं सा पञ्चमी ॥ २-३-३ ॥

The Yajña the sacrifice is of five types viz., Agnihotra, Darśapūrṇamāsa, Chāturmāsya, Paśu and soma. The Supreme God designated as Agnihotra etc., five, is present in these five types of sacrifices with his five forms of Aniruddha, Pradyumna, Saṅkarṣaṇa, Vāsudeva, and Nārāyaṇa.

The soma sacrifice is the best among these five sacrifices. It has five aspects viz., Prāksavana, the three savanas i.e., Prātahsavana, Mādhyandinasavana, Sāyamsavana and Ūrdhvasavana. In these five aspects of soma sacrifice the Supreme God is present with his five forms Aniruddha Pradyumna etc.

उप—यो ह वै यज्ञे यज्ञं वेदाहन्यहर्देवेषु देवमध्यूह्ं स सम्प्रतिविदेष वै यज्ञे यज्ञोऽहन्यहर्देवेषु देवोऽध्यूह्ः ।

यदेतन्महदुक्थं तदेतत्पञ्चविधं त्रिवृत्पञ्चदशं सप्तदशमेकविंशं पञ्चविंशमिति स्तोमतो गायत्रं रथन्तरं बृहद्भद्रं राजनमिति सामतो गायत्र्युष्णिग् बृहतीत्रिष्टुब् द्विपदेति छन्दस्तः ।

He who knows the Supreme God present in Yajña and designated as Yajña, present in Ahan and designated as Ahan, present in Devas and designated as Deva, has the right knowledge. The Supreme God is designated as Yajña, Ahan and Deva. He is present in these.

The Supreme God designated as Mahat and Uktha present in Brihatisahasra is of five forms, viz., trivrit, pañchadaśa, saptadaśa, ekavimśa and pañchavimśa.

The Aniruddha form present in stoma is called trivrit, the Pradyumna form present in Pañchabhūtas in their ādhyātma, ādhibhūta and ādhidaiva aspects is called pañchadaśa, the Saṅkarṣaṇa form present in lingaśarīra consisting of sixteen kalās is called Saptadaśa, the Vāsudeva form is called ekavimśa, the Nārāyaṇa form present in twentyfour tatvas with its mūlarūpa is called pañchavimśa.

The Aniruddha form present in stoma is of five forms. The Pradyumna form present in Sāmans is of five forms viz., Gāyatra, rathanthara, Brihadbhadra, and Rajana. The Saṅkarṣaṇa form present in chandas is of five forms viz., Gāyatri, Uṣṇik, Brihati, Triṣṭup and Dvipada.

उप— शिरोदक्षिणः पक्षः उत्तरः पक्षः पुच्छमात्मेत्याख्यानं पञ्चकृत्वः प्रस्तौति पञ्चकृत्वः उद्गायति पञ्चकृत्वः प्रतिहरति पञ्चकृत्वः उपद्रवति पञ्चकृत्वो निधनमुपयन्ति तत् स्तोभसहस्रं भवत्येवं ह्येताः पञ्चविधाः

अनुशस्यन्ते । यत्प्राक् तृचाशीतिभ्यः सैका विधा तिस्रः तृचाशीतयो यदूर्ध्वं सा पञ्चमी ।

तदेतत्सहस्रं तत्सर्वं तानि दश दशोति वै सर्वमेतावती हि संख्या दशादशतः तच्छतं दशशतानि तत्सहस्रं तत्सर्वं तानि त्रीणिच्छन्दांसि भवन्ति त्रेधा विहितं वा इदमन्नमशनं पानं स्वादस्तदेतैराप्नोति ॥२-३-४॥

Aniruddha form of Vāsudeva is the head of the sacrificial pit which is of the shape of a Syena bird; the Pradyumna form is the right wing; Sankarṣaṇa form is the left wing; Vāsudeva form is the tail; the Nārāyaṇa form is the centre of the body.

The Prastotā priest sings the glory of the Aniruddha form of the Supreme God present in the five Sāmans prastāva etc., five times. The Udgātā priest sings the glory of the Pradyumna form of the Supreme God present in Udgītha with Udgītha Sāman five times. The Pratihartā priest sings the glory of Sankarṣaṇa form of the Supreme God present in Pratihāra with Pratiharsāman five times. The priest who sings the Upadrava sāman sings the glory of the Vāsudeva form of the Supreme God present in Upadrava with Upadrava Sāman five times. The priest who sings the Nidhan sāman sings the glory of the Nārāyaṇa form of the Supreme God present in Nidhana with Nidhana sāman five times.

The innumerable stobha syllables in these hymns also convey the Supreme God in his innumerable forms. The Brihatisahasra also has the five aspects viz., the hymns to be sung before the three units of eighty hymns are sung, the three units of eighty hymns, and the hymns that are to be sung after them. These are the thousand hymns that convey the thousand forms of the Supreme God conveyed by Viśva etc., thousand names of the Supreme God.

Not only Brihatisahasra convey these thousand forms of the Supreme God but conveys his infinite forms. Further, Matsya,

Kūrma, etc., ten avatāra forms are also conveyed by Brihatīsahasra. These Matsya etc., avatāra forms represent all forms of the Supreme God. The number Daśa i.e., ten is fundamental to all other multiples such as hundred, thousand etc. All the forms of the Supreme God conveyed by Brihatīsahasra are conveyed by the expression Daśa. Brihatīsahasra consists of the hymns of three metres viz., Gāyatri, Brihati and Uṣnik. Therefore, Brihatīsahasra constitutes the food of the Supreme God consisting of eatables, drinkings, and chewings.

उप– तद्वा इदं बृहतीसहस्रं सम्पन्नं तद्धैतदेके नानाच्छन्दसां सहस्रं प्रति-जानते किमन्यत् सदन्यद्ब्रूयामेति त्रिष्टुप् सहस्रमेके जगतीसहस्रमेकेऽनुष्टुप् सहस्रमेके तदुक्तमृषिणा–

अनुष्टुभमनु चर्चूर्यमाणमिन्द्रं निचिक्युः कवयो मनीषेति वाचि वै तदैन्द्रं प्राणं न्यचायन्नित्येतत्तदुक्तं भवति स हेश्वरो यशस्वी कल्याण-कीर्तिर्भवितोरीश्वरो ह तु पुराऽऽयुषः प्रैतोरिति ह स्माह ।

The Brihatīsahasra is formed as stated earlier. However, some say that Brihatīsahasra can be formed selecting a thousand hymns of different metres. No particular metre can be said to be superior to other metres. Some others say that a thousand hymns of Triṣṭup metre be sung. Because, Triṣṭup has more syllables and therefore, is superior of Brihati. Some others say that a thousand hymns of Jagati metre be sung. Because Jagati has more syllables than Triṣṭup. Therefore, it is superior to Triṣṭup. Some others say that a thousand hymns of Anuṣṭup be sung. The importance of Anuṣṭup is sung by the seer as follows :

When the hymns in Anuṣṭup metre were sung the seers saw the Supreme God Viṣṇu.

He who sings the hymns in Anuṣṭup metre attains fame, he is enabled to attain liberation, he is able to die when he desires.

उप– कृत्स्नो ह्येष प्राण यद्वागभि हि प्राणेन मनसेस्य मनो वाचा नानुभवति बृहतीमभिसम्पादयेदेष वै कृत्स्न आत्मा यद्बृहती सोऽयमात्मा सर्वतः शरीरैः परिवृतस्तद्यथायमात्मा सर्वतः शरीरैः परिवृतः एवमेव बृहती सर्वतः छन्दोभिः परिवृता मध्यं हि एष अङ्गानामात्मा मध्यं छन्दसां बृहती स हेश्वरो यशस्वी कल्याणकीर्तिर्भवितोरीश्वरो ह तु पुरायुषः प्रैतोरिति ह स्माह कृत्स्नो ह्येष आत्मा यद्बृहती तस्माद् बृहतीमेवाभिसम्पादयेत् ॥ २-३-५ ॥

The Vāk i.e., the abhimāni deity Vāk is not a full Pratimā of Viṣṇu. Because, the man experiences the objects directed by Prāṇa i.e., Vāyu, and Manas i.e., Śiva the abhimāni deity of Manas but not by Vāk i.e., Umā the abhimāni deity of Vāk. Therefore, one should obtain a thousand hymns of Brihati metre to sing. It is Brihati that is the full Pratimā of Viṣṇu. Therefore, Brihati is superior to other metres.

Just as the central part of the body is surrounded by other limbs similarly, Brihati is surrounded by other metres. The Central part of the body is the centre of all other limbs. Similarly, the Brihati metre is important among all metres.

He who knows this will attain fame, power and will be able to attain liberation. He will die when he desires.

The Brihatīsahasra is the full Pratimā of Viṣṇu. Therefore, one should obtain Brihatīsahasra for singing.

उप– तद्वा इदं बृहतीसहस्रं सम्पन्नं तस्य वा एतस्य बृहतीसहस्रस्य सम्पन्नस्यैकादशानुष्टुभां शतानि भवन्ति पञ्चविंशतिश्चानुष्टुप् आत्तं वै भूयसा कनीयस्तदुक्तमृषिणा–

वाचमष्टापदीमहमित्यष्टौ हि चतुरक्षराणि भवन्ति नवस्रक्तिमिति बृहती सम्पद्यमाना नवस्रक्त्यृतस्पृशमिति सत्यं वै वागृचा स्पृष्टेन्द्रात् परि तन्वं मम इति ।

तद्यदेवैतद्बृहतीसहस्रमनुष्टुप्सम्पन्नं भवति तस्मात्तदैन्द्रात् प्राणाद्बृहत्यै वाचमनुष्टुभं तन्वं संनिर्मिमिते ।

Brihatīsahasra is formed as stated earlier. This Brihatīsahasra contains the hymns that are equivalent to eleven hundred and twenty-five Anuṣṭup hymns. Therefore, Anuṣṭup is lesser than Brihati. The lesser is always included in the higher. This is stated by the seer.

Anuṣṭup contains eight units of four syllables each. If another unit of four syllables is taken from the next Anuṣṭup it will have nine units and will be Brihati. Then, it conveys Rita i.e., Viṣṇu. The Vāk i.e., Anuṣṭup when becomes Brihati (by adding a unit of four syllables from next Anuṣṭup) will convey Satya i.e., Viṣṇu. Brihatīsahasra thus composed is the Pratimā of Viṣṇu and Vāyu. When Brihati Sahasra is taken as Anuṣṭup (eleven hundred and twenty-five Anuṣṭup) then, Vāk i.e., Umā emerges as Viṣṇu Pratimā (Brihatisahasra is Vāyu pratimā. Vāyu is Viṣṇupratima. When Brihatīsahasra is calculated in terms of Anuṣṭup, Umā the abhimāni deity of Anuṣṭup also becomes Viṣṇupratimā).

उप– स वा एष वाचः परमो विकारो यदेतन्महदुक्थं तदेतत् पञ्चविधं मितममितं स्वरः सत्यानृते इति ऋक् ।

गाथा कुंब्या तन्मितं यजुर्निगदो वृथावाक् तदमितं सामाथो यः कश्च गेष्णः स स्वरः ओमिति सत्यं नेत्यनृतम् ।

तदेतत् पुष्पफलं वाचो यत्सत्यं सहेश्वरो यशस्वी कल्याणकीर्तिर्भवितोः पुष्पं हि फलं वाचः सत्यं वदति ।

Brihatīsahasra is an exposition of 'अ'kāra. Brihatīsahasra and all other words are of five types viz., Mita, Amita, Svara, Satya and Anrita. The Mita consists of Rik, Gāthā and Kumbyā i.e.,

small sentences with equal syllables. Amita consists of Yajus, Nigada i.e., sentences that are not utilised in the sacrifices, and Vrithāvāk i.e., meaningless utterances. Svara consists of Sāman i.e., Brihad, Rathantara etc., Geṣṇa i.e., songs, that are other than Sāman. Om is Satya. Na is Anrita. 'Om' kāra is like flower and fruit of the Speech.

He who tells about 'Om' that is the flower and fruit of the speech will attain power, fame, and liberation.

उप– अथैतन्मूलं वाचो यदनृतं तद्यथा वृक्ष आविर्मूलः शुष्यति स उद्वर्तत एवमेवानृतं वदन्नाविर्मूलमात्मानं करोति स शुष्यति उद्वर्तते तस्मादनृतं वदेद् दयेत तु अनेन ।

पराग् वा एतद्रिक्तमक्षरं यदेतदोमिति तद्यत्किंचोमित्याहात्रैवास्मै तद्रिच्यते स यत् सर्वमोंकुर्याद्रिच्यादात्मानं स कामेभ्यो नालं स्यादथै-तत्पूर्णमध्यात्मं यन्नेति स यत् सर्वं नेति ब्रूयात् पापिकास्य कीर्तिर्जायेत सैनं तत्रैव हन्यात् तस्मात् काल एव दद्यात् काले न दद्यात् तत्सत्यानृते मिथुनीकरोति तयोर्मिथुनात् प्रजायते भूयान् भवति ।

यो वै तां वाचं वेद यस्या एष विकारः स सम्प्रतिविदकारो वै सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति ।

तस्यै यदुपांशु स प्राणोऽथ यदुच्चैस्तच्छरीरं तस्मात्तत्तिर इव तिर इव ह्यशरीरमशरीरो हि प्राणोऽथ यदुच्चैस्तच्छरीरं तस्मात्तदाविराविर्हि शरीरम् ॥ २-३-६ ॥

Anrita is the root of speech, as it were. When the roots of a tree are exposed, the tree goes dry and perishes. Similarly, he who speaks anrita i.e., No, will expose his roots and perish. Therefore, one should not say anrita i.e., no. On the contrary one should be benevolent.

The syllable 'Om' also in a way is against one's interest. This empties one. With whatever one says 'Om' he gives it to others. One who says 'Om' with reference to all, loses all. He will not be able to get any of his desires fulfilled.

On the contrary one who says Na i.e., no, will have all for him. But one who says no to all will be unpopular. He who is unpopular is as good as dead. Therefore, one should give at the right time and right place to the deserving and should not give to the undeserved. One who thus follows both giving and not giving, will prosper.

One who knows this Vāk i.e., 'अ'kāra, and all its expansion, knows well. 'अ'kāra is all speech. It assumes many forms combined with sparśa, ūṣma, vyanjana etc., syllables. The upāmśu pronunciation of it is Prāṇa. The uchchaih i.e., raised pronunciation of it Śarīra i.e., Bhārati the abhimāni deity of Śarīra. The 'अ'kāra pronounced in upāmśu is unobservable. One who has no body is unobservable. Prāṇa has no body. The 'अ'kāra pronounced as uchchaih is Śarīra i.e., Bhārati the abhimāni deity of śarīra. Therefore, it is observable. Śarīra is observable.

उप– तद्वा इदं बृहतीसहस्रं सम्पन्नं तद्यशः स इन्द्रः स भूतानामधिपतिः स य एवमेतमिन्द्रं भूतानामधिपतिं वेद विस्रसा हैवास्माल्लोकात् प्रैतीति ह स्माह महिदास एतरेयः प्रत्येन्द्रो भूत्वैषु लोकेषु राजति ।

The Brihatīsahasra is the glory of Nārāyaṇa. That is to say, it sings the qualities and actions of Nārāyaṇa. He is primarily called Indra. He is the Lord of Chaturmukhabrahma etc., Jīvas. He who knows this glory of the Supreme God will cross over the bondage and will attain the abode of the Lord. This is declared by Mahidāsa the son of Itarā. The Aitareya Mahidāsa who is called

Indra comes from Śvetadvipa etc., his abode and takes incarnation here. He shines in all worlds.

उप– तदाहुर्यदनेन रूपेणामुं लोकमभिसम्भवती ३ अथ केन रूपेणेमं लोकमाभवती ३ तदेतत् स्त्रियां लोहितं भवत्यग्नेस्तद्रूपं तस्मात् तस्मात् न बीभत्सेताथ यदेतत्पुरुषे रेतो भवत्यादित्यस्य तद्रूपं तस्मात् तस्मात् न बीभत्सेत ।

They ask 'Does the Supreme God who takes the incarnation of Mahidāsa enjoy by his male form present on the earth his female form present in the heaven ? By what form does the Supreme God enjoy his female form present on the earth ? By which form are the two brought together ?'

The red stuff of a woman is the female form present in Agni and designated as Agni. Therefore, one should not have aversion to it. The retas present in a man is the male form present in Āditya and designated as Āditya. Therefore, one should not have aversion to it.

उप– सोऽयमात्मेममात्मानममुष्मा आत्मने सम्प्रयच्छत्यसावात्मा-मुमात्मानमस्मा आत्मने सम्प्रयच्छति तावन्योन्यमभिसम्भवतोऽनेनाह रूपेणामुं लोकमभिसम्भवत्यमुना रूपेणेमं लोकमाभवति ॥ २-३-७ ॥

The Supreme God present on the earth in the form of the incarnation of Mahidāsa offers his female form present in the red stuff of woman to his male form present in the red stuff of woman to his male form present in the retas of man present in Āditya. The two enjoy mutually. Similarly, the Supeme God present in Āditya offers his female form present in the retas of the deity in the incarnation form of Mahidāsa.

Further, by the form of Mahidāsa present on the earth the Supreme God enjoys his female form present in Dyuloka and by

his male form of Vāman etc., present in Dyulka he enjoys his female form present on the earth.

उप– तत्रैते श्लोकाः

यदक्षरं पञ्चविधं समेति युजो युक्ता अभियत्संवहन्ति ।
सत्यस्य सत्यमनु यत्र युज्यते तत्र देवाः सर्व एकं भवन्ति ॥

यदक्षरादक्षरमेति युक्तं युतो युक्ता अभि यत् संवहन्ति ।
सत्यस्य सत्यमनु यत्र युज्यते तत्र देवाः सर्व एकं भवन्ति ॥

यद्वाचा ओमिति यच्च नेति यच्चास्याः क्रूरं यदुचोल्बणिष्णु ।
तद्वियूया कवयोऽन्वविन्दन्नामायत्ता समतृप्यंच्छ्रुतोधि ।
यस्मिन्नामा समतृप्यंच्छ्रुतेधि तत्र देवाः सर्वयुजो भवन्ति ।
तेन पाप्मानमपहत्य ब्रह्मणा स्वर्गं लोकमप्येति विद्वान् ॥

The Supreme God with his Nārāyaṇa etc., five forms enjoys his own corresponding five forms, that is to say, he will enjoy in his ardhanārinara form. The gods with their ardhanārinara forms as horses carry the chariot of the Supreme God of Ardhanārinara form. The gods in that place wherein the Supreme God who has infinite auspicious qualities and who gives the same to Mukhyaprāṇa is present.

The ardhanārinara form of the Supreme God manifests from his five forms Nārāyaṇa etc., that are also of the same form. The gods carry him. The gods gather in that place wherein the Supreme God with infinite auspicious qualities is present.

The Gods comprehend the glory of the Supreme God conveyed by 'Om' the affirmative word, 'Na' the negating word, 'Krūra' the word harsh in meaning, 'ulbaniṣṇu' the word harsh in form. When their knowledge of the glory of the Supreme God became ripe they enjoyed it more. The gods fixed their mind,

words, and activities on the very Supreme God whose glory they realised in the words mentioned above. He who knows this will attain Vaikuṇṭha with the grace of the Supreme God.

उप– नैनं वाचा स्त्रियं ब्रुवन् नैनमस्त्रीपुमान् ब्रुवन् ।
पुमांसं न ब्रुवन्नेनं वदन् वदति कश्चन ॥

अ इति ब्रह्म तत्रागतमहमिति तद्वा इदं बृहतीसहस्रं सम्पन्नं तस्य वा एतस्य बृहतीसहस्रस्य सम्पन्नस्य षट्त्रिंशतमक्षराणां सहस्राणि भवन्ति तावन्ति पुरुषायुषोऽह्नां सहस्राणि भवन्ति ॥

जीवाक्षरेणैव जीवाहराप्नोति जीवाह्ना जीवाक्षरमित्यनकाममारोथ देवरथः तस्य वाग्भिः श्रोत्रे पक्षसी चक्षुषी युक्ते मनः संग्रहीता तदयं प्राणोऽधितिष्ठति तदुक्तमृषिणा ॥

आतेन यातं मनसो जवीयसा ।
निमिषश्चिज्जवीयसेति जवीयसेति ॥ २-३-८ ॥

He is not called a woman, he is not called a man, he is not called as not a man and not a woman. He who calls him as man and woman calls him rightly.

'अ' conveys Brahman. I (Mahidāsa) am Brahman. Brihatī-sahasra has thirty-six thousand syllables. In the life of a person there are same number of days.

इति द्वितीयारण्यके तृतीयोऽध्यायः

द्वितीयारण्यके चतुर्थोऽध्यायः

उप– आत्मा वा इदमेक एवाग्र आसीत् नान्यत् किञ्चन मिषत् स ईक्षत लोकान्नु सृजा इति स इमान् लोकानसृजताम्भोमरीचीमरमापोऽदोम्भः परेण दिवं द्यौः प्रतिष्ठान्तरिक्षं मरीचयः पृथिवी मरो या अधस्तात्ता आपः ।

Before the creation (during pralaya) the Supreme God called Ātman alone was present. Nothing else functioned. The Supreme God thought – let me create the worlds and their abhimāni deities. He created the worlds Ambhas, Marichi, Mara, and Ap. Ambhas consists of the worlds above Dyuloka, and Dyuloka. This Dyuloka is also the abode of the God. Antarikṣa is Marichi, Prithivi is Mara. The deities who are created before the creation of Brahmāṇḍa are Ap.

उप– स ईक्षते मे नु लोका लोकपालान्नु सृजा इति सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत् तदभ्यतपत् तस्याभितप्तस्य मुखं निरभिद्यत यथाण्डं मुखाद् वाग् वाचोऽग्निः नासिके निरभिद्येतां नासिकाभ्यां प्राणः प्राणाद्वायुरक्षिणी निरभिद्येतामक्षीभ्यां चक्षुश्चक्षुष आदित्यः कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद्दिशस्त्वङ् निरभिद्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतयो हृदयं निरभिद्यत हृदयान्मनो मनश्चन्द्रमा नाभिर्निरभिद्यत नाभ्या अपानो अपानान्मृत्युः शिश्नं निरभिद्यत शिश्नाद्रेतो रेतस आपः ॥ ४-१-१ ॥

The Supreme God thought that let me create the presiding deities of these worlds. From Ap he took out Puruṣa i.e., Chaturmukhabrahmā and made Brahmāṇḍa. He made it to grow. Then its head developed, the face developed. From the face the Vāk, and from Vāk Agni arose. The nose developed, from the nose Prāṇa and from Prāṇa Vāyu arose. The eyes developed, from the eyes chakṣus and from chakṣus Āditya arose. The ears developed, from the ear Śrotra and from Śrotra Diks arose. Tvagindriya developed, from tvagindriya the hairs, from hair the plants and trees arose. Hridaya developed, from hridaya manas, and from manas Chandramā arose. The Navel developed, from navel Apāna and from apāna Mrityu arose. Śiśṇa arose, from Śiśṇa retas and from retas Ap arose.

उप– ता एता देवताः सृष्टा अस्मिन् महत्यर्णवे प्राप तं तमशनापि पासाभ्यामन्ववार्जत् ता एनमब्रुवन्नायतनं नः प्रजानीहि यस्मिन् प्रतिष्ठिता

अन्नमदामेति ताभ्यो गामानयत् ता अब्रुवन्न वै नोऽयमलमिति ताभ्योऽश्व-मानयत् ता अब्रुवन्न वै नोऽयमलमिति ताभ्यः पुरुषमानयत् ता अब्रुवन् सुकृतं बतेति पुरुषो वाव सुकृतम् ।

The deities who were thus created from the body of Chaturmukhabrahmā praying the Supreme God and shining with fine garments, ornaments etc., entered into the great Sea. The Supreme God created hunger and thirst for them. Then they asked the Supreme God to provide them with a body wherein they could eat the food. He gave them the body of Chaturmukharahmā of Cow form. They said it is not suitable for us. He gave them the body of Chaturmukhabrahmā of horse form. They again said that was also not suitable to them. He gave them the body of chaturmukhabrahmā of Puruṣa form. They said this is most suitable for them. Among the bodies, it is the body of Puruṣa form that is most suitable for enjoyment.

उप– ता अब्रवीत् यथायतनं प्रविशतेत्यग्निर्वाग् भूत्वा मुखं प्राविशद् वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्च क्षुर्भूत्वा अक्षिणी प्राविशद् दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन् ओषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशंश्चन्द्रमा मनो भूत्वा हृदयं प्राविशन्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा शिश्नं प्राविशंस्तमशनापिपासे अब्रूतामावाभ्यामभि प्रजानीहिति ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भागिन्यौ करोमीति तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते भागिन्यावेवास्यामश-नापिपासे भवतः ॥ ४-१-२ ॥

The Supreme God asked the deities Vanhi etc., to enter into that body of Chaturmukhabrahmā in the places from which each one one of them had arisen. Agni becoming Vāk entered into the mouth, Āditya becoming chakṣus entered into the eyes, Diks i.e., abhimāni deities of Dik becoming śrotra entered into the ear,

plants and trees i.e., Abhimāni deities of these becoming hair entered into Tvagindriya, Chandra becoming manas entered into hṛdaya, Mṛtyu becoming apāna entered into the navel, Ap i.e., abhimāni deities of Ap becoming retas entered into śiśna. Then the hunger and thirst i.e., the two forms of Vāyu the abhimāni deities of these asked the Supreme God to direct them. He said I will make you t enter into these deities. I will make you to partake with these deities only. That is why whenever some offerings are offered to the deities, the Vāyu in his two forms partakes with them.

उप– स ईक्षतेमे नु लोकाश्च लोकपालाश्चान्नमेभ्यः सृजा इति सोपोऽभ्यतपत्ताभ्योऽभि- तप्ताभ्यो मूर्तिरजायत या वै सा मूर्तिरजायतान्नं वै तत् तदेनत्सृष्टं पराङ्त्यजिघांसत्तद्वाचाऽजिघृक्षत् तन्नाशक्नोद्वाचा गृहीतं स यद्धैनद्वाचाग्रहैष्यदभिव्याहृत्य हैवान्नमत्रप्स्यत् ।

तत्प्राणेनाजिघृक्षत्त- न्नाशक्नोत् प्राणेन गृहीतुं स यद्धैनत्प्राणेनाग्र-हैष्यदभिप्राण्य हैवान्नमत्रप्स्यत् ।

तच्चक्षुषाऽजिघृक्षत्तन्नाशक्नोच्चक्षुषा गृहीतुं स यद्धैनच्चक्षुषाग्रहैष्यद् दृष्ट्वा हैवान्नमत्रप्स्यत् ।

The Supreme God thought let me create the food for these worlds and the abhimāni deities of these worlds. He saw at the Ap i.e., the abhimāni deities of Mahat tatva etc., viz., Chaturmukhabrahmā etc., gods. He created a body consisting of a part of each of these deities and made them to be in that body. This is the food. The Chaturmukhabrahmā of this form moved away with the thought that the other deities may eat him. Then, the Chaturmukhabrahmā of Bhoktā form desired to eat it by Vāk. He was not able to eat the same. If he were able to do so he would have been satisfied by merely speaking about the food.

He desired to eat by Prāṇa. He was not able to eat the same. If he were able to do so he would have been satisfied by merely breathing. He desired to eat by chakṣus. He was not able to eat the same. If he were able to do so he would have been satisfied by merely seeing.

उप– श्रोत्रेणाजिघृक्षत्तन्नाशक्नोच्छ्रोत्रेण गृहीतुं स यद्धैनच्छ्रोत्रेणाग्रहैष्यत् श्रुत्वा हैवान्नमत्रप्स्यत् ।

तन्मनसा जिघृक्षत्तन्नाशक्नोन्मनसा गृहीतुं स यद्धैतन्मनसा ग्रहैष्यद् ध्यात्वा हैवान्नममत्रप्स्यत् तच्छिश्नेनाजिघृक्षत्तन्नाशक्नोच्छिश्नेन गृहीतुं स यद्धैनद्धैच्छिश्नेना ग्रहैष्यद्विसृज्य हैवान्नमत्रप्स्यत् ।

तदपानेनाजिघृक्षत्तदावयत् सैषोऽन्नस्य ग्रहो यद्वायुरन्नायुर्वा एष यद्वायुः ।

He desired to eat by Śrotra. He was not able to eat the same. If he were able to do so he would have been satisfied merely by hearing about the food.

He desired to eat by Manas. He was not able to eat the same. If he were able to do so he would have been satisfied merely by thinking about the food.

He desired to eat by Śiśna. He was not able to eat the same. If he were able to do so he would have been satisfied merely by secretion.

He desired to eat by Apāna. He was able to do so. Therefore, it is Vāyu who eats the food. It is Vāyu who sustains even Chaturmukhabrahmā. It is Vāyu who gives activity, knowledge and liberation to all other deities.

उप– स ईक्षत कथं नु इदं मद्दते स्यादिति स ईक्षत कतरेण प्रपद्या इति स ईक्षत यदि वाचाभिव्याहृतं यदि प्राणेनाभिप्राणितं यदि चक्षुषा दृष्टं यदि श्रोत्रेण श्रुतं यदि त्वचा स्पृष्टं यदि मनसा ध्यातं यद्यपानेनाभ्यपानितं यदि शिश्नेन विसृष्टमथ कोऽहमिति स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत

सैषा विदृतिर्नाम द्वाः तदेतन्नान्दनं तस्य त्रय आवसथाः त्रयः स्वप्राः अयमावसथोऽयमावसथोऽयमावसथ इति स जातो भूतान्यभिव्यारव्यैत् किमिहान्यं वावदिषदिति स एतमेव पुरुषं ब्रह्मततमपश्यदिदमदर्शमिती ३ तस्मादिन्द्रो नामेदन्द्रो ह वै नाम तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः ॥ २-४-३ ॥

The Supreme God thought that how can these Chaturmukha-brahmā etc., function in this body without me. He further thought by which way shall I enter into this body?

If Vāgindriya speaks without my presence, Prāṇa breathes, the Eye sees, Śrotra hears, Tvagindriya touches, the Manas thinks, Apāna functions. Śiśṇa secretes, then, where is my role ?

Then, the Supreme God made the way in the head and entered into the body through Suṣumnā nāḍi. This way is called Vidriti. It is also called Nāndana. There are three places of the Supreme God in the body viz., the eye, the neck, and the heart. These places are called svapna, that is to say the place wherein the Supreme Lòrd is present to direct the jīvas.

The Supreme God who takes Matsya etc., incarnations, also enters into all beings to show that none else can do the great deeds that the does. He sees his full form of the incarnations of Vyāsa, Kṛṣṇa, Kapila etc. This is my full form and I always see it. Therefore, I am called Idandra. The seers call him Indra concealing his name Idandra, because, the gods like not to be revealed, the gods like not to be revealed.

इति द्वितीयारण्यके चतुर्थोऽध्यायः

द्वितीयारण्यके पञ्चमोध्यायः

उप– हरिः ॐ । पुरुषे ह वा अयमादितो गर्भो भवति यदेतद्रेतः तदेतत् सर्वेभ्योऽङ्गेभ्यस्तेजस्सम्भूतमात्मन्येवात्मानं बिभर्ति तद्यदा स्त्रियां सिञ्चत्यथैन-

जनयति तदस्य प्रथमं जन्म तत् स्त्रियाम् आत्मभूयं गच्छति यथा स्वमङ्गं तथा तस्मादेनां न हिनस्ति साऽस्यैतमात्मानमत्र गतं भावयति सा भावयित्री भावयितव्या भवति तं स्त्रीगर्भं बिभर्ति सोऽग्र एव कुमारं जन्मनोऽग्रेऽधिभावयति स यत् कुमारं जन्मनोऽग्रेऽधिभावयत्यात्मानमेव तद्भावयत्येतेषां लोकानां सन्तत्या एवं सन्तता हीमे लोकास्तदस्य द्वितीयं जन्म ॥

He i.e., Nārāyaṇa enters into man through the food. This food becomes retas in Man. This retas is the essence arising out of all limbs of man. This is held within oneself. When this retas is sprinkled in woman, then it is the first birth. This retas becomes a part of the woman as her other limbs. Therefore, the husband should not trouble her. The woman should take care of her womb. She should think that the God himself is present in it. The woman who thinks this way should be taken care of by her husband. He who respects the son in the womb, respects the God present in him. He obtains the benefit of all worlds. He occupies the earth. The birth on earth from mother's womb is the second birth.

उप– सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयतेऽथास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति स इतः प्रयन्नेव पुनर्जायते तदस्य तृतीयं जन्म तदुक्तमृषिणा–

गर्भेऽनुसन्नन्वेषामवेदमहं
देवानां जनिमानि विश्वा ।
शतं मा पुर आयसीररक्षन्नधः
श्येनो जवसा निरदीयमिति ॥

गर्भ एवैतच्छयानो वामदेव एवमुवाच स एवं विद्वानस्माच्छरीरभेदादूर्ध्व उत्क्रम्यामुष्मिन्त्स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवत् समभवत् ॥ २-५-१ ॥

द्वितीयारण्यके सप्तमोऽध्यायः

उप– हरिः ॐ । वाङ् मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठित-माविरावीर्म एधि वेदस्य म आणी स्थ श्रुतं मे मा प्रहासीरनेनाधी-तेनाहोरात्रात् सन्दधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारम् ॥ १ ॥

Let my speech be fixed on the Supreme God. Let the Supreme God be always present in my speech. O God! You reveal yourself to me. O God! present in Mukhyaprāṇa who is the support of all Vedas! Do not leave my learning, that is to say, be the object of my learning. Let me study the scripture describing you day and night. I shall speak about you who is ever present, and full of auspicious qualities, to my pupils. May the Supreme God protect me, the teacher and the pupils.

इति द्वितीयारण्यके सप्तमोऽध्यायः

द्वितीयारण्यकं समाप्तम्

NOTES AND EXPLANATION

द्वितीयारण्यके प्रथमोऽध्यायः

[II-1-1 (a)] Expl. (1) This Upaniṣad commences with an important statement that the God himself is the path leading to him. This means that it is God's grace that enables one to reach him. Thus the doctrine of grace is expressly stated here. This also indicates that the teaching of Upaniṣads is theistic and not mere speculative philosophy.

(2) The context of the revelation of this Upaniṣad is explained as follows :

प्रादुर्बभूव भगवान् तपसेतरायाः ।
नारायणोऽब्जजसुतस्य विशालनाम्नः ॥
तस्मिन् गतेऽध्वरमभूत् सुरविप्रसङ्घः ।
निश्चेतनस्तदनु पद्मभवोऽमुमस्तौत् ॥
तेन स्तुतः स भगवान् गिरिशेन्द्रमुख्यान् ।
सर्वानबोधयदजेन सहैव तेऽथ ॥
दासत्वमापुरत एव महत्सुराणां ।
दासत्वतः स महिदास इति प्रसिद्धः ॥
शृण्वत्सु तेषु भगवानवदद्रमायै ।
दिव्यां श्रुतिं स परमोऽतिमुदैतरेयीं ॥
सा बह्वृचैः प्रपठिता चतुराननास्यात् ।
यस्यां रहस्यमुदितं परमस्य विष्णोः ॥
महाभूतिः श्रुतिः सैषा महाभूतिर्यतो हरिः ।
विशेषेणात्र कथितः सर्वज्ञः शाश्वतः प्रभुः ॥
इति ऋक् संहितायाम् । (M.B.)

(i) God Nārāyaṇa revealed himself as a son of king Viśāla and his wife Itarā consequent on the penance performed by Itarā. Once he went into the place where gods and priests were

performing a sacrifice. They were not able to withstand his lustre. Then, Chaturmukha who was present there offered prayers to him. He, then, enabled them to see him. They all became his devotees. Since these distinguished deities became his devotees he came to be known as Mahidāsa.

दासत्वमापुरत एव महत्सुराणां ।
दासत्वतः स महिदास इति प्रसिद्धः ॥

(ii) He spoke Aitareya hymns to Ramā which Chaturmukha-brahmā etc., also listened. Chaturmukhabrahmā recited it. This contains the most secret teachings about Viṣṇu. The highest glory of lord Viṣṇu is described here. Therefore, this Upaniṣad is called Mahāvibhūti.

(3) (i) एषः–भगवान् संकर्षणनामा, पन्थाः–मार्गरूपः, स्वप्राप्तौ स्वस्यैव हेतुत्वात्, एतत्–एषः भगवानेव अनिरुद्धरूपी, कर्म–कर्तृत्वात् मातृत्वात् ज्ञातृत्वाच्च, एतत्–वासुदेवात्मा भगवान् ब्रह्म गुणपूर्णत्वात्, एतत्–प्रद्युम्नाख्यो भगवान् सत्यं निर्दोषस्वरूपत्वात् ।

The four Vyūha forms of the God viz., संकर्षण, अनिरूद्ध, वासुदेव, प्रद्युम्न are referred to here by एषः and एतत्, विधेयानुसारेण एतदिति नपुंसकता ।

(ii) The expression कर्म, ब्रह्म, सत्यं bring out the relevant attributes of the God and are the designations of the God.

एष एव सदा पन्थाः भगवान् पुरुषोत्तमः ।
नित्यं स्वप्राप्तिहेतुत्वात् कर्तृत्वात् कर्ममातृतः ।
ब्रह्मैष गुणपूर्णत्वात् सत्यं साधुस्वरूपतः ।
क्वापि तं विस्मरेन्नैव त्यक्त्वा तं नेतरं व्रजेत् । (M.B.)

(iii) पूर्वे–ब्रह्माद्याः संसृतेः मुक्ताः, श्रीश्च नित्यमुक्ता ।

(b) Expl. (1) A hymn is quoted here that states that three transgressed the Supreme God, and three meditated upon him.

The three who transgress will be mentioned in the explanation of the hymn given in Upaniṣat itself in the next passage. The three who do not transgress are मनुष्योत्तमाः, ऋषयः and देवाः. These meditate upon the God designated as अर्क, बृहत् and पवमान respectively. These designations bring out the relevant attributes of the God.

(i) आजनैरर्चितत्वात् स अर्क इत्युच्यते हरिः ।

(ii) बृहदित्यसौ तेजसा बृंहणादुक्तः ।

(iii) संसारात् पावयित्वा यन्महानन्दे मिनोत्ययम् ।
पवमानस्ततो विष्णुर्व्याप्तः सर्वासु दिक्षु च ॥

(2) देवाश्च ऋषयो मर्त्यसत्तमा इति च त्रयः ।
आश्रिता विष्णुमेवैकं त्रिस्थानस्थितमच्युतम् ॥ (M.B.)

(c) Expl. (1) The three who transgress the Supreme God are mentioned here. These are : वयांसि Piśāchas, वंगावगधाः Rakṣasas, and ईरपादाः Asurās.

(2) तिस्रः–पिशाचराक्षसासुरभेदेन त्रिविधाः, अत्यायन् भगवदतिक्रमं ईयुः–चक्रुः

(3) (i) वयांसि–वौ आकाशे अयनात् पिशाचकाः ।

(ii) वङ्गावगधाः–वं प्रवर्तितम् गं ज्ञानं येषु ते वङ्गाः नराः, तैः अवः–अवनं येषां ते वङ्गावाः नरमांसाशनेन स्वदेहपोषणं कुर्वन्तः ।

(iii) ईरपादाः–असुराः, ईरस्य वायोः धर्मज्ञानवैराग्यैश्वर्यरूपगुणचतुष्टयात्मकस्य ऐश्वर्यरूपैकगुणमात्रत्वात् ईरपादाः ।

(4) विहायस्ययनात् प्रोक्ताः वयांसीति पिशाचकाः ।
वर्तितज्ञानतो वङ्गा नराः तैरवनं सदा ॥

अन्नरूपैर्गृध्नवो हि वङ्गावगधनामकाः ।
राक्षसा असुरा ईरपादाः इति समीरिताः ।

धर्मो ज्ञानं च वैराग्यमैश्वर्यं चतुरात्मकः ।
वायुर्देवोऽत्रासुराणामैश्वर्यं गुण एव हि ।
ईरपादा इति प्रोक्ताः ते त्रयो विष्णुमत्ययन् ।
पराभूतास्ततस्ते तु तमस्यन्धे निपातिताः । (M.B.)

(d) Expl. (1) The forms of the Supreme God meditated upon by men, sages, and the gods who do not transgress the Supreme God are described here.

(3) न्यन्याः–अन्याः उक्तराक्षसादिनिविधासत्प्रजाविलक्षणाः ।

(i) अर्कम्–आ सम्यक् जनैः अर्चितत्वात् अर्कशब्दवाच्यं अग्निस्थं विष्णुं मनुष्योत्तमाः अभितः विविश्रे । अग्नौ कर्माणि कृत्वा तत्स्थं विष्णुं मुक्तौ प्राप्नुवन्तीत्यर्थः।

(ii) ऋषयः बृहत्–तेजसा बृंहितं व्याप्तं ब्रह्म भुवनेष्वन्तः तत्स्थौ स्वाध्यायेन अभितो निविष्टाः ।

(iii) पवमानः वायुस्थः विष्णुः हरितः–दिशः आविवेश तं देवाः अभितः निविष्टाः ।

(4) अग्निं–अग्नौ स्थितं तन्नामकम्, आदित्यः–सर्ववस्तूनामादानात् स्ववशे स्थापनादादित्यः, पवमानः–मिनोति क्षिपति च महानन्दे इति पवमानः ।

(5) (i) देवाश्च ऋषयो मर्त्यसत्तमा इति च त्रयः ।
आश्रिता विष्णुमेवैकं त्रिस्थानस्थितमच्युतम् ।
अग्निस्थमाश्रिता मर्त्या विष्णुमर्काभिधं परम् ।
आदानैरर्चितत्वात् स अर्क इत्युच्यते हरिः ।
अग्नौ कर्माणि कृत्वैव मानुषा मुक्तिभागिनः ।। (M.B.)

(ii) आश्रिता सूर्यगं विष्णुमृषयो बृहदित्यसौ ।
तेजसा बृंहणादुक्तो विष्णुरादित्य इत्यपि ।
आदानात् सर्ववस्तूनां स्वाध्यायेनामुमाश्रिताः ।
मुच्यन्ते ऋषयो नित्यं नान्यथा तु कथंचन ।। (M.B.)

(iii) वायुस्थमाश्रिता देवाः पवमानाभिधं हरिम् ।
संसारात् पावयित्वा यन्महानन्दे मिनोत्ययम् ।
पवमानस्ततो विष्णुर्व्याप्तः सर्वासु दिक्षु च ।
आश्रितो भगवान् सर्वैः सर्वत्रापि विशेषतः ।
आश्रयात् पृथगुक्तोऽयं रमापतिः ॥ (M.B.)

[II-1-2 (a)] Expl. (1) The exposition of Uktha Vidya commences from this passage. Uktha is a designation of the Supreme God. His adhidaiva and adhyātma forms are described in the passages commencing from this passage.

(2) प्रजाः–ज्ञानिनः, उक्थं–उत्थापनात् जगतः सर्जनात् उक्थनामकं इदमेव विष्ण्वाख्यं ब्रह्मैव । तस्य रूपविशेषाणां उपास्त्यर्थं अधिष्ठानं वाहनं भोग्यमन्नं च पृथग् दर्शयति ।

(3) पृथिवी–प्रथितत्वात् पृथिवीनामकं पृथिवीस्थितमुक्थम् ।
पृथिवीस्थस्य विष्णोः अग्निः अर्कः ।

The expression अर्क means vāhana i.e., carriage. Such a vāhana of the Supreme God designated as Prithivi and present in Prithivi is the Suparṇa form of God himself. This Suparṇa form is present in Garuda who is present in the Agñi and in the sacrificial fire-pit which is of the form of Śyena bird which is similar to Garuda. The word Arka means that which moves speedily. The Śyena bird moves speedily. Therefore, it is called Arka. Now, the sacrificial fire-pit is of the shape of a Śyena bird. Therefore, that is also called Arka. The Garuda is present in the Agñi and in the sacrificial fire-pit. The Suparṇa form of the God is present in Garuda. Therefore, he is Arka. Thus the ultimate meaning of the word Arka in the present context is the Suparṇa form of the God who is vāhana of his own form present in Prithivi and designated as Prithivi. Thus one form of the God i.e., Suparṇa form called Arka is vāhana for another form of the God called Prithivi.

अत्र अर्कपदेन ऋ गताविति धातोः शीघ्रगतित्वतः श्येन उच्यते । तदाकारत्वात् यज्ञे क्रियमाणा चितिः इष्टकासन्निवेशविशेषलक्षणा अर्कपदेन गौण्या वृत्त्या प्रतिपाद्यते । सा च सुपर्णप्रतिमारूपा । स एव सुपर्णो अग्नावपि स्थितः स च हरेः वाहनमिति प्रसिद्धमेव । अतः अग्निस्थितस्यैव गरुडस्य अर्कपदोदितचितिगतत्वात् अग्निः तस्य वाहनरूपः अर्कः उच्यते । अथवा अग्निः अग्निस्थितः अग्निशब्दवाच्यः भगवद्रूपविशेषः तस्य पृथिवीस्थस्य हरेः अर्कः शीघ्रगतित्वात् अर्कपदोदितगरुडस्थितः तदाकारः स्वयमेव वाहनरूपः इत्यर्थः । एवमुत्तरत्र वायुरर्कः आदित्योऽर्कः इत्यादौ सर्वत्र अर्थान्तरं व्याख्येयम् ।

(5) अरणं गमनं यस्मादर्कः शीघ्रगतित्वतः ।
श्येन एव तदाकारा चितिरर्कपदोदिता ॥
सुपर्णप्रतिमा सा यत्तदारूढो जनार्दनः ।
तस्मात्तस्यार्क इति सा प्रोच्यते वैदिकैः पदैः ॥
योऽसौ चितिगतो वीन्द्रः सोऽग्निवातरविष्वपि ।
तथा वाक्प्राणचक्षुष्षु तस्मात्तेऽर्काः प्रकीर्तिताः ॥
तेषु स्थिते सुपर्णे च रूपभेदैः पृथक् पृथक् ।
स्थितो विष्णुस्तदर्कास्ते तस्मादेव प्रकीर्तिताः ॥

अशीतयः–तिस्रः तृचाशीतयः तद्रूपं बृहतीसहस्राख्यं शस्त्रम्, अन्नं प्रसिद्धान्नमेव उभयोरपि तर्पकत्वात् ।

अश्नुते अनया इति व्युत्पत्त्या सर्वकामप्राप्तिसाधनत्वादन्नमशीतिरित्युच्यते ।

तृचाशीतयोपि अन्नवत् भगवतः तृप्तिहेतुतया सर्वकामप्राप्तिसाधनतुल्यत्वात् अशीतिशब्दवाच्याः । अतः अन्नमशीतय इति सामानाधिकरण्येन उच्यते ।

Brihatīsahasra is a collection of a thousand hymns drawn from Ṛgveda. Three sets of eighty units of hymns each unit consisting of three hymns constitute the central part of this collection. These three sets consist of hymns in Gāyatri, Brihati and Uṣṇik metres. These make 720 hymns. 280 hymns of other metres are added at the beginning and the end.

The total number of hymns is one thousand. The total number of syllables is thirty-six thousand. A hymn in Brihatī metre contains thirty-six syllables. Therefore, the total of these hymns is called Brihatīsahasra. This does not mean that all thousand hymns are of Brihatī metre only. Only the total number of syllables viz., thirty-six thousand agrees with the total number of syllables of a thousand hymns of Brihatī metre.

A set of eighty hymns is called Aśīti. This is referred to as food of the Supreme God here and compared with the usual food both being enjoyable to the Supreme God.

(b) Expl. (1) The forms of the Supreme God present in Antarikṣa and Dyuloka are described here.

(2) (i) अन्तः स्वहृदये ईक्ष्यते अधिकारिभिः इति अन्तरिक्षनामकं भगवद्रूपं अन्तरिक्षस्थं तदेवोक्थम् ।

(ii) पक्ष्याद्युत्पतनधावनादिरूपोत्थानहेतुत्वात् उक्थत्वमन्तरिक्षस्य ।

(iii) अनु—तत्प्रेरणयैव पक्षिणः पतन्ति, धावयन्ति—नराद्यः अश्वादिषु यानादि-वाहकनरवृषभादिषु च उपविष्टाः तान् धावयन्ति ।

(3) अमुतः दिवः प्रदानात् तत्कर्तृकवृष्टिप्रदानात् यदिदं किञ्च सर्वं सस्यादिक-मुत्तिष्ठति तस्मात् तत्स्थस्य उक्थपदवाच्यत्वं युक्तमेव ।

उत्थापनादुक्थनामा स एव पृथिवीस्थितः ।
प्रथितः पृथिवी नामा सोऽन्तरिक्षाभिधोऽत्रगः ॥
अन्तरीक्ष्यो यतो द्युस्थो द्युनामात्र प्रकाशनात् ॥ (M.B.)

(c) Expl. (1) The adhyātma forms of the Supreme God present in the body, mouth and Nasikā are described here.

(2) पुरुषशब्दवाच्यदेहस्थितत्वात् देहाख्यपुरेषु सरणाद् वा यः पुरुषाख्यो विष्णुः स एव उक्थम् ।

(3) महान्—सर्वोत्तमः, प्रजापतिः—ब्रह्मादिसर्वप्रजास्वामी, एष च पुरुषाख्यो भगवान् अहमुक्थमस्मीति विद्यात् विद्यां ज्ञानं अत्ति अनुभवतीति तथोक्तः । तस्यैव सर्वोत्तमत्वादि सद्भावात् स एक एव तादृशज्ञानयोग्यः न अन्यः ।

(4) Not only that form of the Supreme God present in the body is Uktha but also those forms that are present in मुख, नासिका etc., limbs also.

एवं पुरुषाख्यहरेः उक्थत्वमुक्त्वा तदङ्गानामप्युक्थत्वमाह । तस्य मुखमेवेत्यादिना ।

(5) मुखं उक्थं अग्न्युत्थापकत्वात्, नासिके एव उक्थं वातोत्थापकत्वात् ।

(6) नासिकामूले नेत्रयोः मध्ये विनतमिव किञ्चिन्नतस्थानं दृश्यते तदेतत् ब्रध्नस्य सूर्यस्य विष्टपं सूर्यलोकस्थानीयं विद्यात् ।

(d) Expl. (1) The Adhyātma form of the Supreme God present in chakṣus is described here. The glory of the Supreme God designated as anna is also described.

(2) चक्षुः—चक्षुरभिमानी सूर्यः ।

(3) अत्र 'अदनाघ्राणदृष्ट्याख्यभोगत्रयविभागेन तन्मुखनासिकानेत्राणां भोग्यमन्नं रसगन्धरूपात्मकं तस्य अन्नं तस्य अन्नमिति निर्दिष्टम् ।

(4) The forms of the Supreme God present in Vāk, Prāṇa, Chakṣus, respectively are Bhārgava, Narasimha and Kapila. The Supreme God is present in the body of the Jīvas. His Mukha, Nāsika and Chakṣus are present in the respective limbs of the Jīvas.

अत्रेदं बोध्यम् । भगवतः जीवदेहेषु व्याप्तत्वात् तन्मुखनासिकाक्षीणि जीवमुखनासिकाक्षिषु स्थितानि । अत एव जीववाक्प्राणचक्षुष्षु विष्णुवागाद्याः स्थिताः । विष्णोः वाक्प्राणचक्षूंषि च भार्गवनारसिंहकपिलाख्याः तद्रूपविशेषाः ।

(5) इमानि सर्वाणि भूतानि अन्नेनैव अन्नस्थेन अन्ननाम्ना भगवतैव, समनन्ति सम्यक् चेष्टन्ते ।

(e) Expl. **(1)** Anna and Annāda forms of the Supreme God are described here. The Supreme God designated as Prithivi is both Anna and Annāda. Same is the case with the God designated as Dyu. This is with reference to his own forms and also with reference to other beings.

पृथिवीद्युस्थयोः भगवद्रूपयोः अन्नत्वं अन्नादत्वं च स्वनिरूपितं अन्यनिरूपितं च बोध्यम् ।

तत्र स्वभोग्यत्वं स्वभोक्तृत्वं च हरेः अचिन्त्यैश्वर्यबलादेकस्यापि रूपभेदेन उपपन्नम् । अन्यभोग्यत्वं च उपजीव्यतारूपम् । अन्यभोक्तृत्वं तु अविप्रतिपन्नमेव ।

(2) तदिदं भगवद्रूपं अन्नं अद्यत्वात् । अद्यत्वं च उपजीव्यत्वेनैव, न केवलमन्नं किन्तु अन्नादं च अन्नमत्तीति । सर्वात्मा हि भगवान् ।

(3) पृथिवीगतमेव पृथिवीनामकं रूपम् । पृथिवीगतभगवच्छक्त्यैव इदं सर्वं धान्यादिकं पृथिवीतः उत्तिष्ठति ।

(4) स्वर्गादिगन्तृचेतनं पृथिवीतः प्रेता ३ इ प्रैति तत्सर्वमसौ द्विलोकस्थो हरिः अत्ति स्वीकरोति ।

(5) अमुतः–द्युलोकात्, वृष्ट्यादिकं तत्सर्वं पृथिवीस्थितः अत्ति । एतेन द्युलोकस्थस्य अन्नत्वमुक्तं भवति ।

(6) (i) पृथिवी–तत्स्था भगवन्मूर्तिः अद्या अदनीया भोग्या उपजीव्येति यावत् अत्री भोक्त्री च भवति । द्युस्थो भगवानपि अत्ता अद्यश्च भवति ।

(ii) यदा पृथिवी अद्या भवति तदा द्यौरत्ता । यदा तु सा अत्री तदा असौ अत्ता ।

(7) अयं भगवान् यथा सर्वं न अद्यात् यद्वा एनं भगवन्तं अन्ये न अद्युः तथा करणस्य कश्चन नेशे ।

[II-1-3 (a)] Expl. (1) The creation of gods and the things of the world are explained.

(2) The expression Retas should be taken in the sense of created.

(3) प्रजापतेः सर्वजीवाधिपतेः विष्णोः, हृदयशब्देन संकल्पकात्मकं मनः उच्यते तत् प्रजाभ्यो जायते, मनःशब्देन विकल्पात्मकं मनः उच्यते, संकल्पविकल्पाभ्यां सर्वोपि वाक्प्रचारो जायते ।

(4) तदिदं कर्मकृतं कुलालादिकर्मणा हि घटादिकं सर्वं जगत्, जायते, पुरुषः– जीवः ब्रह्मणः विष्णोः लोकः आवासस्थानम् ।

(5) इरामयः–इच्छानुरूपसुखपूर्णः, हिरण्मयः–हिरुक्–पृथक् लौकिकानन्द-विलक्षणं ण्यं सुखं हिरण्यं तेन अधिकत्वात् तयोक्तः, इरामयत्वादेव हिरण्मयः इत्युच्यते ।

(6) अमुष्मिन् लोके वैकुण्ठादौ, हिरण्मयः–निजानन्दैकरूपः, सर्वेभ्यः भूतेभ्यः मुक्तसर्वभूतैः दृद्दशो दृश्यते ।

(7) (i) स एव भगवान् विष्णुः प्रजापतिरितीरितः ।
तस्माज्जाताः सर्वदेवाः ब्रह्माद्याः तेभ्य एव च ।
वृष्टिः सञ्जायते तस्याः सर्वा ओषधयोऽभवन् ।

(ii) इच्छानुरूपं सुखमिरेत्येव प्रकीर्तितम् ।

(iii) हिरुक् सुखं हिरण्यं स्याद् बाह्यानन्दात् पृथग्यतः । (M.B.)

(b) Expl. **(1)** The fact that the Supreme God entered into Chaturmukhabrahmā at the commencement of creation is explained here. The significance of the names of various limbs derived from the entry of the Supreme God into them is also explained. It is also stated that Vāyu and other gods also will be present in the head.

(2) आदिसृष्टौ ब्रह्म वासुदेवाख्यं तं प्रसिद्धं पुरुषं चतुराननं प्रपदाभ्यां प्रपदयोः प्राप । पादोपरितनभागरूपमङ्गं प्रपदे इत्याचक्षते विद्वांसः ।

(3) हरेः ऊर्ध्वं अरणात् गमनात् निमित्तात् चतुर्मुखसम्बन्धिनौ अवयवविशेषौ ऊरू अभवताम्, वायुः यत्र स्थित्वा उर्वेवं गरणं चक्रे तत्स्थानमुदरमभवत् उत्कृष्टे गरो गरणं स्तवनं यस्मिन्निति । गस्य दः ततोपि ऊर्ध्वं गत्वा उरु विस्तृतमेव मे स्थानं कुर्वित्यब्रवीत् तत्स्थानमुरो नामकमभवत् ।

उरःस्थाने मध्ये हृदयमप्यकरोदित्यपि ग्राह्यम् । शर्कराक्ष्याः–शर्करा सूक्ष्मपाषाणः तद्वत् सूक्ष्ममक्षं दृष्टिः येषां ते तथोक्ताः, हृदयं हृदये स्थितं हृद्यपनात् हृद्यशब्दवाच्यं ब्रह्म, उभे–उदरस्थं हृद्रं च ब्रह्मैव ह । नाणुरप्यत्र भेदः ।

(4) ऊर्ध्वगतं च ब्रह्म शिरो मूर्धानमश्रयत वायुना देवैश्च सह तत्र स्थितमभूत् । यस्मात् शिरोऽश्रयत ब्रह्म तस्मात् तदंगं शिरो नामाभवत् ।

(5) चक्षुरादिदेवताश्च भाष्योक्तरीत्या रविचन्द्रशङ्कराग्निवाय्वाद्याः बोध्याः ।

(6) तमिमं प्रथमज्ञानिपुरुषं चतुराननम् ।
वासुदेवाभिधं ब्रह्म प्राप प्रपदयोः पुरा ॥

अथादूर्ध्वं ततो विष्णुः प्रपदादूरुमत्र च ।
किञ्चिदूर्ध्वं ततो गत्वा वायुना सह केशवः ॥
तत्स्थानादुदरं नाम पुनराह जनार्दनः ।
उरुस्थानं निवासं मे कुरु विस्तारसंयुतम् ॥
उरो मध्ये च हृदयं तत्रावासो हरेः सदा ।
सूक्ष्मदृष्टियुता ये तु मुनयः शार्कराक्ष्यकाः ।
उदरे ते परं ब्रह्म वासुदेवमुपासते ॥
हृत्स्थमेव परं ब्रह्म ध्यायन्त्यारुणयः सदा ।
तत ऊर्ध्वं गतो विष्णुः वायुना सह दैवतैः ॥
स्थितो मूर्धनि देवेशः श्रितोऽसाविति तच्छिरः ।

(7) तत्र प्राणात्मना वायुः मनोरूपेण शङ्करः ।
शेषः सुपर्ण इन्द्रश्च मनांस्येव पृथक् पृथक् ॥
श्रोत्रं चन्द्रो रविश्चक्षुर्वागग्निः परिकीर्तितः ।
एते देवाः तदन्ये च सर्वप्राणिषु संस्थिताः ।
उपासते महाविष्णुं परमात्मानमच्युतम् ॥

(c) Expl. (1) An episode of the claims of superiority among the gods is described here in order to highlight the superiority of Mukhyaprāṇa.

(2) अहिंसन्त–परस्परं व्यनिन्दन्, उक्थं–श्रेष्ठः, अस्मात् चतुर्मुखसम्बन्धिनः शरीरात्, वाक्–वागभिमानिनी वह्निः, उदक्रामत्–ब्रह्मशरीरादुत्क्रान्तः, चक्षुः–सूर्यः, श्रोत्रं–चन्द्रः, मनः–मनोभिमानी शङ्करः, शेषः, सुपर्णः, इन्द्रः, मीलित इव–प्रतिभाशून्य इव ब्रह्मणः तादृग् भावायोगात् इवेत्युक्तिः ।

(3) अश्नन् पिबन् इति तदितरेन्द्रियव्यापारस्याप्युपलक्षणम् । अशनपानयोः प्राणव्यापारत्वात् प्राधान्यात् सर्वत्र तदुक्तिः, अशारि–अशीर्यत ।

(4) स्वोत्क्रमणेन ब्रह्मदेहस्य शीर्णतापादकत्वरूपप्राणमाहात्म्यवेत्तुः द्विषन् द्वेषीव स्थितः, भ्रातृव्यः–भ्रातृवत् सह संस्थितः, पाप्मा–पापं नश्यति, भ्रातृव्यः शत्रुश्च पराभवति ।

(5) देहादब्जभवस्यास्माद्यस्मिन्नुत्क्रान्त एव हि ।
शरीरं पद्यत श्रेयान् स न इत्यवधार्यताम् ॥
ततः क्रमेण चाग्न्याद्याः निष्क्रान्ताः तेषु सर्वशः ।
निष्क्रान्तेषु न वै पातः शरीरस्याभवत् क्वचित् ।
वायावुत्क्रान्त एवैतच्छरीरमपतत् क्षितौ ॥
उदासीनवदास्तां तौ केशवश्चाब्जसम्भवः ।

[II-1-4] Expl. (1) The superiority of Prāṇa is shown by further pointing out that only on his entering the body of Chaturmukha-brahmā arose but not by the entry of other gods.

(2) उक्थं गुणाधिकः, त्वमेवेदं सर्वमसि अस्य सर्वस्य वचनदर्शनादस्मदीयव्यापारस्य त्वमेव नियामकोसीति यावत् । वयं सर्वे भृत्याः त्वं च अस्माकं पतिः ।

(3) पुनस्ते प्राविशन् सर्वे वह्निसूर्यौ शशी शिवः ।
नोत्थानमभवत्तेषु प्रविष्टेष्वपि सर्वशः ॥
वायौ प्रविष्टे तूत्थानं कायस्यासीत् तदैव च ।
उच्चैः स्थितत्वादुक्थोऽभूद्वायुरेव ततः प्रभुः ॥

[II-1-5 (a)] Expl. (1) Adhyātma forms of Prāṇa are explained here. His superiority and the ultimate superiority of Viṣṇu are brought out here.

(2) प्राणयन्त–शिष्यप्रशिष्यादिषु प्रकर्षेण अनयन् उपदिदिशुः । तथा तं वायुमपि तद्गुणोक्त्या शिष्यादिषु प्राणयन्त, प्रातायत् तेषु प्रविश्य प्रततो बभूव ।

(3) वाक्–वागभिमानी, चक्षुः–चक्षुरभिमानी, चन्द्रमाश्च मनः, अत्र शिवशेषसुपर्णेन्द्रा अपि ग्राह्याः, दिशः–प्राच्यादिदिगभिमानिनः– मित्रयमवरुण कुबेराः ।

(4) स एष च अध्यात्मं देवानां संयोगः नान्यनिमित्तकः, किन्तु प्रहितां प्रहितानामेव विष्णुना प्रेरितानामेव बोद्धव्यः । इमाः ब्रह्माद्याः सर्वाः देवताः देवतामात्राः । अद उ विष्ण्वाख्यं परं ब्रह्मैकमेव अधिदैवतं सर्वाधिकं दैवतम्, आविः–पूर्णज्ञानादिस्वरूपम्, एतत् प्रमेयं सर्ववेदादिसदागमैः तात्पर्यादुक्तं कथितं भवति । नान्यत् । ह स्म वा इति निपातत्रयं प्रसिद्धिद्योतकम् ।

(b) Expl. (1) The importance of knowing the adhyātma gods is explained here. The designation 'Satya' of the Supreme God, and the three gods viz., Prāṇa, Brahmā, and Āditya are explained here.

(2) हिरण्यदन् नाम वैदो वेदद्रष्टा मुनिः, प्रहितां–विष्णुना प्रहितानां प्रेरितानां ब्रह्मादिदेवानाम् अध्यात्मं निविष्टम् अध्यात्मसंबन्धिनमिति यावत् ।

(3) भूतानि–मदवराणि, तद् ब्रह्म विष्ण्वाख्यं सत्यम्, सर्वोत्तमत्वात् सत्, पूर्णत्वात् ति, सर्वज्ञत्वात् यं ततः कर्मधारयः ।

(4) प्राणो वायुः शेषादिसर्वदेवोत्तमत्वात् सत्, अन्नं–अन्नाभिमानी अन्नशब्दवाच्यो ब्रह्मा जीवेषु पूर्णत्वात् ति इति प्रोक्तः, असौ आदित्यः प्रकाशेन सर्वलोकयमनात् यमित्युदिष्टः तदेतत् देवतात्रयं त्रित्वेन वर्तते इति त्रिवृत् मिलितमेवेति यावत्, त्रिवृद्देवताधिष्ठानत्वात् चक्षुरपि शुक्लं कृष्णं कनीनिकेति त्रिवृदिव ।

(5) यदि मृषा वदति सत्यं भवति सत्यप्रायं भवति असत्यभाषणप्रयुक्तदोषवान् न भवति ।

(6) स एष भगवान् विष्णुः सत्यमित्यभिधीयते ।
सर्वोत्तमत्वात् पूर्णत्वात् सर्वज्ञत्वात्तथैव च ।
देवतात्रयमन्यच्च पृथक् सत्यमितीर्यते ॥

[II-1-6 (a)] Expl. (1) The importance of the Vedic speech and the Vedic metres is described here.

(2) तस्य नारायणस्य वाक् सर्ववेदात्मिका तन्तिः–महारज्जुरूपा, जगदाख्यपशुबन्धे इति शेषः, वेदवाग्गतानि ब्रह्मरुद्रादीनि विप्रक्षत्रियादीनि दामानि अवान्तररज्जुरूपाणि, सितम्–बद्धम् ।

(3) सर्वमपि वेदवाचा विष्णुरभिवदति, सर्वेषामपि वेदोक्तान्येव नामानि विष्णुः संकेतितवानिति यावत् ।

(4) तन्तिसम्बद्धाः वेदोदिताः सर्वे देवाः वहन्ति संसारे मुक्तौ च बलिमिति शेषः । अथवा । तन्तिसम्बद्धाः पञ्चभूताभिमानिनो विघ्नेशाद्याः देवा अश्वरूपाः भूत्वा रथस्थमेनं वहन्तीत्यर्थः ।

(5) तस्य वायोः वाचा तन्त्या नामभिः दामभिः सर्वं सुपर्णशेषगिरिशादिकं जगत् बद्धमिति वायुपरतयापि व्याख्येयम् ।

(6) उष्णिक्–उष्णिगाश्रयत्वात् उष्णस्वरूपत्वाच्च तच्छब्दवाच्यानि, गानत्राण-कर्तृत्वात् गायतां त्रायकत्वाद् वा गायत्री, त्रिभिः वेदैः स्तुतत्वात् त्रिष्टुप्, आनुकूल्येन स्तूयमानत्वात् अनुष्टुप्, जातस्य गतित्वात् जगती, पञ्चरूपत्वात् पङ्क्तिः, बृहत्त्वात् बृहती ।

(7) छन्दःस्थितछन्दोनामकहरेरेव मुख्यतः पापाद् रक्षकत्वं छन्दसां तु तत्सम्बन्धादेवेति ज्ञातव्यम् ।

(8) (i) तस्य नारायणस्यैव सर्ववेदात्मिका हि वाक् ।
तन्तिरूपा जगद्बन्धे नामब्रह्मादिकं च यत् ॥
विप्रक्षत्रियवैश्यादिरूपं चाखिलमेव तु ।
दाम तेनैव बध्नाति सकलं जगदच्युतः ॥
सर्वे हि नामवन्तोऽत्र सर्वे वेदोदिता अपि ।
वेदात्मिकया यतो वाचा विष्णुर्वदति सोऽखिलम् ॥ (M.B.)

(ii) तथैव वायुना बद्धं जगदेतत्ततोऽवरम् ।
सुपर्णशेषगिरिशशक्रसूर्याद्यमञ्जसा ॥
विष्णोर्वायोश्च लोमादौ छन्दास्येव श्रितानि च ।
विष्णोर्विमुक्तवायोश्च लोमाद्यं तु चिदात्मकम् ।
लोमप्राणादिभेदश्च नैव कश्चिच्चिदात्मनि ॥

The hairs, skin, flesh etc., mentioned with reference to Viṣṇu and Vāyu should not be taken in the ordinary sense. These are of the nature of Chit. In respect of Chitsvarūpa no such distinction such as hair, skin, etc. is to be really found.

(b) Expl. (1) Two Vedic hymns that bring out the fact that the Supreme God is the support of all are quoted and interpreted in this passage of Upaniṣat.

(2) The full text of the hymn quoted here is as under :

(i) अपश्यं गोपामनिपद्यमान-
मा च परा च पथिभिश्चरन्तम् ।

स सध्रीचीः स विषूचीर्वसान
अवरीवर्ति भूवनेष्वन्तः ॥

(ii) अप्रक्षितं वसु बिभर्षि हस्तयोरषाह्ळं..... ।
सहस्तन् विश्रुतो दधे
आवृतासोऽवतासो न कर्तृभिः ।
तनुषू ते क्रतव इन्द्र भूरयः ॥

All four pādas of the first hymn and the third pāda of the second hymn given above are interpreted in this passage of the Upaniṣat.

(3) एषः—छन्दस्संस्थित वायुस्थो भगवान् गोपाः । एषः सर्वछन्दोविद्यावेत्तृजनं गोपायति पापात् रक्षति, न संविशति—न तूष्णीं तिष्ठति सदा सर्वप्रवृत्तिमान् भवतीति यावत्, आ—आसमन्तात् पञ्चभूतानामन्तः, परा पराक् बहिश्च, पथिभिः—स्वाभिमत-मार्गैः, सध्रीचीः—सध्रीचीनासु अवक्रासु प्रान्त्यादिदिक्षु, विषूचीः—विषूचिषु वक्रासु आग्नेयादिचतुष्कोणदिक्षु वस्ते, आ वरीवर्ति—आ सम्यक् सर्वदा वर्तते ।

(4) कर्तृभिः धनसन्नहकर्तृभिः अवता सो न यथा आच्छाद्यन्ते तथा जीवाः तव तनुषु आवृताः ।

(5) (i) प्राणेन—भगवता वायुना च उपलक्षणमेतत् आकाशेन इत्यपि ग्राह्यम्, आकाशपदवाच्यचित्प्रकृत्या च, इदं सर्वं चेतनजातं महदाद्यचेतनजातं च आवृतं स्वदेहे गोपितम् ।

(ii) बृहत्या—बृहत्त्वात् बृहतीशब्दवाच्येन प्राणेन भगवता, आकाशः—प्रकृतिः ।

(iii) मुख्यतः बृहतीप्राणशब्दवाच्येन विष्णुना अमुख्यतः तद्वाच्येन वायुना प्रकृत्या च विष्टब्धानि विधृतानि ।

(6) (i) छन्दस्सु संस्थितो विष्णुर्गोपायत्येव तद्विदः ।
मन्त्रोप्यर्थमिमं प्राहापश्यं गोपामितिस्मह ॥
एष गोप्ता हि सर्वस्य वायुस्थः पुरुषोत्तमः ।
छन्दस्सु संस्थितो वायुर्वायौ स च जनर्दनः । (M.B.)

(ii) आवृताः सर्वजीवा हि यथैव कनका वटाः ।
आच्छाद्यन्ते वित्तवद्भिः ताभ्यामेवं च चेतनाः ॥
आवृता महदाद्यास्तु देहे तिष्ठन्ति चैतयोः ।
विष्टब्धाश्चैव सर्वेपि जीवा आकाश एव च ।
स वायुः प्रकृतिश्चैव विष्टब्धौ केशवेन हि ।
बृहत्त्वात् बृहतीत्येव तयोर्नाम प्रकीर्तितम् ॥
वायुकेशवयोः प्राणनाम सर्वप्रणयनात् ।
विशेषतो बृहत् प्राणो भगवान् तत्र केशवः ॥ (M.B.)

[II-1-7 (a)] Expl. (1) In this passage the glory of the limbs of the Supreme God is described.

भगवतः विभूतयः अङ्गमहिमानः निरूप्यन्ते । तत्रादौ मुखमहिमानं निरूपयति ।

(2) तस्य विष्णोः वाचा मुखेन, स्वदयति पाकेन स्वादुतायुक्ताः करोति, पितरं–स्वजनकत्वात् पितृरूपां वाचम् ।

(3) वाचः–विष्णुमुखस्य सर्वेषां मुखे स्थितस्य विभूतिम्–पृथिव्यग्निस्रष्टृत्वतत्सेव्यत्वरूपां वेद ।

(4) Attaining the world where पृथिवी and अग्नि extend is explained as-

पृथिव्यग्निवत् मुक्तः सन् विष्णुसमीपे वैकुण्ठादौ कदाप्यनष्टलोकः सन् वसतीति भावः । इदं च फलं पृथिव्यग्निपदयोग्यजीवानामेव । अन्येषां तु पृथिव्यग्निलोके मुक्तौ तत्सञ्चरणमात्रमिति ज्ञातव्यम् ।

The liberated Jīvas that are entitled to the position of the abhimāni deities of Prithivi and Agñi will remain near the Supreme God being in the respective worlds. But the other liberated Jīvas can only move in these worlds whenever these desire to do so undertaking the necessary upāsanas.

विष्णोर्वाग्विभवं वेद य उपास्ते च सर्वदा ।
योग्यः संस्तदुपासायाः स भूम्यग्निसमन्वितः ॥

समं तयोर्व्याप्तिमांश्च तद्वन्मुक्तश्चनित्यदा ।
अनष्टलोको वसति समीपे केशवस्य च ॥
योग्या अस्या उपासायाः पृथिव्यग्निपदस्य ये ।
योग्यास्ते वै मुख्यतया तदन्ये यत्र तौ स्थितौ ॥
तत्र चर्तुं समर्थाः स्युः मुक्तिं प्राप्य यदृच्छया ।
कादाचित्कोपासने तु तावत्येषां च योग्यतां ॥ (M.B.)

(b) Expl. (1) The glory of the ghrānendriya of the Supreme God is described here.

(2) अन्तरिक्षम्–तदभिमानी विघ्नेशः, वायुः–मुख्यः, भूताकाशमानिनं विघ्नेशमनु तत्प्रेरणया इति यावत्, चरन्ति–सर्वाणि भूतानि विष्णुप्रीत्यर्थं तीर्थक्षेत्राद्यटनं कुर्वन्ति, भगवत्कर्माणि श्रोत्रेण शृण्वन्ति ।

(3) अन्तरिक्षाभिमानी विघ्नेशः स्वजनकविष्णुप्राणसेवार्थं प्राणिनां विष्णुप्रीति-जनकयात्रादिप्राणव्यापारसिद्ध्यर्थं अवकाशं ददाति । तत्प्राणकृतानां जगत्सर्जनादि-व्यापाराणां श्रवणार्थं श्रोत्रस्य उपचायको भूत्वा श्रवणशक्तिप्रदश्च भवतीति यावत् ।

Two functions of Vighneṣa the abhimāni deity of Antarikṣa are mentioned here. 1. He provides space to all beings to move about, 2. He enables all beings to hear. These are the two things that we manage through Antarikṣa or Bhūtakaśa. Vighneṣa is the abhimāni deity of Antarikṣa. Therefore he is stated to enable beings in respect of these two functions. He enables the beings in respect of these two functions because, he is created from the ghrānendriya of the Supreme God. Enabling the beings in these respects is the service rendered by him to the Supreme God. The help received in respect of moving is to be utilised for visiting the pilgrim centres etc., of the Supreme God, and the help received in respect of hearing is to be utilised to hear the lord's glory.

(4) वायुर्गन्धवहश्चास्य भक्तिज्ञानप्रदस्तथा ।
भूतानां तस्य विघ्नये त्वन्तरिक्षं च कर्मणः ॥
तदीयस्यैव भोगार्थं जीवानां श्रुतिचारदम् ।

(c) Expl. (1) The glory of the chakṣurindriya of the Supreme God is described here.

(2) द्यौः—द्युलोकाभिमानी देवता, अन्नाद्यम्—अन्नपानीय श्रीतुलसीगन्धपुष्पादि-सर्वपूजासाधनद्रव्यं संप्रयच्छति । आदित्यश्च द्रव्यप्रकाशनं करोति ।

(3) ..... सूर्यः तत्कर्मसिद्धये ।
भूतानां ज्योतिषो दाता द्यौरप्यन्नाद्यदायिनी ॥ (M.B.)

(d) Expl. (1) The glory of Śrotra and Manas of the Supreme God is described here.

(2) दिशः—दिगभिमानिनः मित्रवरुणकुबेराः तमं—जीवश्रोत्रस्थितं भगवन्तम्, सर्वे—वीणावेणुमुरजमृदंगादिशब्दाः दिग्भ्यः एव आयान्ति दिग्देवताः स्वस्वाधिष्ठित-प्राच्यादिग्भ्यः सुशब्दान् भगवते समर्पयन्ति ।

(3) (i) आपः—अबभिमानिनः ब्रह्मवायुशेषाद्याः सर्वे देवाः जीवानां पुण्यं कर्म कर्तुं श्रद्धां प्रच्यन्ति ।

(ii) वरुणश्च मनोनिष्ठभगवन्मनसोऽर्थे धर्मेण पूर्तनिर्माणकर्मणा तत्र प्राणिनां श्रद्धोत्पादनेन प्रतां दाधार ।

(4) ब्रह्मशेषसुपर्णेन्द्रशिवाद्या आप ईरिताः ।
ते विष्णोर्मनसा जाता सर्वे चाबभिमानिनः ॥
वैश्वदेव्यस्ततोह्यापो वरुणश्च मनोभवः ।
प्राणिनां पूर्तपुण्येषु श्रद्धारूपमनोधिपः ॥ (M.B.)

(5) एवं हि सर्व देवा हि विष्ण्वङ्गेभ्यः प्रजज्ञिरे ।
स्वोत्पत्त्यङ्गं च ते विष्णोः शुश्रूषन्ते पृथक् पृथक् ॥
विष्णोः विषय धर्मेषु ज्ञानादिषु चतुर्मुखः ।
श्रद्धां ददाति भूतानां वैदिकश्रवणे विपः ॥
तान्त्रिके शेषरुद्रौ च शक्रो यज्ञादिकर्मणि ।
वायुर्गन्धवहश्चास्य भक्तिज्ञानप्रदस्तथा ।
भूतानां तस्य विषयेत्वन्तरिक्षं च कर्मणः ।
तदीयस्यैव भोगार्थं जीवानां श्रुतिचारदम् ।

अन्तरिक्षं च विघ्नेश: सूर्य: तत्कर्मसिद्धये ।
भूतानां ज्योतिषो दाता द्यौरप्यन्नाद्यदायिनी ॥

The विभूति or the glory of the Indriyas of the Supreme God described here has three important points : 1. The deities created from the respective Indriyas of the Supreme God are mentioned. 2. The functions discharged by these deities through the respective Indriyas of the Jīvas in which the Supreme God is present are also mentioned. 3. The benefit derived by the Jīvas by the proper utilisation of the functions of these Indriyas in the service of God is stated. These three points in respect of the five Indriyas viz., वाक्, घ्राण, चक्षुस्, श्रोत्र and मनस् are as under :

(1) From वाक् i.e., मुख the abhimāni deities of Prithivi and Agñi are created. Prithivi produces plants etc., and Agñi sweetens them by cooking. The food thus produced is offered to the Supreme God present in the mouth and thus Jīvas are enabled to subsist and serve the God. This is a service of the deities concerned to the Supreme God.

(2) From घ्राण i.e., घ्राणेन्द्रिय the abhimāni deities of Antarikṣa i.e., Vighneṣa and Vāyu i.e., Mukhyaprāṇa are created. Antarikṣa enables the Jīvas to move about in space and hear, Vāyu enables them to smell the fragrance. By this the Jīvas are enabled to visit the pilgrim centres etc., hear the glory of the God, and enjoy the fragrance of the flowers etc., offered to the God. By these the Jīvas are enabled to serve the Gods.

(3) From चक्षुस् i.e., the abhimāni deities of Dyuloka and Āditya are created. Dyuloka provides the rain and food, and Āditya provides light. By this the Jīvas are enabled to have the food, water and the other requirements to worship the God and offer naivedya to him. These objects are shown to them by light. By these the Jīvas are enabled to serve the God. This is a service rendered by the respective deities to the God.

(4) From श्रोत्र the abhimāni deities of the quarters i.e., Mitra, Yama, Varuṇa, Kubera and Chandramas are created. The abhimāni deities of Śrotra provide the sounds of musical instruments like Veeṇa, Veṇu etc., from all quarters. The Chandramas causes the first and the second half of the months to enable the Jīvas to perform the rituals of the respective time. By this the Jīvas to perform the rituals of the respective time. By this the Jīvas are enabled to serve the God. This is a service rendered by the respective deities to the Supreme God.

(5) From मनस् the abhimāni deities of Ap i.e., Brahma, Vāyu, Śeṣa etc., all deities, and Varuṇa are created. Brahmā etc., deities generatue faith in Jīvas, Varuṇa enables them to perform public utility activities like constructing tanks, wells, etc. By these the Jīvas serve the God. This is a service rendered by the respective deities to the God.

He who knows this glory of the Indriyas of the Supreme God attains the respective worlds.

[II-1-8 (a)] Expl. (1) The significance of the name 'Apah' is explained here.

(2) आप; - एषां देवानाम् आपः इति नाम उपपन्नमेव, इदम्- मदाख्यं ब्रह्म आप एन आप् शब्दाभिधेयं भवत्येव, सर्वगुणैः आपूर्णत्वात् इदं च प् शब्दवाच्यं ब्रह्म सर्वस्यापि जगतः मूलं कारणम् । अतः तदन्यत् सर्वं चतुर्मुखादिकं तूलं कार्यरूपम् । अयं भगवान् पिता एते ब्रह्मादयः पुत्राः ।

ब्रह्मादीनां विष्णुपुत्रत्वात् तदीयमाप इति नाम तेष्वमुख्यया वृत्त्या प्रयुज्यते इति ।

(3) अहम् आ देवेभ्यः देवपर्यन्तं मां वेद, ओमत्-उ-उत, आमत् मत्पर्यतं देवांश्चाहं वेद, अहं देवेषु व्याप्तः देवाश्च मयि स्थिताः इति यावत् ।

(4) एते देवाः मत्त एव प्रदानाः मदाज्ञामात्रेण सत्ताप्रतीतिप्रवृत्तिप्रदानवन्तः मत्प्रदत्तपदान्येव अधितिष्ठन्ति । मत्त एव सम्भृताः ज्ञानकर्मबलचेष्टादिदानेन पोषिताः। अतः असर्वप्रकारेण मदधीनत्वात् मन्नाम्ना व्यपदेशो युज्यते ।

(5) (i) आप इत्येव देवानां ब्रह्मादीनां कथं भवेत् ।
नामेत्यपृच्छल्लक्ष्मीस्तं मद्विदासं जनार्दनम् ॥
आप इत्येव नामैषां भवतीत्याह स प्रभुः ।
इदं मदाख्यं यद्ब्रह्म ह्याप इत्यभिधीयते ॥
आपूर्णत्वात् गुणैः सर्वैः तन्मूलमखिलस्य च ।
तूलभूतं तदन्यत्तु पिता ह्येष जनार्दनः ॥

(ii) आप इत्येव देवानां सर्वेषां प्रददौ हरिः ।
स्वकीयमेवमन्यानि पृथक् पृथगदात् प्रभुः ॥
नारायणादिनामानि ददौ नान्यस्य केशवः ॥ (M.B.)

(6) देवपर्यन्तमाव्याप्तिं वेदाहिं मम सर्वदा ।
मत्पर्यन्तं तथा व्याप्तिं देवानामपि सर्वशः ॥
मयि देवास्तेषु चाहमिति विद्धि वरानने । (M.B.)

(7) ..... स एष भगवान् गिरिः ।
गिरणात् सर्वभूतानां चक्षुर्नामास्य दर्शनात् ।
सर्वश्रोतृत्वतः श्रोत्रं मनो मन्तृत्वहेतुतः ॥
प्राणनामा प्रणेतृत्वात् तमेनं गुणपूर्तितः ।
गिरणाच्चखिलस्यास्य प्राहुर्ब्रह्मगिरिं प्रभुम् ॥
य एवं वेद तं विष्णुमापरोक्ष्येण शाश्वतम् ।
गिरत्येवाखिलं पापं भ्रातृवत् सह संस्थितम् ।

(8) गुणपूर्णत्वात् ब्रह्म अखिलस्य निगिरणात् गिरिः ब्रह्म चासौ गिरिश्चेति ब्रह्मगिरिः, पाप्मानम्–अप्रारब्धम्, भ्रातृव्यम्–भ्रातृवत् सह संस्थितम्, भ्रातृव्यः–बाह्यशत्रुरपि ।

(b) Expl. (1) Meditation of the Supreme God with certain attributes such as Asu, Prāṇa etc., is described here.

(2) असुः सर्वस्यापि निरसनात्, प्राणः प्रकृष्टानन्दरूपत्वात्, भूतिः ज्ञानैश्वर्यादिरूपः तद्दाता च, अभूतिः अज्ञानाद्यभूतिदत्वात्

(3) देवाः वाय्वाद्याः उपासांचक्रिरे, देवाः बभूवुः सुखसज्ज्ञानादि-पूर्णगुण-रूपभूतिमन्तः इति शेषः, सुप्तः - सुप्तस्थः सर्वदेवोत्तमो वायुः भूः भूः इत्येव प्रश्वसिति श्वासरूपेण विष्णुं शंसति, अत्र भूशब्दार्थः भूतिरित्येव।

(4) अभूतिः – अभूतिकारकः, स्वयमैश्वर्यादि गुणोज्झितश्च, पराबभूवुः अन्धे तमसि अधः पेतुः, आत्मना– परमात्मप्रसादेन–

(5) (i) असनाद् भगवान् सोऽसुः सर्वस्यापि जनार्दनः।
प्रकृष्टानन्दरूपत्वात् प्राण इत्यभिधीयते॥
स एष भूतिनामपि ज्ञानैश्वर्यादिभूतिदः।
अज्ञानादिप्रदातृत्वात् स एवाभूतिनामकः॥

(ii) देवानामपि सर्वेषां प्रधानोऽप्यपि मारुतः।
स्थित्वा सुप्तेषु विष्णुं तं भूर्भूरित्येव शंसति॥
भूशब्दार्थो भूतिरिति वैपरीत्येन चासुराः।
अभूतिकारकोऽस्माकमैश्वर्यादिगुणोज्झितः॥
इत्येवोपासते तस्मात् पराभूताश्च सर्वशः।

(c) Expl. (1) The presence of Vāyu as Prāṇa and Apāna in the body is described here.

(2) मृत्युः - मृत्युप्रदः संसारदाता, अमृतम्– मोक्षदः जीवनप्रदश्च,

(3) The hymn quoted and interpreted in this passage is as under.

अपाङ् प्राङेति स्वधया गृभीतो अमर्त्यो मर्त्येना सयोनिः।
ता शश्वन्ता विषूचीना वियन्तान्यन्यं चिक्युर्न निचिक्युरन्यम्॥

वायुः स्वधया सुखेन सुखरूपिणा हरिणा गृभीतः गृहीतः प्रेरितः सन् अपाङ् अवाक् एति गच्छति।

स्वधया आनन्दरूपहरिप्रसादेन अमर्त्यः अविलुप्तज्ञानः वायुः मर्त्यैः विनाशशीलैः प्राणिनां देहैः सयोनिः साधिष्ठानः।

तौ देहवायू शश्वन्ता शाश्वतौ, तत्र स्थूलदेहाः जीवानां मोक्षपर्यन्तं प्रवाहतः सन्त्येव सूक्ष्मदेहस्तु साक्षादेव अनादितः सम्बद्धः शाश्वतः। वायुरपि तत्तत्कल्पीयोऽनादिकालात् प्रवाहतो नियामकतया अस्त्येवेति शाश्वतः इति विवेकः।

विषूचीना विष्वगञ्चमानौ नानागती इति यावत् । तत्र वायोः परमचेतनकेशव प्राप्तिः, शरीरस्य पञ्चत्वरूपजडता प्राप्तिरिति गत्योः नानात्वं ज्ञेयम् । वियन्ता विरुद्धगमनौ । वायोरूर्ध्वगमनात्– देहस्य अधः क्षितौ पतनात्, निचिक्युः–पश्यन्ति ।

इत्यैतरेयोपनिषत्सु द्वितीयारण्यके प्रथमोऽध्यायः

द्वितीयारण्यके द्वितीयोऽध्यायः

[II-2-1 (a)] Expl. (1) The sarvaśabdavāchyatva of the Supreme God is described here by showing that the names śatārchin, Mādhyama etc., are primarily the names of the Supreme God.

(2) एष परमेश्वरः श्रिया वायुना च सह इमं लोकं ब्रह्मादिप्राणिशरीरजातं पुरुषरूपेण अभ्यार्चत् प्रविवेश

(3) य एष सूर्यमण्डलस्थसूर्ये स्थित्वा तपति प्रकाशते च सः प्राणः ।

(4) शतमर्चतीति योगेन शतार्चिनः । बहुरूपत्वात् बहुवचनम् ।
मधुछन्दःप्रभृतींस्तु रूढार्थानपि अमुख्यत एव तच्छब्दवाच्यानाचक्षते ।

(5) यद्यपि लोके योगरूढ्योर्मध्ये रूढेरेव मुख्यत्वं तथापि केवलरूढ्यपेक्षया भगवति महयोगस्यैव मुख्यत्वम् । विद्वद्रूढिसहितस्य तु सुतराम् ।

तदुक्तमनुव्याख्याने–

एतमेव तथा सन्तं शतर्चीत्यादिका श्रुतिः ।
आचक्षत इति ह्यत्र सन्तमित्यवधारणात् ।।
योगस्य रूढेः प्राबल्यं विद्वद्रूढिं च तत्रगाम् ।
बहुशो दर्शयन्त्यञ्जस्तात्पर्यात् सनिरुक्तिकम् ।।

अतः भगवति महायोगविद्वद्रूढ्योः उभयोरपि सत्त्वात् तस्यैव मुख्यतः तच्छब्द-वाच्यत्वम् ।

(6) मध्यतो दधे आत्मनः उदरे धृतवान् । सर्वस्य मध्ये अन्तःस्थित्वा धृतवांश्च । मध्ये स्थित्वा धारकत्वात् मध्यमः । स एव माध्यमः ।

(b) Expl. (1) The names Gritsamada, Viśvāmitra, Vāmadeva and Atri are shown to be the names of the Supreme God here.

(2) गृत्सश्चासौ मदश्च गृत्समदः, विश्वं मित्रं प्रियमस्य आसीदिति विश्वामित्रः । वामो भद्रः कल्याणकारकः देवानां वामत्वात् वामदेवः अधिकं त्राणादत्रयः, पापत्राणहेतुत्वादत्रयः इत्याचक्षते ।

[II-2-2 (a)] Expl. (1) Some more names of the Riṣis are stated to be the names of the Supreme God. In this manner the names of all Riṣis be taken to refer to the Supreme God.

(2) वाजानां प्रजानां बिभ्रद् बिभ्रद्वाजः, वाजानां भरन्निति व्युत्पत्त्या भारद्वाजः

(3) वसिष्ठो वसतामुत्तमः, स्वातन्त्र्येण सदा सर्वत्र वासकर्ता

(4) वेदादिकं प्रगात् प्रकर्षेण अगायत तस्मात् प्रागाथाः ।

प्रगाथाः इति ऋग्विशेषयोः संज्ञा । तदुक्तमनु क्रमणिकायाम् अथ प्रगाथाः बृहती सतोबृहत्यौ बार्हत इत्यादि ।

द्वादशाक्षरः तृतीयः पादः अन्ये त्रयः अष्टाक्षराश्चेत् सा बृहती । आद्य तृतीयौ द्वादशाक्षरौ इतरौ अष्टाक्षरौ चेत् सतो बृहती इति तयोर्लक्षणमपि तत्रैवोक्तम् ।

(5) पावमान्यः इति काश्चन ऋचः, अभ्यपवयत– संसारात् पावयामास

(6) क्षुद्रप्राणिषु स्थिताः भगवद्रूपसंघाः क्षुद्रसूक्ताः तन्नामानः अभवन्

(b) Expl. (1) Sarvaśabdavāchyatva of the Supreme God is eloquently described here.

(2) (i) अर्चत-गतवान्, मृतिकाले म्रियमाणं प्राणिजातं परित्यज्य भागेन स्थलान्तरं गतो भवतीति यावत् ।

(ii) सर्वेभ्यः अर्धेभ्यः प्राणिशरीररूपस्थानेभ्यः अर्चत गतवानित्यर्धर्चः ।

(iii) पादि अपादि अपद्यत प्रापेत्यर्थः ।

तस्मात् सर्वभूतिप्राप्तिमत्त्वात् पदम् ।

(iv) क्षरति सर्वाभीष्टं ददाति अतः क्षरः, अधिकं क्षरमित्यक्षरम् ।

(3) न केवलं ऋष्यादीनां नाम भगवतः किन्तु ता वा एताः सर्वा ऋचोऽपि तस्यैव नाम, वेदाश्च तन्नामैव, अपि च समुद्रमेघवृक्षपतनभेरीताडन घण्टास्वर्ण-

चंचुश्वासगर्गरगोधापि गादिघोषा अपि स्वव्यञ्जय वर्णद्वारा तस्यैव नामानि । एतत्सर्वमपि एकैव व्याहृतिः व्याहरणं निर्दोषगुणपूर्तिवाचित्वादेक प्रकारमेव नाम । एतच्च नारायणविषय एव । नान्यत्र । तत्रापि ऋचस्तु भगवद्गुणप्रकाशकत्वात् । प्राणे नारायण एव तत्परा एवेति विद्यात् ।

(4) प्राणशब्दश्च मुख्यतः विष्णौ प्रवर्तमानोऽपि वायावपि वर्तते । अतः सर्ववेदाद्यभिधेयत्वं वायोरप्यस्ति । (M.B.)

मध्यमो वायुरेवैकः उत्तमः केवलो हरिः ।
सर्वशब्दोदितौ तस्मादेतौ द्वावेव नापरः ।
श्रीरप्यखिलशब्दोक्ता विष्णुवन्नु मुख्यतः ।
तस्मादमितनामानावपि तौ मितनामवत् ।
श्रीश्च वायुश्च विष्णुस्तु मुख्योक्तेरमिताभिधः ।
अनन्तनामकत्वाच्च सोऽनन्तगुण ईरितः ।। (M.B.)

(c) Expl. (1) Indra had undertaken Mahāvrata sacrifice. Viśvāmitra was Hotā priest at this sacrifice. When he recited Brihatisahasra hymns, the Supreme God and Vāyu present in Indra were pleased. The Supreme God asked Viśwāmitra to recite Brihatisahasra hymns again and again, and bestowed his grace more and more. This is described here.

(2) Here इन्द्रधाम does not mean the abode of इन्द्र. It means the abode of the Supreme God present in Indra. Now, one cannot attain the same place thrice. Therefore, three places have to be envisaged. These are सालोक्य, भगवत्पुर and भगवदन्तःपुर. The reciter of Brihatisahasra hymns is expected to obtain these places one after the other. That too not immediately. Therefore, the expression इन्द्रधाम is to be interpreted as the grace of the Supreme God Sufficient to obtain these place.

अत्र प्रियधामसमीपप्राप्तिर्नाम भगवत्सालोक्यलक्षणफलप्राप्तिसाधन भगवत्प्रसाद-प्राप्तिरेव । द्वितीयवारशंसनेन भगवत्पुरप्राप्तिसाधनतत्प्रसादं प्राप । तृतीयवारशंसनेन भगवदन्तःपुरप्राप्तिसाधनतत्प्रसादं प्राप ।

(3) Here it is not Indra only who is asking Viśvāmitra to recite Brihatisahasra again and again but it is the Supreme God present in Indra who is pleased by the recitation of Brihatisahasra by Viśvāmitra and is asking him to recite it again and again.

हौत्रे नियुक्तं विश्वामित्रं यजमानः पुरन्दरो दृष्ट्वा विष्णुवायुभ्यामाविष्टः शंसेत्युक्त्वा तस्योप समीपे निषसाद ।

(4) The circumstances of the performance of Mahāvrata yāga by Indra and the recitation of Brihatisahasra by Viśvāmitra are explained as under.

(i) वृत्रं हत्वा पुरेन्द्रस्तु महेन्द्रत्वाभिपत्तये ।
महाव्रतं कर्म चक्रे हौत्रं चक्रेऽत्र कौशिकः ॥
भृगुरध्वर्युरभवद् ब्रह्म ब्रह्माभवत् स्वयम् ।
उद्गाता वायुरभवत् स्वयं नारायणः प्रभुः ॥
सादस्यमकरोत्तत्र तदन्येऽन्येपि च ऋत्विजः ।
बृहतीसहस्रं शंसिष्यन् यदा संस्मार केशवम् ॥
वायुना सह देवेशः तदा वासवमाविशत् ।
आविष्टो विष्णुनाथेन्द्रो वायुना सह कौशिकम् ॥
शंसेत्युक्त्वा निषण्णोऽभूदिदमन्नं तवेति सः ।
ऋक् साहस्रं शशंसाथ यज्ञाङ्गत्वेन भक्तितः ॥ (M.B.)

(ii) बृहतीसहस्रे प्रथमे सालोक्यं प्रददौ हरिः ।
द्वितीये स्वपुरप्राप्तिं तृतीयेऽन्तःपुरस्य च ॥
तथा स्वविषयं ज्ञानं विश्वामित्रे ददौ प्रभुः ।

[II-2-3] Expl. (1) It is made clear here that one who is present in Indra is Supreme God himself. His special names, and the attributes conveyed by them are also mentioned. It is further stated that the Supreme God present in the sun is the same as one present in Indra. He is also present everywhere.

(2) Viśvāmitra asks two questions here : Is the Supreme God present in Indra ? If so what are his special names and

attributes ? In answering these two questions, the second is answered first since Viśvāmitra already knew that the Supreme God is present in Indra and wanted to know his special names and the special attributes.

विश्वामित्र उवाच त्वामेवाहं जानीयामिति । अत्र अयमभिप्रायो विश्वामित्रस्य । तेजो बाहुल्यात् इन्द्रो अन्योऽपि वर्तते कोऽसौ ? प्रायेणानेन विष्णुना भवितव्यम् । अन्यस्यैतादृशतेजोऽयोगात् । यदि चायं विष्णुः स्यात् विशेषतो मे ज्ञातव्य इति ।

त्वां त्वदाविष्टम् अहं प्रथमतो जानीयाम् । स विष्णुश्चेत् त्वां त्वदाविष्टं विष्णुमेव विशेषतो जानीयामित्यर्थः ।

तत्र द्वितीयप्रश्नस्य श्रेष्ठत्वात् प्रथममुत्तरमभिधत्ते– प्राणो वा इति ।

(3) इन्द्राविष्टोऽहं प्रकृष्टानन्दरूपत्वात् प्राणः प्राणशब्दवाच्यः अहेयत्वादहं नामा, असनात् दोषादिनिरसनात् मनुतेः ज्ञानाच्च अस्मि नामा, ततत्वात् वेत्तृत्वात् त्वं नामा, पूर्णत्वात् सर्वनामकः, सर्वरूपेषु प्रभूतत्वात् भूतानि, सर्वैश्वर्यस्वरूपत्वात् एषनामा ।

(4) य एष सूर्यो स्थित्वा लोकं तपति सोपि तपननामा अहमेव । नाम्नः संकीर्तनं निर्वचनप्रदर्शनेनैव गुणलाभात् । स एवाहं सूर्यस्थितेन रूपेण सर्वाः दिशः विष्टः प्रविष्टः ।

(5) अन्नम्– अन्नाभिमानिनी रमा, मित्रं भोग्यत्वात् भार्या, दक्षिणम्– दक्षिण-भागास्थितत्वात् दक्षिणाख्या ।

(6) रमाभिमन्यमानम् अन्नं न प्रसिद्धम् अन्नं किन्तु विश्वामित्रेण दृष्टं बृहतीसहस्रमेव ।

[II-2-4 (a)] Expl. (1) The composition of Brihatisahasra hymns and the advantages of its recitation are explained here.

(2) The total number of syllables in Brihatisahasra is required to be thirty-six thousand. It is not necessary that all the hymns selected to form Brihatisahasra be a Brihati metre only. Hymns of Uṣṇik and triṣṭup metres are also included in Brihatisahasra.

यावतीभिः ऋग्भिः शंसिताभिः षट्त्रिंशत्सहस्राण्यक्षराणि भवन्ति यस्मात् कस्मादपि छन्दसः तावत्यः शंसनीयाः तदा इदं बृहतीसहस्रं सम्पन्नं भवति । न बृहतीछन्दस्कऋक्सहस्रेणैव भाव्यमिति नियमः ।

(3) (i) शरीर, आत्मा, प्राण etc., here stand for the respective abhimāni deities. The abhimāni deity for Śarīra is Svāyambhuva Manu, for Ātman i.e., Jīva Abhimāni deity is Chaturmukha-brahmā. For Prāṇa the abhimāni deity is Vāyu.

शरीरम्–शरीरमिमानि स्वायंभुवमनुदेवताकानि व्यञ्जनानि, आत्मा– जीवाभिमानि चतुर्मुखदेवतानि, घोषाः यरलवरूपाणि घोषापरपर्यायान्तस्थाक्षराणि, ऊष्माणः– शषसहाः, सप्राणः वायुदेवताकाः ।

(ii) Not merely the abhimāni deities of Śarīra, Ātmā and Prāṇa are to be taken into account but the Supreme God who is conveyed by Brihatisahasra as a whole and who regulates all these abhimāni deities is to be understood in this context.

बृहतीसहस्रवर्णानां तदभिमानिनां च नियामकः तत्प्रतिपाद्यश्च भगवानित्यपि ग्राह्यम् । अत एव फलवाक्ये एतद् एतदिति पदद्वयम् । एतत् मन्वादीनां बृहती-सहस्रवर्णाभिमानित्वम् । पुनः एतत्– भगवतः तत्प्रतिपाद्यत्वं तदुभयनियामकत्वं च ।

(4) वसिष्ठः– वसिष्ठपदयोग्यः जीवः वसिष्ठो बभूव । ततश्च सर्वेषु वेदपुराणेषु एतन्नामधेयं लेभे ।

(5) एतस्य बृहतीसहस्रस्य सम्पन्नस्य सम्भूयाक्षरपरिगणनेन स्वरव्यञ्जनभेदेन प्रत्येकं षड्विंशतमक्षराणां सहस्राणि भवन्ति । द्वासप्ततिसहस्राणि भवन्तीति यावत् । एवमेतदक्षरदेवतानां भगवद्रूपाणामपि स्वरव्यञ्जनभेदेन प्रत्येकं षट्त्रिंशत्सहस्राणि द्वासप्ततिसहस्राणि भवन्ति ।

(6) (i) बृहतीसहस्रे यानि व्यञ्जनगतानि रूपाणि तान्येव शतसंवत्सररात्रीणां देवताः । यानि च स्वरगतानि तान्येव शतसंवत्सराह्नामिति ।

(ii) उपासकाः पुरुषाः व्यञ्जनगतरूपाणामुपासने शतवर्षसम्बन्धिरात्रिषु भगवदुपासने यावत्फलं तावत्फलं प्राप्नुवन्ति । एवं स्वैरह्नानीत्येतदपि व्याख्येयम् ।

(7) द्वासप्ततिसहस्राणि रूपाण्येवं रमापतेः ।
शताब्दानामहोरात्रदैवतान्युत्तमानि च ॥
बृहतीसहस्रवर्णानामपि ध्यात्वाऽखिलान्यपि ।
शतवर्षहरिध्यानफलमाप्नोति पूरुषः ॥ (M.B.)

(b) Expl. (1) It is stated here that the forms of the Supreme God present in Brihatisahasra are present in Jīvas and everywhere else.

(2) (i) प्रज्ञामयः– प्रज्ञा प्रकृष्टज्ञानं तद्रूपः विष्णुः प्रज्ञाः स्वस्मात् परेभ्यश्च मेयः प्रधानः यस्य । तथा यो वेत्तीति यावत् । देवतामयः – विष्णुः देवत्वेन क्रीडादिगुणवत्त्वेन मयः यस्येति देवतामयः, ब्रह्ममयः विष्णुः ब्रह्मत्वेन पूर्णत्वेन मयः यस्येति ब्रह्ममयः, अमृतमयः– विष्णुः अमृतत्वेन नित्यत्वेन मयः, यस्य ।

(ii) These expressions refer to Viṣṇu in a general way and also his four Vyūha forms.

अत्र प्रज्ञादेवतामृतब्रह्मशब्दैः सामान्यतो विष्णुवाचकैः अनिरुद्ध-प्रद्युम्न-संकर्षण-वासुदेवाख्याः चतस्रो मूर्तयः विशेषतोप्युच्यन्ते ।

(3) The forms of the Supreme God that are present in Brihatisahasra are present in Puruṣa, in sūryamaṇḍala and everywhere else. This is brought out by the phrase 'योऽहं सोऽसौ योऽसौ सोऽहम्'. This phrase clearly states that the Supreme God present in Brihatisahasra and in sūryamaṇḍala is present in Jīva. It does not say that the Supreme God and the Jīva are identical. Such an interpretation will defeat the very purpose of offering prayers by Brihatisahasra hymns.

द्वासप्ततिसहस्रभगवद्रूपाणां स्वरव्यञ्जनभेदेन बृहतीसहस्रगतत्वोक्त्या पुरुषसंस्थितत्वमपि लब्धम् । शंसनीयबृहतीसहस्रस्य पुरुषसंस्थत्वात् । तथा एतेषामेव रूपाणामहोरात्रगतत्वोक्त्या सूर्यगतत्वमपि लभ्यते ।

(4) योऽहं अहेयत्वादहं नामा द्वासप्ततिसहस्ररूपवान् विष्णुः पुरुषस्थः स एवासौ सूर्यसंस्थः । योऽसौ सूर्यगतः विष्णुः सोऽहं भास्करादिभिः अहेयत्वादहं नामा पुरुषसंस्थः इत्यर्थः ।

(2) तस्मिन्– भूतान्तर्गते नारायणादिपञ्चरूपके, अन्नम्– सर्वलोकतर्पकत्वात् अन्नशब्दवाच्यं भोग्यवस्तुस्थितम्, अन्नादम्– भोक्तृभूतं भोक्तृषु स्थितभोगशक्तिप्रदं च भगवतो रूपं वेद, सोऽस्मिन्– स्वजातियूथे अन्नादो भोगभोक्ता वा आधिक्येन जायते। तथा अस्य स्वजातियूथस्य अन्नमाप्यायकश्चायं भवति।

(3) आपः– अप्सु स्थितः अन्नामा अनिरुद्धः, पृथिवी– पृथिवीस्थः तन्नामा नारायणः, लोके सर्वाण्यप्यन्नान्येतन्मयानि अप् पृथिवीमयान्येव भवन्ति, अप् पृथिवीस्थरूपद्वयाधीनान्येव भवन्ति । ततश्च सर्वलोकतर्पकतया अन्नत्वमनयोः सेत्स्यति।

(4) ज्योतिः– ज्योतिःस्थितः ज्योतिर्नामा प्रद्युम्नः, वायुः– वायुस्थः वायुनामा संकर्षणश्च अन्नादम्, ज्योतिर्वायुगतप्रद्युम्नसंकर्षणाभ्यामेवेदं सर्वं प्राणिजातम् अन्नमत्ति। शरीरे वायुना उद्दीपितः जाठरः जातवेदाः भुक्तमन्नं परिणामयतीति तावत् प्रसिद्धम्। न च भगवत्प्रेरणामन्तरेण ज्योतिर्वायुभ्यां तत्कार्यं निष्पद्यते। अतस्तद्गत भगवद्रूपयोरेव तद्धेतुत्वात् भोक्तृत्वाच्च उपपन्नमन्नादत्वम्।

(5) आवपनम्– अवकाशप्रदः, आकाशनामा तत्स्थो वासुदेवः।

(c) Expl. **(1)** Anna and Annāda forms of the Supreme God are further explained here.

(2) ओषणात् निधनाच्च ओषधिशब्दवाच्यौ वननीयपतित्वेन वनस्पतिनामकौ बहुरूपौ नारायणानिरुद्धौ।

प्राणानां भरणात् प्राणशब्दवाच्यौ बहुरूपौ संकर्षणप्रद्युम्नौ प्राणभृत्सु– जंगमप्राणिषु,

(3) तेषां प्राणभृतां जंगमप्राणिनां मध्ये ये उभयतो दन्ताः ऊर्ध्वम् अधश्च दन्तोपेताः, पुरुषस्य पुरुषाकारस्य हरेः विधामनुसृत्य स्थिताः देवगन्धर्वमर्त्याद्याः, इतरे– पुरुषभिन्नाः वृषभाश्वादयः।

(4) अधि–उपरिचरः, अधिपतिः, संकर्षणप्रद्युम्नयोः नारायणानिरुद्धोपरिचरणात् तद्भोक्तृत्वाच्च। गुणवैशेष्यप्राप्त्या भगवद्रूपेषु तारतम्यप्रसङ्गः इत्यतः अधीव चरन्ति अधीव भवति इत्युभयत्रापि इवशब्दप्रयोगः।

(5) कूटस्थस्यैव आधिक्यस्य मुक्तौ अभिव्यक्तेः आगन्तुकाधिक्यलाभात् इवशब्दः।

[II-3-2 (a)] Expl.(1) The presence of the Supreme God in various objects and his manifestations in them as per their capacity is described here.

(2) आविस्तराम्– आविर्बभूव, तारतम्येन । यः तारतम्येनैव सर्वभूतेषु विष्णुं सन्निहितं वेद स तस्य विष्णोरेव तदीय एव भवति । तत्प्रीतिगोचरो भवतीति यावत् ।

(3) प्राणभृत्– चेष्टावत्–जङ्गमजातम्, स नारायण एव आत्मानं स्वात्मानम् आविस्तरां तारतम्येन सर्वभूतेषु आविर्भूतं सम्यग् वेद नान्यः ।

(4) भगवत्सन्निधानतारतम्येनैव पदार्थानां तारतम्यम् ।

(5) A point to be noted here is that even plants, trees etc., स्थावर objects have mind. But it is very dormant. To indicate the dormant nature of their mind it is stated here that they have no mind, that is to say, they are as good as having no mind. The fact of plants, trees etc., possessing mind is particularly mentioned in Anuvyākhyāna and fully elaborated in Nyāya Sudhā.

यद्यपि स्थावराणामपि चित्तमस्त्येव । यथोक्तं सुधायाम्–

गीतात् पुष्पफलावाप्तिः स्पर्शात् कार्श्यं रसात् स्थितिः ।
अपि वृक्षस्य दृश्यन्ते.... ॥

इत्यनुव्याख्यानव्याख्यानावसरे

एवं कमनीयकान्तावलोकनेन उत्कोरकत्वं तिलकवृक्षस्य उपलभ्यते । तेन दर्शनकामौ । तेन नयनमनसी सिद्ध्यतः इति । तथापि जङ्गमप्राणिवत् चित्तकाय-प्रयत्नाद्यभावात् अभावव्यपदेशः ।

(b) Expl. **(1)** The position of animals is described here.

(2) (i) आविर्भावं तारतम्यात् यो वेद परमात्मनः ।
स तस्यैव विशेषेण प्रीतियोगात् भविष्यति ॥
स्थावरं जङ्गमं चैव भूयस्त्वेनाश्नुते हरिः ।
आविर्भूतस्तेषु सदा सम्यक् स्वात्मानमेव च ।
तारतम्यात् सन्निहितं सर्वभूतेषु केशवः ।

वेत्त्येक एव विष्णोर्यद्विशेषानेशानं सदा ।।
जङ्गमेषु च वृक्षेषु नैव तादृक् शिलादिषु ।
तस्माद् वृक्षादिषु रसश्चित्तं चलनवत्सु च ।
दृश्यते न शिलाद्येषु सन्निधिर्नहि तादृशी ।। (M.B.)

(ii) वृक्षेभ्योप्यधिकं विष्णुर्जङ्गमेषु प्रकाशितः ।
तेभ्योपि पुरुषे विष्णुर्गुणाधिक्यप्रकाशकः ।। (M.B.)

[II-3-3 (a)] Expl. (1) In the earlier verse it was stated that the human being is superior to animals, plants, trees, etc., and the God is more present in him. The same is being explained here by pointing out the presence of the five Vyūha forms of the God in human body.

(2) यः अस्मिन् पुरुषे पश्वादिभ्यः आधिक्येन सन्निहितो भगवान् स एषः पुरुषः पुरुषनामा भगवान् समुद्रः समुद्रिक्तः सम्पूर्णः ।

(3) स एष पुरुषः समुद्रः इति वाक्यमावर्तनीयम् । स एष पुरुषः जीवः यद्यपि भगवत्प्रसादात् समुद्रः समुद्रिक्तः सर्वलोकाधिपो भवति । तथाप्येनं पुरुषशब्दवाच्यं विष्णुम् अत्येव मन्यते सर्वस्माच्च अधिकमेव मन्यते । मुक्तोऽपि तद्भावं तेन साम्यं वा मन्यते ।

(4) स एष पुरुषः पुरुषस्थः पुरुषनामा हरिः पञ्चविधः ।

(i) यदुष्णं जाठराग्न्यादिकं तत् ज्योतिः तत्र ज्योतिषि ज्योतिर्नामा प्रद्युम्नः स्थितः ।

(ii) यानि खानि ये अवकाशाः कर्णनासादिविवररूपाः स आकाशः तस्मिन् आकाशनामा वासुदेवः ।

(iii) अथ यल्लोहितं श्लेष्मा रेतश्च ताः आपः तासु अप् नामा स्त्रीरूपी बहुरूपः अनिरुद्धः ।

(iv) यच्छरीरमस्थ्यादिरूपं कठिनं सा पृथिवी । तस्यां पृथिवीनामा नारायणः ।

(v) यः प्राणः स आयुः तस्मिन् वायुनामा संकर्षणः ।

(b) Expl. (1) The five forms of Vāyu and the presence of the Vyūha forms of the God in them is explained here.

देहस्य पञ्चभूतेषु भगवतः पञ्चरूपाणि उक्त्वा तत्र वायौ पुनः पञ्चरूपस्य भगवतः स्थितिमाह ।

इतरभूतेषु एकैकरूपेणैव स्थितः अतः वायुरेव विशिष्टः ।

(2) ताः पूर्वोक्ताः ज्योतिरादिचतुर्भूताभिमानिन्यः, एताः वक्ष्यमाणाः देवताः चक्षुः श्रोत्रं मनोवागित्येताः ।

(i) चक्षुः – ज्योतिर्भूतात्मकं तदभिमानी रविः ।

(ii) श्रोत्रम् – आकाशरूपं तद्देवाः मित्रधर्मवरुणकुबेराश्चत्वारः दिग्देवाः ।

(iii) मनः पृथिव्यात्मकं तद्देवाश्च शेषवीन्द्रशिवेन्द्रकामानिरुद्धगुरुचन्द्राः ।

(iv) वाक्– किञ्चित्तेजोयुक्ता विशेषेण तु अबात्मिका अतः भूतद्वयात्मकत्वात् वाचः तदभिमानी अग्निः उमा च ।

अत्र चक्षुरग्निः श्रोत्रं चन्द्रः मनः पर्जन्यः वाक् स्वाहेति चक्षुराद्यभिमानीनि द्वितीयकक्षास्थितानि देवतान्तराण्यपि ग्राह्याणि ।

(3) प्राणस्य वायोः अपायं निर्गमम् अनुयन्ति अनुसृत्यैव निर्गच्छन्ति ।

(4) यो यज्ञः स एषः वाचः चित्तस्य । चक्षुः श्रोत्रयोश्चेत्यपि ग्राह्यम् । तदभिमानिदेवानामिति यावत् । उत्तरोत्तरिक्रंमः उत्तरोत्तरं तारतम्यक्रमजातप्रेरणारूप वृत्तिजातः इत्यर्थः यज्ञो हि चक्षुः श्रोत्रमनोवाग्व्यापारसाध्यः । ताश्च तदभिमानिदेवताप्रेरिता एव स्वस्वव्यापारेषु प्रवर्तन्ते इति ।

(c) Expl. (1) The five forms of the Supreme God present in the five sacrifices, and also in the five savanas of Soma sacrifice are described here.

(2) स एष यज्ञः अग्निहोत्रादिभेदेन पञ्चविधः तत्र स्थितः भगवानपि अग्निहोत्रादिनामकः अनिरुद्धादिरूपः पञ्चविधः ।

अत्रायं विवेकः । अनिरुद्धः अग्निहोत्रे स्थितः प्रद्युम्नः दर्शपूर्णमासनाम्न्योः इष्टिविशेषयोः स्थितः । संकर्षणः बहुरूपः चातुर्मास्याख्येष्टिषु स्थितः । वासुदेवः पशुनामकेष्टौ स्थितः । नारायणः सोमयागे स्थितः ।

(3) पञ्चविधे सोमयागे अनिरुद्धादिमूर्तयः पञ्चविधाः अधिगम्यन्ते । प्रागञ्चनात् प्राक्शब्दवाच्या अनिरुद्धाख्या मूर्तिरेकाविधा जगत्प्रसवकर्तृत्वात् सवननामकानि प्रद्युम्नसंकर्षणवासुदेवाख्यानि त्रीणि रूपाणि तिस्रो विधाः । सर्वोच्चत्वात् ऊर्ध्व-शब्दवाच्यं नारायणाख्यं रूपं पञ्चमी विधा ।

[II-3-4 (a)] Expl. (1) The five forms of the Supreme God present in Yajña, Ahan etc., and also in stoma, Sāman, etc., are described here.

(2) यज्ञं याज्यत्वात् यज्ञनामानम्, अहार्यत्वात् अहर्नामानं, सर्वोत्तमत्वात् देवनामानं विष्णुं यः वेद सः सम्प्रतिवित् सम्यग् ज्ञानी ।

(3) यज्ञादिनामकभगवद्रूपस्यैव बृहतीसहस्रस्थितत्वमित्याह यदेतदिति । परिपूर्णत्वात् महत्, उक्थनामकबृहतीसहस्रस्थितत्वात् उक्थमेतद् भगवद्रूपम् ।

(4) तदेतत् बृहतीसहस्रस्थितमुक्थनामकं भगवद्रूपं पञ्चविधम् । स्तोम साम चिति छन्दःशस्त्रेषु पञ्चसु । तेष्वपि प्रत्येकम् अनिरुद्धादिनारायणान्तं पञ्चविधतया स्थितम् ।

(5) (i) तिस्रो विधाः वृणोतीति त्रिवृत् । अध्यात्माधिभूताधिदैवस्थितं स्तोमगतानिरुद्धस्य अनिरुद्धाख्यं रूपं त्रिवृदिति कथ्यते ।

(ii) पञ्चभूतेषु अध्यात्मादिभेदेन प्रत्येकं स्थितं प्रद्युम्नाख्यं रूपं पञ्चदशविधत्वात् पञ्चदशमित्युच्यते ।

(iii) तथा संकर्षणाख्यं रूपं षोडशकलात्मकलिंगशरीरे तदीयषोडशकलासु च स्थितत्वात् सप्तदशमित्युच्यते ।

(iv) वासुदेवाख्यं रूपम् अध्यात्मादिभेदेन सप्तधातुषु स्थितत्वादेकविंशतिविधतया एकविंशमित्युच्यते ।

(v) नारायणाख्यं तु रूपं मनोबुद्ध्यहंकारचित्तेषु सत्वादिगुणत्रये प्रकृतौ च अध्यात्मादिभेदेन स्थितैः चतुर्विंशतिरूपैः नारायणाख्यमूलरूपेण सह पञ्चविंशमिति गीयते ।

(6) (i) गायत्रं गायतां त्रायकत्वात् गायत्रनामकं प्रद्युम्नस्य अनिरुद्धाख्यं रूपम् ।

(ii) प्रद्युम्नाख्यं प्रद्युम्नीयं रूपं रथारूढत्वात् रथन्तरमुच्यते ।

(iii) संकर्षणाख्यं रूपं बृहद्रूपत्वात् बृहदित्युच्यते ।

(iv) वासुदेवाख्यं रूपं भद्रमोक्षप्रदत्वात् भद्रमित्युच्यते ।

(v) नारायणाख्यं रूपं मुक्तानां राजनात् राजनमित्युच्यते ।

(7) छन्दोगतसंकर्षणस्य पाञ्चविध्यम् ।

(i) गायत्रीनामकं संकर्षणस्य अनिरुद्धाख्यं रूपम् ।

(ii) प्रद्युम्नाख्यं रूपम् अग्निसूर्यस्थितत्वेन उष्णस्वरूपत्वात् उष्णिगित्युच्यते ।

(iii) संकर्षणाख्यं रूपं पूर्णत्वात् बृहतीत्युच्यते ।

(iv) वासुदेवाख्यं रूपं त्रिभिः रूपैः स्तूयत इति त्रिष्टुबित्युच्यते ।

(v) नारायणाख्यं रूपं द्वे पदे रूपे यस्येति द्विरूपत्वात् द्विपदेत्युच्यते एतानि च रूपाणि पञ्चापि योषिदाकाराणीति बोध्यम् ।

(7) (i) यज्ञेषु यज्ञनामानं याज्यत्वात् पुरुषोत्तमम् ।
अधिरूढं तथाहस्सु चाह्नामानमेव च ॥
आह्वार्यत्वाद्धि देवेषु देवं सर्वोत्तमत्वतः । (M.B.)

(ii) य एष उक्थनामाऽसौ सर्वोत्थापनको हरिः ।
महांश्च परिपूर्णत्वात् सहस्र बृहतीस्थितः ॥ (M.B.)

(iii) अनिरुद्धादिरूपेण स विष्णुः पञ्चधा स्थितः ।
सोमसामचितिच्छन्दश्शस्त्रेष्वपि पृथक् पृथक् ॥ (M.B.)

(b) Expl. (1) The five forms of the Supreme God present in the sacrificial pit of Śyena bird and also in Brihati hymns consisting of five units of hymns are described here. It is also pointed out that the forms of God conveyed by Viṣṇusahasranāma are conveyed by Brihatīsahasra.

(2) चितेः श्येनाकारत्वात् तस्याः शिर आदि पञ्चावयवाः प्रसिद्धाः । अतः तदन्तर्गतवासुदेवस्यापि पञ्चावयवाः सन्त्येव ।

तत्र वासुदेवस्य अनिरुद्धाख्यं रूपं शिरः प्रद्युम्नाख्यं रूपं दक्षिणः पक्षः, संकर्षणाख्यं रूपमुत्तरः पक्षः, वासुदेवरूपं पुच्छं नारायणाख्यं तु रूपमात्मा मध्यदेहः ।

(3) This passage should also be interpreted as applicable to Nārāyaṇa.

इदमेव वाक्यं शस्त्रगतनारायणस्य पाञ्चविध्यपरत्वेनापि व्याख्येयम् ।

अत्र शस्त्रशब्देन बृहतीसहस्रस्य पञ्चभागोपेतस्य प्रथमभाग एव ग्राह्यः ।

प्रथमे पञ्चकाद्भागे स्थितो नारायणः स्वयम् । इत्युक्तत्वात् ।

तथा च शस्त्रविशेषगतस्य यदनिरुद्धरूपं तच्छिरः प्रद्युम्नाख्यरूपं तद्दक्षिणः पक्षः यच्च संकर्षणनामकं रूपं तत् उत्तरः पक्षः यच्च नारायणाख्यं रूपं तत् आत्मा मध्यदेहः ।

(4) The five Sāmans referred to here are :

प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनानि ।

(i) प्रस्तावादिषु पञ्चधा भगवानवस्थितः तस्मात् प्रस्तोता प्रस्तावसाम्ना पञ्चकृत्वः प्रस्तौति ।

(ii) उद्गातापि उद्गीथगतं प्रद्युम्नाख्यं पञ्चकृत्वः उद्गायति ।

(iii) प्रतिहर्तापि प्रतिहारगतं संकर्षणाख्यं पञ्चकृत्वः प्रतिहारसाम्ना स्तौति ।

(iv) उपद्रवसामगानकर्तापि तद्गतं वासुदेवाख्यं पञ्चकृत्वः उपद्रवसाम्ना स्तौति ।

(v) निधनसामगातारः तद्गतं निधनं तन्नामकं नारायणं पञ्चकृत्वः उपयन्ति निधनसाम्ना उपगच्छन्ति ।

(5) जगद्रक्षकत्वेन प्रस्तूयते इति प्रस्तावः अनिरुद्धः, जगदुद्गमनहेतुत्वात् उद्गीथः, प्रद्युम्नः, प्रतिहरति संहरति जगदिति प्रतिहारः संकर्षणः, भक्तान् उप समीपं द्रावयतीति प्रापयतीति उपद्रवः वासुदेवः ।

(6) प्रस्तावादिषु सामसु स्तोभसहस्रं भवति । तच्च स्तोभसहस्रं पृथक् पृथक् विष्णुप्रादुर्भावानां वाचकम् ।

(7) The composition of Brihatīsahasra is as follows :

(i) तृचाशीतिभ्यः प्राक् प्रथमभागात्मकं यन्मन्त्रजातं सा एका विधा ।

(ii) गायत्री बार्हती औष्णिही चेति याः तिस्रः तृचाशीतयः ताः तिस्रो विधाः ।

(iii) यन्मन्त्रजातमूर्ध्वं तृचाशीतिभ्यः परं सा पञ्चमी विधा । यदेतत् पञ्चविधत्वेन उक्तं बृहतीसहस्रं तत् विश्वादिसहस्ररूपं प्रतिपादयति । न केवलं विश्वादिरूपसहस्र-वाचकमेव किन्तु सर्वं सर्वनामात्मकम् अनन्तनामवाच्यानन्तरूपाभिधायि ।

[II-3-5 (a)] Expl. **(1)** The composition of Brihatīsahasra has been described earlier. In order to glorify this composition, the other views of the composition of a thousand hymns are mentioned and rejected. Incidentally the importance of the hymns in Anuṣṭup is explained.

(2) किमन्यत् सत्– यच्छन्दः शंसितुमुपक्रम्यते इतोऽन्यत् उत्तमं किमस्ति । सर्वेषां छन्दसां साम्येन तारतम्याभावात् ।

(3) बृहतीसहस्रसम्पादनमेव कुतः । बृहतीतोऽन्यत् त्रिष्टुप् छन्द एव सत् तदुत्तमं ब्रूयाम । ततोप्यक्षराधिक्यादिति । एवं जगतीसहस्रवादिनोप्याहुः ।

(4) अनुष्टुप् सहस्रवादिनस्तु तस्याः बृहत्यादितः अक्षराधिक्याभावात् तदुत्तमत्व-साधनाय तत्प्रशंसात्मिकामृचं दर्शयन्ति । तदुक्तं ऋषिणा–

(5) (i) वाचि–वागाख्यायामनुष्टुभि, नृसिंहप्रतिपादकानुष्टुप् छन्दस्कऋचि हंसरूपेण विष्णुना ब्रह्मरुद्रादीन् प्रति उच्चार्यमाणायां व्याख्यायमानायां च सत्यां, इन्द्रम्–परमेश्वरम्, प्राणम्–विष्णुम् मुनयः न्यचायन् ददृशुः ।

(ii) तथा वायुना वाचि रुद्रादीन् प्रति उपदिश्यमानायां ऐन्द्रम्– इन्द्रः परमेश्वरः तत्सहितं प्राणं हंसरूपिणं वायुं हंसरूपिणः विष्णोः समीप एव ददृशुः ।

तथा च ब्रह्मादिभिरपि विष्णोः सकाशात् अनुष्टुबर्थस्यैव सदाश्रूयमाणत्वात् अनुष्टुबेव वरा इत्युक्तं भवति ।

While the hymns in Anuṣṭup metre were sung by the Supreme God Viṣṇu in his Hansa form to

Chaturmukhabrahma etc., the seers saw him. The seers also saw the Vāyu in his Hansa form when he sung the hymns in Anuṣṭup metre to Rudra etc. This is an indication of the importance of Anuṣṭup metre.

(6) भवितोः भवितुं, भावो मुक्तिः मुक्तो निष्पत्तुं, आयुषः आयुः परिसमाप्तेः पुरा तु पुरापि प्रेतोः मर्तुं च ईश्वरः समर्थः स्वच्छन्दमृत्युः स्यादिति यावत् ।

(7) मेधसंस्थं हंसरूपं तं विष्णुं परमेश्वरम् ।
विरिञ्चशर्वपूर्वेभ्यो नृसिंहानुष्टुभं पराम् ॥

उच्चारयन्तमर्थांश्च व्याचक्षाणं समन्ततः ।
ददृशुर्मुनयो दिव्या आचार्यं ब्रह्मशर्वयोः ॥
एवं वायुं च ददृशुस्तत्र हंसस्वरूपिणम् ।
शिवादिभ्यो व्याहरन्तं तामेवानुष्टुभं पराम् ॥ (M.B.) .

(8) The text of the hymn quoted in this passage of the Upaniṣad is as under :

बीभत्सूनां सयुजं हंसमाहुः ।
अपां दिव्यानां सख्ये चरन्तम् ॥
अनुष्टुभमनु चर्चूर्यमाणम् ।
इन्द्रं निचिक्युर्कवयो मनीषा ॥

The seers say that the Supreme God in his Hansa form together with Vāyu in his Hansa form moves in the clouds to enable the abhimāni deities of water to discharge their function of helping the world.

These seers see the Supreme God in Hansa form and also Vāyu in Hansa form reciting Nrisimha Anuṣṭup to Chaturmukha-brahmā etc.

(b) Expl. (1) The importance of Brihati is pointed out here.

(2) (i) पुमान् प्राणेन वायुना मनसा मनोभिमानिना शिवेन अभि अभितः विषयेषु इस्यमानः अस्यमानः अनुभवति । न तु वाचा वागभिमानिन्युमया । अतः जीवानां विषयानुभवप्रेरकत्वाभावात् सा अकृत्स्ना ।

(ii) बृहती– बृहत्यभिमानिदेवता वायुः कृत्स्नः पूर्णः आत्मा विष्णुप्रतिमा ।

(3) आत्मा– मध्यदेहः, चतुर्मुखमध्यदेहजातत्वात् बृहत्याः इतरच्छन्दोभ्यः तदितराङ्गजातेभ्यः उत्तमत्वमित्यपि द्रष्टव्यम् ।

अङ्गेभ्य एव सम्भूतान्यन्यच्छन्दांसि चाब्जजात् ।
मध्यात्तु बृहती जाता तस्मात् सा मध्यमुच्यते ॥
पठ्यते तेन मध्ये सा छन्दसां प्रवरा सती ।
छन्दास्यन्यान्यङ्गवत् स्युः मध्यवत् बृहती परा ॥
[illegible]ांसि चैदं हि प्रतिमा वैष्णवी मता ।

[II-3-6 (a)] Expl. (1) The fact of Brihatīsahasra being the Pratimā of Viṣṇu, Vāyu and Umā in the respective order is described here.

(2) अष्टचतुरक्षरात्मिका द्वात्रिंशदक्षररूपा अनुष्टुप्, सैव अनुष्टुप् उत्तरानुष्टुभः चतुरक्षराणि उपादाय यदा बृहती सम्पद्यमाना भवति तदा नवस्रक्तिः भवति । नवाः स्रक्तयः विभागाः चतुरक्षररूपाः यस्याः सा ।

(3) ऋतस्पृशमित्यस्य अर्थः सत्यं वै वाग् ऋचा स्पृष्टेति । वाक्वागाख्यानुष्टुप् उक्तरीत्या नवस्रक्तीभूय ऋचा ऋग्रूपेण बृहती रूपतां प्राप्येति यावत् । सत्यं सत्यरूपं विष्णुं सृष्टा विष्णुविशेषसन्निधान पात्री वै इत्यर्थः ।

(4) यदेव एतद् बृहतीसहस्रं तत् अनुष्टुप्सम्पन्नं पञ्चविंशत्युत्तरैकादशशत-संख्याकानुष्टुब्भ्यः सम्पन्नं भवतीत्यर्थः ।

(5) (i) इदं बृहतीसहस्रं वायुप्रतिमारूपं तावत्। अत एव विष्णुप्रतिमारूपमपि एतदधिष्ठानुर्वायोः विष्णुमुख्यप्रतिमात्वात् । तस्मात् बृहतीसहस्रसम्पादने विष्णुप्रतिमा निर्मिता भवति ।

(ii) एवम् अनुष्टुब्देवता उमापि भगवत्प्रतिमारूपा सा च बृहतीदैवतप्राणरूपवायोरुत्पन्ना ।

(6) ऋतस्पृक्– ऋतं सत्यरूपं शश्वदेकप्रकारं विष्णुं स्पृशतीति ऋतस्पृक्, इन्द्रात्– परमेश्वरात् तद्बलादेवेति यावत्, परमेश्वरातिप्रियप्राणदैवत- वायुबलाच्च । परिममे–निर्मितवान् ।

(b) Expl. (1) The five aspects of the great Uktha i.e., Brihatīsahasra are described here.

(2) महदुक्थं बृहतीसहस्रं वाचः अकारस्य परमो विकारः इतरसर्वशब्दापेक्षया उत्तमव्याख्यानमित्यर्थः । परम इति विशेषणात् अन्यत् सर्वं शब्दजातं विकारमात्रमित्यपि ग्राह्यम् । तदेतत् परमविकाररूपं बृहतीसहस्रं विकारमात्ररूपमन्यत् सर्वं शब्दजातं च पञ्चविधम् ।

(3) (i) स्वरनियमवती वाक् ऋक्, स्वरनियमरहिता मिताक्षरा गाथा, परस्परसमाक्षराणि खण्डवाक्यानि कुम्ब्याः तदेतत् त्रयं मितम् ।

(ii) यज्ञाङ्गं वाक्यं यजुः, यज्ञानङ्गं वाक्यं निगदः, अर्थसत्ताहीनं वाक्यं पृथावाक् तदेतत् त्रयममितम् ।

(iii) साम बृहदादि, गेष्णः यत्किञ्चिद् गानम्, तदेतद् द्वयं स्वरः ।

(iv) ॐ इत्येतदक्षरं सत्यमित्युच्यते । मूलभूतस्य अकारस्य ॐकारे आदावेवस्थितत्वात्, अकारार्थस्यैव ॐकारवाच्यत्वात् शब्दतः अर्थतश्च व्यत्यासाभावेन यथावस्थितरूपत्वात् ।

(v) नेत्यक्षरमनृतमुच्यते ।

(c) Expl. **(1)** The significance of 'Om' and 'Na' and the proper use of these is described here.

(2) पराग्–प्रतिकूलम्, रिक्तम्–रिक्तताप्रदम् । यत्किञ्चिद्धनादिकम् अर्थिभ्यः पुमान् ओमित्याह ददामीति ब्रूयात् तत् रिच्यते अपगच्छति । यदि सर्वमपि स्वकीयं धनाधिकं ॐकुर्यात् तर्हि आत्मानं रिंच्यात् रिक्तं कुर्यात् । ततश्च कामेभ्यो नालं स्यात् स्वाभिलषितपुरुषार्थ प्राप्तये समर्थो न स्यात् ।

(3) यन्नेत्यक्षरमेतत् यद्यप्यभ्यात्मं पूर्णमात्मानमभि आत्मनः पूर्णत्वकारणम् । अर्थिभ्यः यदि नेति वदेत् स्वकीय धनादेः स्वस्मिन्नेव अवस्थानात् रिक्तता प्राप्तिः न भवति । तथापि अर्थिभ्यः सर्वं नेति ब्रूयात् तर्हि अस्य पापिका कीर्तिः जयते । सा च पापिका कीर्तिः एनं पुरुषं तस्मिन्नेव जन्मनि हतप्रायं कुर्यात् ।

(4) सर्वोकरणस्य सर्वप्रतिषेधस्य चोक्तरीत्या अनर्थहेतुत्वात् काल एव दद्यात् काले न दद्यात् । पुण्यकाले पुण्यदेशे सत्पात्रेष्वेव द्रव्यं ज्ञानं वा फलमनभिसन्धाय श्रीविष्णुप्रीत्यर्थं दद्यात् । अपुण्यकालदेशयोः अपात्रेषु च फलाभिसन्ध्यादिना न दद्यात् ।

(5) वाक्शब्देन अकारः विवक्षितः विकारशब्देन सर्वापि वाग् विवक्षिता ।

(6) उपांशु– उपांशूच्चारणम्, शरीरम् स्थूलसूक्ष्मभेदेन द्विविधस्य सर्वप्राणिशरीरस्य अभिमानिनी या भारती, तिर इव तिरोभूतमिव ।

(7) प्राणः अशरीरः शरीराभिमानशून्यत्वात् । यथोक्तम्– ब्रह्मा निरभिमानत्वात् शरीर्यप्यशरीरवान्, आविः– आविर्भूतम् श्रवणप्रत्यक्षगोचरं भवति ।

[II-3-7 (a)] Expl. (1) The significance of Brihatīsahasra is described here in another way.

(2) तद्यशः – तस्य नारायणस्य गुणकर्मकीर्तनरूपम्, सः भगवानेव इन्द्रनामा प्रथमेन्द्रत्वात् परमैश्वर्ययोगाच्च, भूतानाम् ब्रह्मादीनां जीवानामधिपतिः ।

(3) विस्रसा– अखिलबन्धात् विस्रस्तः सन् अस्मात् लोकात् प्रैति– हरेः लोकं गच्छति ।

(4) प्रेत्य– श्वेतद्वीपादिलोकादिमं प्राप्य, भूत्वा अत्र प्रादुर्भूय ।

(b) Expl. (1) The male and the female forms of the Supreme God present in men and women are described here.

(2) अनेन–भूमिगतेन पुरुषेण अमुम्–दिविष्ठं लोकं लोक्यते अवलोक्यत इति लोकशब्दवाच्यं स्वकीयं स्त्रीरूपम्, अभिसम्भवति अभिगच्छति किम् ?

(3) केन रूपेण पृथिवीसंस्थं स्वस्त्रीरूपमाभवति रमते ? उभयोर्मेलकं किमित्यभिप्रायान्तरमपि द्रष्टव्यम् ।

(4) स्त्रियाम्–स्त्रीशरीरे यल्लोहितं भवति तत् अग्नेः अग्निनाम्नः अग्निष्ठस्य स्त्रीरूपस्य हरेः रूपम्– सन्निधानपात्रम् तस्मात् भार्याशरीरगतलोहितान्न बीभत्सेत न जुगुप्सेत । पुरुषे यदेतद् रेतः तदादित्यनाम्नः आदित्यस्थस्य पुंरूपस्य हरेः रूपम्– सन्निधानपात्रम् ।

(5) उपलक्षणमेतत् देवस्त्रीलोहिते देवरेतसि पृथिव्यां दिवि च भगवान् स्त्रीरूपेण पुंरूपेण च सन्निहितो वर्तते इति ग्राह्यम् ।

(c) Expl. (1) The Supreme God is svaramaṇa, that is to say, he does not need any other female partner to enjoy. Therefore, he enjoys with his own female forms whether on earth or heaven. This is explained here.

(2) सोऽयं भूमिष्ठः महिदासादिप्रादुर्भावरूपः भूमिष्ठं मानुषस्त्रीलोहितगतं स्त्रीरूपमात्मानम् अमुष्मै दिविष्ठाय सूर्यगाय देवरेतसि स्थिताय पुरुषरूपाय आत्मने ददाति ।

(3) असौ सूर्यगतः विष्णुः अमुं देवस्त्रीलोहितगतं स्त्रीरूपमात्मानं भूमिष्ठाय महिदासादिरूपिणे मानुषरेतसि स्थिताय आत्मने ददाति । द्यु भूमिगतानि विष्णोः पुरुषस्त्रीरूपाणि अन्योन्यमभिसम्भवतः मिथो रमन्ते ।

[II-3-8 (a)] Expl. (1) The five forms of the Supreme God Nārāyaṇa etc., enjoying in their ardhanārinara form is described here. It is also stated that the gods will comprehend sarvaśabdavāchyatva of the Supreme God.

(2) नारायणादिरूपेण पञ्चविधम् अक्षरं परं ब्रह्म स्वस्मिन्नेव स्त्रीपुंरूपेण अर्धनारीनरात्मकेन संयुक्तं भवति ।

(3) युजः– स्वस्वभार्याभिः सह अर्धनारीनरात्मकेन रूपेण संयुक्ताः देवाः अश्वरूपेण रथे संयुक्ताः नारायणाख्यं परं ब्रह्म रथारूढं संवहन्ति ।

(4) सत्यस्य–साधुगुणस्य मुख्यप्राणस्य सत्यं साधुगुणताप्रदं स्वयमपि निरवधिकसाधुगुणपूर्णत्वात् मुख्यसत्यं नारायणाख्यं परं ब्रह्म यत्र अनुयुज्यते तत्र सर्वे देवाः एकं भवन्ति मुक्ताः सन्तः मिलिताः भवन्ति ।

(5) यस्मात् अक्षरात् नारायणाख्यात् स्वयमेव प्रादुर्भावात्मकं ब्रह्मरूपमक्षरं स्त्रीपुंरूपेण युक्तं सत् बहिरागच्छति ।

(6) वाचः वाक् समूहस्य मध्ये ओमिति पदमङ्गीकारवाचि नेति प्रतिषेधार्थम्, क्रूरम्–अर्थतः, कठिणम्, डल्बणिष्णु–शब्दतः कठिणम्, वियूप–विचार्य, कवयः– देवाः, नामायत्ता–नामाधीनानि नामार्थभूतानि विष्णुमाहात्म्यादीनि, श्रुते–ज्ञाने परिपक्वे सति, अधि–अधिकं समतृप्यन् ।

(7) देवाः सर्वयुजः– सर्ववाक्कायकर्मभिः युक्ताः भवन्ति, ब्रह्मणा तत्प्रसादेन, पाप्मानम्–अप्रारब्धम्, स्वर्गं लोकम्– वैकुण्ठादिस्थानम् ।

(b) Expl. **(1)** The male and the female forms of the Supreme God are described here. The fact athat the number of syllables of Brihatīsahasra and the forms of the God being the same is also stated here.

(2) अहरभिमानि सूर्यरूपेषु स्थितानाम् अहर्नामकानां पुमाकाराणां भगवद्रूपाणां सहस्राण्यपि तावन्ति ।

(3) कदाचित् लीलया भगवान् सूर्यगताहर्नामक–पुंरूपाणि स्त्रीरूपाणि कृत्वा स्त्र्याकारमाप्नोति । न तदा स्त्रीपुंसयोः व्यत्यासः ।

(4) अनस्य प्राणस्य उत्पत्तिकामः सन् मायां लक्ष्म्यां रमत इति अनकाममारनामा भगवान् । स्वेच्छयैव स्त्रीपुंरूपैः रमते ।

(5) देवरथः–देवस्य विष्णोः वायोः रथः । अध्यात्मं देहाख्यः । अधिदैवं रथरूप एव ।

(6) वाक्–वागाभिमानिनी उमा, उद्धिः – उद्धारणरज्जुरूपा, श्रोत्रेदक्षवाम-श्रोत्रगतचन्द्रतद्भार्ये, पक्षसी–दक्षवामपार्श्वयोः अश्वरूपेण स्थिते, चक्षुषीदक्षवाम-चक्षुर्गतसूर्यतद्भार्ये पुरतो योजिताश्वरूपे, मनः–मनोभिमानी रुद्रः संग्रहीता सारथिः ॥

इति द्वितीयारण्यके तृतीयोऽध्यायः

द्वितीयारण्यके चतुर्थोऽध्यायः

[II-4-1 (a)] Expl. (1) The process of creation is described here.

(2) आत्मा – नित्याततगुणत्वात् आत्मशब्दवाच्यः विष्णुः, अग्रे-प्रलयकाले ।

(i) रमायाः प्रलयकाले सत्त्वेऽपि भगवदधीनतयैव सत्त्वात् स्वातन्त्र्येण स्थित्य-भावादेवमुक्तिः ।

(ii) अथवा रमाब्रह्मादिकं सर्वमपेक्ष्य आत्मा विष्णुरेव एव कालतो गुणतश्च अग्रे पुरस्सरः श्रेष्ठः आसीत् ।

(3) मिषत्– ज्ञानादिगुणैः भासमानम्

(4) लोकान्– लोकाभिमानित्वेन लोकशब्दवाच्यान् ब्रह्मादिदेवान् तदभिमन्यमानान् सत्यादिजडलोकांश्च ।

(5) अम्भः– अं विष्णुं बिभर्तीत्यम्भः प्रत्यक्षत एव विष्णुसञ्चारस्थानम्, अम्भः द्विविधं परेण दिवः, द्यौश्च, परेण दिवः विद्यमानं च वैकुण्ठादिस्थानत्रयं महरादिलोकचतुष्टयं चेति सप्तकम् ।

(6) ननु कथं दिवः विष्णुलोकत्वं येन अम्भोनामिका सा स्यात् इत्यतः उक्तं प्रतिष्ठा-प्रतितिष्ठति अत्र भगवानिति तथा च दिवोप्यम्भस्त्वं युक्तम् ।

(7) वैकुण्ठादि लोकसृष्टिकथनं भूदुर्गाभावविवक्षया व्यक्तिविवक्षया वा ।

(8) मरीचयः अस्मिन् वर्तन्त इति मरीचीः मरन्ति क्षिप्रमस्येति मरः पृथिवी । याः अधस्तात् ब्रह्माण्डोत्पत्तेः पूर्वं सृष्टाः देवताः ताः आपः इत्युच्यन्ते । एतासां च लोकाभिमानित्वेन लोकशब्दवाच्यत्वम् ।

(b) Expl. (1) Brahmāṇḍasriṣṭi and the creation of abhimāni deities is described here.

(2) यद्यपि प्राक्सृष्टाः अप्शब्दवाच्याः देवाः एव लोकपालाः न ततोऽतिरिक्ताः तथापि ब्रह्माण्डन्तः पुनः प्रजातरूपान्तरविवक्षया इयमुक्तिः ।

(3) अद्भ्यः – याः पूर्वं सृष्टाः अप्शब्दवाच्याः महदादितत्त्वाभिमानिन्यः ब्रह्मादिदेवताः ताभ्य एव पुरुषनामानं ब्रह्माणं समुद्धृत्य रुद्राद्यंशैः सह अंशतः पृथक्कृत्य तथा महदादितत्वात्मक तत्तदचेतनभागानप्युद्धृत्या मूर्छयत् मूर्तमकरोत् । चेतनाचेतनात्मकमेकस्थं राशिं विदधे ब्रह्माण्डमुत्पादयामास ।

(4) तं च ब्रह्माण्डरूपं ब्रह्माणमभ्यपतत् मुखाद्यङ्गानि यथा निरभिद्येरन् तथा परिणतं चकार ।

(5) मुखशब्देन अण्डाकारं निरवयवं शिरोभिधमङ्गं ग्राह्यम् । ततश्च तस्मिन् मुखमास्यं निरभिद्यतेत्यावृत्त्या ग्राह्यम् ।

(6) तस्मात्– मुखात् वाक् वाङ्नामा वह्निरभूत् वाचः उत्पत्त्यनन्तरमग्निः अग्निनामकं तस्यैव रूपान्तरमुत्पन्नम् । अत्र प्रथममध्यात्मरूपं द्वितीयमधिदैवमिति बोध्यम् । एवमुत्तरत्रापि ।

(7) वायुः प्रधानवायुसुतो मरुत्, दिशः– दिग्देवताः मित्रधर्मवरुणकुबेराः, ओषधिवनस्पतयश्चेति द्विविधाः पारिजातादिदेवताः ब्रह्मणः त्वगुद्भवाः, मनः– मनोभिमानी तन्नामा चन्द्रः । उपलक्षणमेतत् । बुद्ध्यभिमानिनः बुद्धिनामानः गरुडशेषशिवाश्चेत्यपि ग्राह्यम् ।

(8) एवं हस्तौ निरभिद्येतां हस्ताभ्यां द्विविधः शक्रः, पादौ निरभिद्येतां पादाभ्यां द्विविधः शक्रसूनुः यज्ञः, पायुर्निरभिद्यत पायोः निर्ऋतिः यमश्च जातावित्युपलक्षणीयम् । एवमेव जिह्वा निरभिद्यत जिह्वायाः रसनं रसनाद् वरुणः इति द्विविधो वरुणोप्युपलक्षणीयः ।

(9) अपानः मृत्युरिति द्विविधः प्रधानवायुरेव रेतः आपः इति द्विरूपः शिव एवेति बोध्यम् ।

[II-4-2 (a)] Expl. (1) It is stated here that the deities created in Brahmāṇḍa assumed the form of Puruṣa.

(2) देवताः– ब्रह्मदेहतः सृष्टाः ब्रह्माद्याः देवताः सर्वा अपि देवताः परमात्मानं स्तुवन्त्यः, देवताः दिव्याम्बरकुण्डलादिभिः द्योतमानाः ।

(3) अशनापिपासाभ्याम् – तदभिमानित्वादिना तन्नामकाभ्यां वायुरूपाभ्याम् अन्वावजत् संयोजयामास तदभिमन्यमानभोक्तृत्व शक्त्या योजयामास ।

(4) देवाः एनं विष्णुमब्रुवन् । किमिति । वयं यस्मिन् प्रतिष्ठिताः अन्नमदाम तादृशमायतनं भोगोपयोगिशरीरं नः अस्माकं प्रजानीहि । गोरूपं ब्रह्माणं ददौ । अश्वाकारं ब्रह्माणमानयत् । पुरुषम्– ब्रह्मणः पूर्वसृष्टं पुरुषाकारशरीरमानयत् । सुकृतम्– सृष्ठु अलम् अस्माकं भोगानुभवाय ।

(b) Expl. (1) The fact of entry of the abhimāni deities and becoming the respective organs of the body is described here.

(2) भगवानेता देवता अब्रवीत् इमं ब्रह्मदेहं यथायतनं युष्मदुत्पत्तिस्थानानुसारेण प्रविशत । एवं भगवदाज्ञानुसारेण अधिदैवम् अग्निः अध्यात्मं वाङ्नामको भूत्वा मुखमास्यं प्राविशत् । एवमुत्तरत्रापि ।

(3) एवं सर्वदेवताप्रवेशानन्तरं तं विष्णुम् अशनापिपासे तदभिमानी द्विरूपो वायुरब्रवीत् ।

(4) वायुरूपे प्रति विष्णुरब्रवीत् एतास्वेव वह्न्यादिदेवतासु युवां प्रवेशयामि ।

[II-4-3 (a)] Expl. (1) The fact of Chaturmukhabrahmā assuming the forms of Bhogya and Bhoktā and demonstrating that it is only Mukhyaprāṇa who helps to eat one's food but not other deities is explained here.

(2) अथ स भगवान् लोकपालेभ्यः देवेभ्यः अन्नं सृजा इति ईक्षन् अबाख्याः पूर्वसृष्टाः महदादितत्त्वाभिमानिनीः ब्रह्मादिदेवताः अभ्यतपत् अभ्यपश्यत् । ताभ्यः मूर्तिरजायत तासां सर्वासामपि देहैकदेशेभ्यः मिलितं विरिञ्चादि सर्वदेवाधिष्ठितमेकं शरीरं पृथग् जातमित्यर्थः । सा या मूर्तिः अजायत तत् अन्नं वै ।

(3) तदेतत् सृष्टमन्नरूपं शरीरम् अन्नमूर्त्यात्मको ब्रह्मा भोक्तृदेवतागणं दृष्ट्वा मामिमा अदन्तीति भयादिव क्रीडयैव किञ्चिदपाक्रमत् । एवमन्नात्मके रूपेऽपक्रान्ते सति भोक्तृरूपी चतुर्मुखः सर्वे देवाः वायुप्रसादमन्तरा अन्नभोजने अशक्ता एव वायुरेक एव शक्त इति जानन्नपि तारतम्यप्रकाशनाय लीलयैव तदन्नाख्यं रूपं वाचा वागभिमानिवह्निरूपकरणेन अजिघृक्षत् गृहीतुमैच्छत् जिघृक्षावानिव प्रयत्नवानभूत् ।

(4) स ब्रह्मा यदि एनत् अन्नरूपं वाचा अत्तुं शक्तिमानभविष्यत् तर्हि अन्न-शब्दव्याहरणरूपवाग् व्यापारं कृत्वैव अत्रप्स्यत् तृप्तिमानभविष्यत् । अन्नग्रहणस्य तृप्ति-फलकत्वात् वाग् व्यापारे कृतेऽपि तृप्तेरजननात् वाचा अन्नग्रहणं न सम्भवतीति भावः ।

(b) Expl. **(1)** It is further stated here that Śrotra etc., also are not able to eat the food. It is Vāyu who eats the food.

(2) अपानेन– अपानाख्यप्रधानवायुना, आवयत्–अशकत् धातूनामनेकार्थत्वात् वयतिरत्र प्रकाशनार्थः, अन्नस्य ग्रहः – सर्वस्य अन्नस्य भोक्ता, अन्नायुः - अन्नस्य अन्नाभिमानिदेवस्य ब्रह्मणोऽपि जीवनहेतुः ।

(3) अत्र आयुरिति बुद्ध्या विविच्य अन्येषां सुराणां वायुरेव आयुः चेष्टाप्रदः । अयतेः गत्यर्थत्वात् । ज्ञानप्रदश्च । गत्यर्थस्य ज्ञानार्थत्वात् । नित्यायूरूपमोक्षप्रदश्च ।

(c) Expl. (1) The fact of the Supreme God entering into the body and being present in the eye, neck, and heart to direct the jīva is described here.

(2) इदं ब्रह्मादिदेवतातं मद्दते कथं नु स्वस्वकार्यं कर्तुं समर्थं स्यात् न कथमपि । अतोस्य प्रवृत्त्यर्थं ब्रह्मशरीरे मया प्रवेष्टव्यमेव ।

(3) यदि वागादीन्द्रियैः मां विना स्वातन्त्र्येणैव अभिव्याहरणादिकं स्वस्वकर्म कृतं स्यात् अथ तर्हि कोऽहमिति अहं विष्णुशब्दवाच्यः कथं भवेयम् । विशेषेण चेष्टकत्वात् विशिष्टबलवत्त्वाच्च मम विष्ण्वभिधा सा मम न स्यादिति भावः ।

(4) एवमालोच्य भगवान् वासुदेवरूपेण एतमेव मस्तकसीमानं विदार्यैतया द्वारा सुषुम्नाख्यमूर्धन्यनाडीद्वारा प्रापद्यत प्रविवेश । अत एव सैषा द्वाः द्वारं विदृतिर्नाम । विदारितत्वाद् विदृतिनामकम् ।

(5) पूर्णानन्दस्वरूपत्वात् नन्दनो भगवान् तत्सम्बन्धित्वादेतन्नाडीद्वारं नानन्दनमित्युच्यते ।

(6) तस्य भगवतः त्रयः आवसथाः स्थानानि अयमक्षिरूपः एकः, कण्ठरूपः एकः, हृदयरूपः एकः इति त्रयः । एते आवसथाः स्वप्नाः इत्यप्युच्यन्ते स्वयं विष्णुराप्नोति जाग्रदाद्यवस्थाप्रेरणायात्रेति । अनिरुद्धप्रद्युम्नसंकर्षणाख्यरूपत्रयं क्रमेण स्थानत्रये स्थितमिति बोध्यम् ।

(7) स भगवान् जातः मत्स्यादिरूपेण प्रादुर्भूतः सन्नपि भूतानि सर्वप्राणिनः अभ्यैख्यत् अभितः सर्वकालेषु विशेषेण पश्यत्येव मूलावतारयोः ज्ञानादि सर्वगुणैः निर्विशेषत्वात् । अत्र प्राविशदित्यपि ग्राह्यम् । स विष्णुः जातः मत्स्यादिरूपेण भुवि प्रादुर्भूतः रूपान्तरेण समस्त प्राणिजातानि प्राविशच्च ।

(8) इह जगति मत्तः अन्यमसुरनिहन्तारं ज्ञानादिगुणप्रदं वावदिषत् किं वदेत् किं विद्वज्जनः । तथा इह भूतेषु मत्तः अन्यं चेष्टाप्रदं वदेत् किम् । दैत्यनिग्रहणेच्छया ज्ञानदानार्थं च मत्स्यादिरूपेण जातः । भूतानि प्रेरणेच्छया प्राविशच्चेति पूर्वेणान्वयः ।

(9) एष भगवानेव पुरुषं व्यासकृष्णकपिलराघवादिरूपं ततमं परिपूर्णतमं ब्रह्म अपश्यत् ।

(10) इदं मे स्वरूपम् अहं गुणपूर्णत्वादिना सर्वदा दर्शमेवेति यतः तस्मात् अहमिदन्द्रः नाम । महिदासस्य वाक्यमिदम् । उक्तनिर्वचनेन इदन्द्रं सन्तं तं विष्णुमिदन्द्र इत्युक्त्वा इन्द्र इत्येव परोक्षेण अस्पष्टतया आचक्षते वैदिकाः । दैत्यानां परोक्षं सम्यगदर्शनमेव प्रियं देवानाम् ।

इति श्रीमन्महैतरेयोपनिषदि द्वितीयारण्यके चतुर्थोऽध्यायः ।

द्वितीयारण्यके पञ्चमोध्यायः

[II-5-1 (a)] Expl. (1) The process of the birth of a child is described here.

(2) अयं नारायणः प्रथमं पुरुषे गर्भो भवति । अन्नस्थः सन् पुरुषेण अन्ने भुक्ते अन्नेन सहितः तं प्रविशति । भुक्तान्ने परिणते यद् रेतः जायते एतत् पुरुषस्य सर्वांगेभ्यः सम्भूतं तेजः साररूपम् । तथा रेतस्स्थितं भगवद्रूपं तेज एव यदा रेतोगतं रूपं जनयति मातृशरीरे प्रादुर्भावयति तत् स्थानान्तरगमनमेव प्रथमं जन्म ।

(3) तत् योनिप्रविष्टं पौरुषं रेतः स्त्रियः स्वम् अङ्गं यथा आत्मभावं गच्छति ।

(4) पुत्रं पुत्रगतं हरिं भावयित्री स्त्री भावयितव्या सम्भावयितव्या भवति भर्त्रा इति शेषः । एतच्च पुत्रस्थविष्णुसम्भावनमेतेषां लोकानां सन्तत्यै व्याप्त्यै भवति ।

(5) मातृशरीरात् पृथिव्यां पुत्रगतेन रूपेण प्रादुर्भवनमेव द्वितीयं जन्म ।

(6) (i) अयं नारायणो देवः पुरुषे प्रथमं विशेत् ।
अन्नस्थोऽन्नेन सहितः तस्मिन् रेतस्त्वमागते ॥
तस्मिंस्थितं स्वरूपं स पुरुषस्थो बिभर्त्यजः ।
तद्रूपं रेतसा साकं स्वयं पुंसि स्थितो हरिः ।
स्त्रियां सिञ्चति तस्यैव स्थानान्तरगतेः प्रभोः ।
प्रथमं जन्म विष्णोस्तु स तस्या अङ्गवत् प्रभुः ।

(ii) पृथिव्यां जन्म पुत्रस्य द्वितीयं विष्णुजन्म हि ।

(b) Expl. (1) The birth of a father in another birth is described here as a third birth of the son.

(2) अथ अस्य भगवतः पितृगतःरूपविशेषः पितृजीवेन सह प्रैति लोकान्तरं प्राप्नोति ।

(3) सः भगवान् पुनः पितृजीवेन सह अन्यत्र जायते तदत्र तृतीयं जन्म ।

(4) पुरः– पूर्णाः, आयसीः आयस्यः विशेषतो ज्ञानिन्यः शतं शतसंख्याकाः विष्ण्वाद्याः देवताः माम् अरक्षन् ।

(5) श्येनः सन् विष्णुं स्वामिनं ज्ञात्वा, आनन्दज्ञानादिपूर्णत्वात् श्यः विष्णुः स एव इनः स्वामी यस्यासौ तथोक्तः सन्, जवसा वेगेन, निरदीयं मातुरुदरात् निर्गत्य गर्भमतीतोऽस्मि ।

(6) गर्भे शयानः वामदेवो नाम ऋषिः एतदुवाच, ऊर्ध्वः सन् उत्क्रम्य ब्रह्मनाड्या उत्क्रान्तो भूत्वा ।

इति श्रीमन्महैतरेयोपनिषदि द्वितीयारण्यके पञ्चमोऽध्यायः

द्वितीयारण्यके षष्ठोऽध्यायः

[II-6-1 (a)] Expl. (1) Here it is stated that the Supreme God directs all activities of man. Different names of the Supreme that convey his attributes relevant in the context are also mentioned here.

(2) कः - किं लक्षणकः, कतरः - आनन्दतमः, येन - यत्प्रेरणया अयं रमाब्रह्मादिचेतनसमुदायः पश्यति शृणोति etc.,

(3) विष्णोः लक्षणान्युक्त्वा उपासनार्थं नामान्याह यदित्यादिना– ज्ञातृत्वात् यत्, सन्निहितत्वात् एतत्, हृदयनात् हृदयम् मन्तृत्वात् – मनः गुणोच्चयदातृत्वात् चः, पूर्णत्वात् आ, भक्तैः इतत्वात् ततत्वाच्च एतत्, सम्यग् ज्ञानस्वरूपत्वात् संज्ञानम्, आसमन्तात् सर्वविषयकज्ञानरूपत्वात् आज्ञानम्, विविधज्ञानरूपत्वात् विज्ञानम्, प्रकृष्ट स्वगुणज्ञानरूपत्वात् प्रज्ञानम्, अविस्मृतित्वान्मेधा, दर्शनरूपत्वात् दृष्टिः, धारणरूपत्वात् धृतिः, मासु प्रमाणेषु ततत्वात् मतिः मनुनाम्नां ब्रह्मादीनाम् ईशः मनीषा, सर्वप्रेरकत्वात् ज्यूतिः, सर्वरूपेषु समं रमत इति स्मृतिः, सर्वस्य क्लृप्तिरूपत्वात् संकल्पः, सर्वकर्तृत्वात् क्रतुः, दोषाणामसनादसुः, अमितानन्दत्वात् कामः, स्वतन्त्रत्वादवशः इत्येतानि सर्वाण्येव त्रयोविंशतिनामानि प्रज्ञानस्य प्रज्ञानरूपस्य भगवतः नामधेयानि भवन्ति ।

(b) Expl. (1) Here the twenty-three names of the Supreme God are mentioned. It is pointed out that he leads all beings. The benefits of the meditation upon the Supreme God with this knowledge are described.

(2) सर्वे देवाः दक्षादयः मिश्राणि-पुण्यपापमिश्रितानि, इतराणि-देवेभ्यो अन्यानि मानुषप्राणिजातानि, इतराणि-देवमानुषभिन्नानि असुरादि प्राणिजातानि ।

(3) देवादीनां मन आदि जाताः अश्वाः गावः पुरुषाः हस्तिनः, यत् किञ्चेदं प्राणिशिलाकाष्ठादिकम्, बीजानि - शाल्यादिबीजवत् भिन्नस्वभावानि ।

तदेतत् सर्वं प्रज्ञानेत्रम्– प्रज्ञात्मकं ब्रह्म नेत्रं नेतृ यस्य तत् ।

(4) अलोकः - प्राकृतदेहशून्यः योऽयं मुक्तसमुदायः, प्रज्ञाप्रज्ञारूपं ब्रह्म स्वयं च अनन्याश्रयत्त् प्रतिष्ठाशब्दवाच्यम्, प्रज्ञानम् प्रज्ञानात्मको विष्णुः, सः - सकलकर्मबन्धात् मुक्तः अलोकशब्दोक्तः पुरुषः एतेन प्रज्ञेन प्रकृष्टज्ञानेन आत्मना विष्णुना प्रेरितः सन्नेव अस्मात् लोकात् चरमदेहात् उत्क्रम्य स्वर्गे लोके वैकुण्ठादौ अमृतः सन् सर्वान् कामान् समभवत् भुङ्क्ते ।

इति श्रीमन्महैतरेयोपनिषदि द्वितीयारण्यके षष्ठोऽध्यायः ।

द्वितीयारण्यके सप्तमोऽध्यायः

[II-7-1] Expl. (1) The teacher prays the God to be present in his speech and protect him and his pupils.

(2) वाक्–वाणी, मनसि–अवबोधरूपे विष्णौ प्रतिष्ठिता तद्विषयिण्येव भवतु, मनः–मनो नामा भगवान्, वाचि प्रतिष्ठितमस्तु ।

(3) आविः एधि–आविर्भव अपरोक्षविषयो भव, वेदस्य आणीस्थ–सर्ववेदसमुदायाधार प्राणस्थितविष्णो मम श्रुतम् अधीतं मा प्रहासीः – मदधीतशास्त्रजन्ययथार्थं ज्ञानविषय एव सर्वदा भव ।

(4) हे विष्णो अनेन त्वद्विषयेणैव अधीतेन अहोरात्रान् सन्दधामि सर्वाहोरात्रेष्वपि त्वद्विषयमेव अध्ययनं कुर्यामिति यावत् ।

(5) ऋतम्–शश्वदेकप्रकारम्, सत्यम्–साधुगुणैः ततम् ।

इति श्रीमन्महैतरेयोपनिषदि द्वितीयारण्यके सप्तमोऽध्यायः

द्वितीयारण्यकं समाप्तम्

तृतीयारण्यके प्रथमोऽध्यायः

उप– हरिः ॐ । अथातः संहिताया उपनिषत् पृथिवी पूर्वरूपं द्यौरुत्तर-रूपं वायुः संहितेति माण्डूकेयः ।

आकाशः संहितेत्यस्य माक्षव्यो वेदयांचक्रे स ह्यविपरिहृतो मेने न मेऽस्य पुत्रेण समागादिति समाने वै तत् ।

परिहृतो मे न इत्यागस्त्यः । समानं ह्येतद् भवति वायुश्चाकाशश्चे-त्यधिदैवतम् ।

Now, the secret meaning of the letters and their conjunction (of the name Viṣṇu and the Veda) shall be explained. The Supreme God Varāha present in Prithivi and designated as Prithivi is conveyed by the first letter and called as Pūrvavarṇa. The Supreme God Vāmana present in Dyuloka and designated as Dyu is conveyed by the latter letter and is called as Uttravarṇa. The Supreme God Nṛsimha present in Vāyu and designated as Vāyu is conveyed by the conjunction i.e., Samhitā, present in Samhitā and designated as Samhitā. This is how Māṇḍūkeya states. But Mākṣeya understands that the Supreme God Nṛsimha present in Ākāśa and designated as Ākāśa is present in the conjunction.

Māṇḍukeya did not think that Mākṣeya rejected his view. Mākṣeya does not know that Vāyu is the adhiṣṭhāna of Nṛsimha. This does mean he rejects Māṇḍukeya's view. The two approaches lead to the meditation of the same God i.e., Nṛsimha. But Agastya thought that Māṇḍūkeya's view is rejected by Mākṣeya (since meditation as present in Ākāśa is superior to that as present in Vāyu). However, Ākāśa and Vāyu are equal adhiṣṭhānas of the Supreme God i.e., Nṛsimha (This is the view of Mahidāsa).

उप– अथाध्यात्मम् । वाक् पूर्वरूपं मन उत्तररूपं प्राणः संहितेति शूरवीरो माण्डूकेयः ।

अथ हास्य पुत्र आह ज्येष्ठः । मनः पूर्वरूपं वागुत्तररूपं मनसा वा अग्रे सङ्कल्पयति अथ वाचा व्याहरति तस्मान्मन एव पूर्वरूपं वागुत्तररूपं प्राणस्त्वेव संहितेति समानमेनयोरत्र पितुश्च पुत्रस्य च ।

स एषोऽश्वरथः प्रष्टिवाहनो मनो वाक् प्राण संहतः स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेतीति नु माण्डूकेयानाम् ॥ ३-१-१ ॥

Now, pertaining to the body. The Supreme God Vāmana present in Vāk and designated as Vāk is conveyed by the first letter, present in it, and is called Pūrvavarṇa. The Supreme God Varāha present in Manas and designated as Manas is conveyed by the latter letter, present in it, and is called Uttaravarṇa. This Supreme God Nṛsimha present in Prāṇa and designated as Prāṇa is conveyed by the conjunction, present in it, and is called Saṃhitā. This is what Śūravīra Māṇḍūkeya states.

But his eldest son states that the Supreme God Varāha present in Manas is Pūrvavarṇa and Vāmana present in Vāk is Uttaravarṇa. This is because a man first thinks and then speaks. However, God Nṛsimha conveyed by the conjunction is the common view of both these.

This body is the chariot of the Supreme God in his three forms of Vāk, Manas and Prāṇa, carried by the horses i.e., senses. It carries the Supreme God who is the preceptor in these three forms.

He who knows this will obtain knowledge, Vedic lore, fame, lustre obtained with the grace of God, the world of the Supreme God and full life. This is the upāsanā practiced by Māṇḍūkeyas.

उप– अथ शाकल्यस्य पृथिवी पूर्वरूपं द्यौरुत्तररूपं वृष्टिः सन्धिः पर्जन्यः सन्धाता तदुतापि यत्रैतद्बलवदनूद् गृह्णन् सन्दधदहोरात्रे वर्षति द्यावापृथिव्यौ सम्धातामित्युताप्याहुरितीन्वधिदैवतम् ।

According to Śakalya the Supreme God Vāsudeva present in Prithivi and designated as Prithivi is conveyed by the first letter. The Supreme God Sankarṣaṇa present in Dyuloka and designated as Dyu is conveyed by the latter letter. The Supreme God Pradyumna present in Vṛṣṭi and designated as Vṛṣṭi is conveyed by the conjunction. The Supreme God Aniruddha present in Parjanya and designated as Parjanya is the connector.

The rain when pouring forcibly and making sound in the rainy season connects the day and night, and also connects Prithivi and Dyu. This is adhidaiva upāsanā.

उप– अथाध्यात्मं पुरुषो ह वा अयं सर्व आन्दं द्वे विदले भवत इत्याहुः तस्येदमेव पृथिव्या रूपमिदं दिवः तत्रायमन्तरेणाकाशः यथासौ द्यावापृथिव्यावन्तरेणाकाशः तस्मिन्ह्यस्मिन्नाकाशे प्राण आयत्तो यथामुष्मिन्नाकाशे वायुरायत्तो यथामूनि त्रीणि ज्योतीष्येवमिमानि पुरुषे त्रीणि ज्योतींषि यथासौ दिव्यादित्य एवमिदं शिरसि चक्षुर्यथासावन्तरिक्षे विद्युदेवमिदमात्मनि हृदयं यथायमग्निः पृथिव्यामेवमिदमुपस्थे रेतः एवमु ह स्म सर्वलोकमात्मानमनुविधायाहेदमेव पृथिव्या रूपमिदं दिवः ।

स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥ ३-१-२ ॥

The whole of human body is one unit. There are two parts of it. From the foot to the trunk is the Pratimā of Vāsudeva designated as Prithivi. From navel to the head is the Pratimā of Sankarṣaṇa designated Dyu. Just as between Prithivi and Dyu there is Ākāśa i.e., Nṛsimha, similarly in between the two parts

of the body there is Ākāśa i.e., Dāśarathi in the Ākāśa in between the two parts of the body.

Just as in Dyu etc., there are Āditya etc., three luminaries, similarly in human body also there are three luminaries. In Dyu there is Āditya i.e., Kapila, in Antarikṣa there is Vidyut i.e., Hamsa, in Prithivi there is Agni i.e., Praśurāma, similarly in the head of the human body there is chakṣus i.e., Kapila, in the middle of the body there is Manas i.e., Hamsa, in upastha there is retas i.e., Paraśurāma.

In this way Śākalya described the human body on the model of Prithivi etc., worlds.

He who knows this will obtain knowledge, Vedic lore, fame, lustre, the world of the Supreme God and full life.

उप– अथातो निर्भुजप्रवादाः पृथिव्यायतनं निर्भुजं दिव्यायतनं प्रतृण्णमन्तरिक्षायतनमुभयमन्तरेण । अथ यद्येनं निभुजं ब्रुवन्तमुपवदेद्च्योष्ठा अवराभ्यां स्थानाभ्यामित्येनं ब्रूयाद् । अथ यद्येनं प्रतृण्णं ब्रुवन्तमुपवदेद्च्योष्ठा उत्तराभ्यां स्थानाभ्यामित्येनं ब्रूयाद् यस्त्वेवोभयमन्तरेणाह तस्य नास्त्युपवादः ।

Now, about Samhitā, Pada and Krama. Samhitā conveys the Supreme God Varāha present in Prithivi and designated as Prithivi. Pada conveys the Supreme God Vāmana present in Dyuloka and designated as Dyu. Krama conveys the Supreme God Nṛsimha present in Antarikṣa and designated as Antarikṣa.

If any one talks ill of a person who recites Samhitā, then, he he loses his position in Bhumi and Antarikṣa. Similarly, if any one takes ill of a person who recites pāda, then, he will lose his position in Antarikṣa and Dyuloka. Nobody can dare to talk ill of him who recites Krama.

उप- यद्धि सन्धिं विवर्तयति तन्निर्भुजस्य रूपमथ यच्छुद्धे अक्षरे व्याहरति तत् प्रतृण्णस्याग्र उ एवोभयमन्तरेणोभयं व्याप्तं भवति ।

अन्नाद्यकामो निर्भुजं ब्रूयात् स्वर्गकामः प्रतृण्णमुभयकाम उभयमन्तरेण

अथ यद्येनं निर्भुजं ब्रुवन्तं पर उपवदेत् पृथिवीदेवतामारः पृथिवीत्वा देवता रिष्यतीत्येनं ब्रूयादथ यद्येनं प्रतृण्णं ब्रुवन्तं पर उपवदेद् दिवं देवतामारो द्यौस्त्वा देवता रिष्यतीत्येनं ब्रूयादथ यद्येनमुभयमन्तरेण ब्रुवन्तं पर उपवदेदन्तरिक्षं देवतामारोऽन्तरिक्षं त्वा देवता रिष्यतीत्येनं ब्रूयात् ।

यथा तु कथा च ब्रुवन्वाब्रुवन्तं वा ब्रूयादभ्याशमेव यत्तथास्यान्न त्वेवान्यत् कुशलाद् ब्राह्मणं ब्रूयादतियुम्न एव ब्राह्मणं ब्रूयान्नाति युम्ने च न ब्राह्मणं ब्रूयान्नमो अस्तु ब्राह्मणेभ्य इति ह स्माह शूरवीरो माण्डूकेयः ॥ ३-१-३ ॥

Pronouncing ṣ and ṇ together in the name Viṣṇu is Samhitā, pronouncing them separately is Pada, pronouncing both of them separately and together is Krama. This is superior to the other two. He who desires enjoyment in liberation should recite samhitā, he who desires liberation should recite Pada, and he who desires both should recite Krama.

If any one talks ill of the reciter of Samhitā he should be told that he is talking ill of the Supreme God Varāha present in Prithivi and designated as Prithivi. This Supreme God will destroy him. If anyone talks ill of the reciter of Pada he should be told that he is talking ill of the Supreme God Vāmana present in Dyuloka and designated as Dyu. This Supreme God will destroy him.

If anyone talks ill of the reciter of Krama he should be told that he is talking ill of Nṛsimha present in Antarikṣa and designated as Antarikṣa. This Supreme God will destroy him.

If anyone talks ill of a person who knows the forms of the Supreme God conveyed by Samhitā, Pada and Krama will suffer

in this way irrespective of whether that person is actually reciting Samhitā etc., or not.

However, if a Brahmajñānin talks ill of the reciters of Samitā etc., he should not be spoken harsh words as stated above. If he violates the commands of the scripture he should be onley told that he is doing so and it may lead to his fall. One should respect Brahmajñānins. This Vidyā is described by Śūravīra Māṇḍūkeya.

उप– अथातोऽनुव्याहाराः प्राणो वंश इति विद्यात् स य एनं प्राणं वंशमुपवदेत् शक्नुवंश्चेन्मन्येत प्राणं वंशं समधां ३ प्राणं मा वंशं सन्दधतं न शक्नोषीत्याह प्राणस्त्वा वंशो हास्यतीत्येनं ब्रूयादथ चेदशक्नुवन्तं मन्येत प्राणं वंशं समधित्सिषन्तं नाशकः सन्धातुं प्राणस्त्वा वंशो हास्यतीत्येनं ब्रूयाद्।

यथा तु कथा च ब्रुवन्वाऽब्रुवन्तं वा ब्रूयादभ्याशमेव यत्तथा स्यान्नत्वेवान्यत् कुशलाद् ब्राह्मणं ब्रूयादति द्युम्न एव ब्राह्मणं ब्रूयान्नाति द्युम्ने च न ब्राह्मणं ब्रूयान्नमो अस्तु ब्राह्मणेभ्य इति ह स्माह शूरवीरो माण्डूकेयः ॥ ३-१-४ ॥

Lord Viṣṇu and Mukhyaprāṇa should be meditated upon as the abode of all. If anyone tells such a meditator that this will not bring him the favour of these, he should tell him, if he is quite confident, 'I am meditating upon them quite well, you say I am not quite competent, therefore the Supreme God Viṣṇu and Mukhyaprāṇa will reject you.' If he is not so confident, he should say 'I am trying my best to meditate upon them, but still you say that I will not get their favour, therefore, they will reject you'.

If any one talks ill of a person who knows the forms of the Supreme God conveyed by Samhitā etc., will suffer in this way irrespective of whether that person is actually reciting Samhitā etc., or not.

However, If a Brahmajñānin talks ill of the reciters of Samhitā etc., he should not be spoken harsh words as stated above. If he violates the commands of the scripture he should be only told that he is doing so and it may lead to his fall. One should respect Brahmajñānins. This Vidyā is described by Śūravīra Māṇḍūkeya.

उप– अथ खल्वाहुर्निर्भुजवक्त्राः पूर्वमक्षरं पूर्वरूपमुत्तरमुत्तररूपं योऽवकाशः पूर्वरूपोत्तररूपे अन्तरेण सा संहितेति स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ।

अथ वयं ब्रूमो निर्भुजवक्त्रा इति ह स्माह ह्रस्वो माण्डूकेयः पूर्वमेवाक्षरं पूर्वरूपमुत्तरमुत्तररूपं योऽवकाशः पूर्वरूपोत्तररूपे अन्तरेण येन सन्धिं विवर्तयति येन स्वरास्वरं विजानाति येन मात्रामात्रां विभजते सा संहितेति स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ।

अथ हास्य पुत्र आह मध्यमः प्रातीबोधीपुत्रोऽक्षरे खल्विमे अविकर्षन्नेकीकुर्वन्नयथावर्णमाह तथासौ मात्रा पूर्वरूपोत्तररूपे अन्तरेण सन्धिविज्ञापनी साम तद्भवति सामैवाहं संहितां मन्य इति ।

तदप्येतदृषिणोक्तम् बृहस्पते न परः साम्नो विदुरिति ।

स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥ ३-१-५ ॥

Then, the sage Nirbhujavaktṛ said, the Supreme God Vāmana is conveyed by the first letter, he is present in it, and is designated as Pūrvavarṇa. The Supreme God Vāmana is conveyed by the latter letter, he is present in it, and is designated as Uttaravarṇa. The Supreme God Nṛsimha who is in between these two and is designated as avakāśa is conveyed by Samhitā. He who meditates in this way will obtain the highest knowledge, Vedic lore, fame, lustre of Brahmajñāna and attain liberation.

Then, Hrasva Māṇḍūkeya said: It is true that Varāhā is conveyed by the first letter and Vāmana by the latter. But the Supreme God Vedavyāsa is conveyed by Samhitā. It is by the grace of Vedavyāsa that one knows the correct accent such as udātta, and the correct length of vowel such as hṛasva. Therefore, he who meditates in this way obtains knowledge, Vedic lore etc.

Then, the middle son of Hṛsva Māṇḍūkeya born in Pratibodhi said : Vāsudeva designated as Sāma is conveyed by Samhitā. It is by the grace of Vāsudeva that one recites without interchanging or mixing the first and the latter letters. Vāsudeva is the regulator of first and latter letters and the length of vowels. He is designated as Sāma and conveyed by Samhitā.

This is stated in a Ṛgveda hymn 'Brihaspate na paraḥ sāmnah' etc., This hymn states that only those who realise that there is none who is superior to Vāsudeva be taught the Vedic lore.

उप– बृहद्रथन्तरयो रूपेण संहिता सन्धीयत इति तार्क्ष्यः । वाग् वै रथन्तरस्य रूपं प्राणो बृहतः उभाभ्यामु खलु संहिता सन्धीयते वाचा च प्राणेन चैतस्यां ह स्म उपनिषदि संवत्सरं गा रक्षयते तार्क्ष्य एतस्यां ह स्म मात्रायां संवत्सरं गा रक्षयते तार्क्ष्यः ।

तदप्येतदृषिणोक्तम्– रथन्तरमाजभार वसिष्ठो भरद्वाजो बृहदाचक्रे अग्नेरिति ।

स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ।

The Ardhanārinara form of the Supreme God is conveyed by Samhitā and designated as Samhitā. This connects Goddess Lakṣmī designated as Rathantara and conveyed by Rathantara sāma and Nārāyaṇa designated as Bṛhat and conveyed by Bṛhatsāma. This is stated by Tārkṣya.

Lakṣmī designated as Rathantara is present in Vāk and is designated as Vāk. Nārāyaṇa designated as Bṛhat is present in Prāṇa and is designated as Prāṇa.

Tārkṣya looked after the cows of his teacher for one full year to get this secret knowledge. This fact of Lakṣmī and Nārāyaṇa designated as Rathantara and Bṛhat is stated by a seer in a Ṛgvedic hymn:

Vaśiṣṭha obtained the knowledge of Lakṣmī designated as Rathantara. Bharadvāja obtained the knowledge of Nārāyaṇa designated as Bṛhat from Agni i.e., chaturmūrti God designated as Agni.

He who knows the Samhitā in this way will obtain knowledge, Vedic lore, fame, lustre of Brahmajñāna, and liberation.

उप– वाक् प्राणेन संहितेति कौण्ठरव्यः प्राणः पवमानेन पवमानो विश्वैर्देवैः विश्वे देवाः स्वर्गेण लोकेन स्वर्गो लोको ब्रह्मणा सैषाऽवरपरा संहिता ।

स यो ह वैतामवरपरां संहितां वेदैवं हैव स प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सन्धीयते यथैषा संहिता ।

स यदि परेण वोपसृतः स्वेन वार्थे नाभिव्याहरेदभि- व्याहर्षन्नेव विद्याद् दिवं संहितागमद्विदुषां देवानामेवं भविष्यतीति शश्वत् तथा स्यात् स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥

Vāk i.e., Lakṣmī with Prāṇa i.e., Nārāyaṇa forms one Samhitā. Prāṇa i.e., Hari with Pavamāna i.e., Mukhyaprāṇa forms the second Samhitā. Pavamāna with Viśvedevas i.e., Bhārati etc., all other deities forms the third Samhitā. Viśvedevas with svargaloka i.e., Śiva forms the fourth Samhitā. Svarga loka with Brahmā i.e., chaturmukhabrahmā forms the fifth Samhitā. These

Samhitās are called avarapara because these consist of big and small deities.

He who knows this Samhitā will obtain the highest knowledge, Vedic lore, fame, lustre of Brahmajñāna and liberation.

He who desires to recite these Samhitās either for his benefit or for the benefit of others should think that the Supreme God will bestow the benefit of this recitation to the gods. With the grace of these gods I will benefit. He who thinks, in this way will obtain the highest knowledge, Vedic lore, fame, lustre of Brahmajñāna and liberation.

उप- वाक् संहितेति पञ्चालचण्डो वाचा वै वेदाः सन्धीयन्ते वाचा छन्दांसि वाचा मित्राणि सन्दधति वाचा सर्वाणि भूतान्यथो वागेवेदं सर्वमिति ।

तद्यत्रैतदधीते भाषते वाचि तदा प्राणो भवति वाक् तदा प्राणे रेढि अथ यत्र तूष्णीं वा भवति स्वपिति वा प्राणे तदा वाग् भवति प्राणस्तदा वाचं रेढि तावन्योन्यं रीढो वाग् वै माता प्राणः पुत्रः तदप्येतदृषिणोक्तम्-

एकः सुपर्णः स समुद्रमाविवेश ।
स इदं विश्वं भुवनं विचष्टे ॥
तं पाकेन मनसा अपश्यमन्तितः ।
तं माता रेढि स उ रेढि मातरमिति ॥

स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥

Pañchālachanda states that Vāk i.e., Sarasvatī is Samhitā. It is by the grace of Sarasvatī that the Vedas are recited in the Samhitā form, Gāyatrī etc., metres are formed, friends are made, all beings function. Everything depends upon Vāk i.e., Sarasvatī.

When one studies or speaks, then, the Supreme God designated as Prāṇa resides in Vāk i.e., Sarasvatī. She relishes him. When one is silent or asleep, then, Vāk i.e., Sarasvatī remains in Prāṇa. He relishes her. These two relish each other. Vāk i.e., Sarasvatī is mother and Prāṇa is son.

This is stated by a seer in a Ṛgvedic hymn: The Supreme God Lakṣmīnārāyaṇa enters into Kṣīrasāgara and stays in Śvetadvīpa. He observes the entire universe. I saw him with my mature mind. The mother Sarasvatī relishes him, he relishes her. The two remain together.

He who knows this Samhitā will obtain the highest knowledge, Vedic lore, fame, lustre of Brahmajñāna and attains liberation.

उप– अथातः प्रजापतिसंहिता जाया पूर्वरूपं पतिरुत्तररूपं पुत्रः सन्धिः प्रजाननं सन्धानं सैषाऽदितिः संहिताऽदितिर्हीदं सर्वं यदिदं किञ्च पिता च माता च पुत्रश्च प्रजननं च तदप्येतदृषिणोक्तम्– अदितिर्माता स पिता स पुत्र इति ।

स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिः यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति सर्वमायुरेति ॥ ३-१-६ ॥

The Supreme God Vāsudeva present in Jayā i.e., wife and designated as Jayā is the first letter. The Supreme God Saṅkarṣaṇa present in Pati i.e., husband and designated as Pati is the latter letter. The Supreme God Pradyumna present in Putra i.e., son designated as Putra is Sandhi i.e., connection. The Supreme God Aniruddha present in Prajanana i.e., the act of obtaining progeny and designated as Prajanana is Sandhāna i.e., act of joining. This Samhitā is described by Prajāpati i.e., Śiva.

The Supreme God designated as Aditi is the God for Samhitā of his four forms. Mother, father, son, the act of obtaining son –

all these are regulated by Aditi. This is described by a seer in a Ṛgvedic hymn: Aditi is mother, father and son.

He who meditates on these Saṁhitās knowing this will obtain the highest knowledge, Vedic lore, fame, lustre of Brahmajñāna and liberation.

इति तृतीयारण्यके प्रथमोऽध्यायः

तृतीयारण्यके द्वितीयोऽध्यायः

उप–हरिः ॐ प्राणो वंश इति स्थविरः शाकल्यः तद्यथा शालावंशे सर्वेऽन्ये वंशाः समाहिताः स्युरेवमस्मिन् प्राणे चक्षुः श्रोत्रं मनो वागिन्द्रियाणि शरीरं सर्व आत्मा समाहितः ।

तस्यैतस्यात्मनः प्राण ऊष्मरूपमस्थीनि स्पर्शरूपं मज्जानः स्वररूपं मांसं लोहितमित्येतदन्यच्चतुर्थमन्तस्थरूपमितिहस्माह ।

Sthavira Śākalya states that Mukhyaprāṇa is the support. Just as all other beams are placed on the central pole in a hall, similarly, the senses i.e., chakṣus, srotra, manas and vāk, the body, the abhimāni deities of these, are supported by Mukhyaprāṇa individually and collectively. The Supreme God is present in all these in many forms. The Supreme God designated as Prāna and present in Prāna is conveyed by Ūṣmā letters. He is designated as Ūṣmā and present in Ūṣmā letters. The form of the Supreme God present in asthi i.e., bones and designated as asthi is conveyed by Sparśa letters, designated as Sparśa, and present in Sparśa letters. The form of Supreme God present in majjā and designated as majjā is conveyed by svara i.e., vowels, designated as svara, and present in svara. The Supreme God designated as mānsa and lohita is conveyed by antastha letters, designated as antastha, and is present in antastha letters. This is fourth.

उप–इति ह स्माह ह्रस्वो माण्डूकेयस्त्वयं त्वेव न एतत् प्रोक्तं तस्यैतस्य त्रयस्यास्थ्नां मज्ज्ञां पर्वणामिति त्रीणीतः षष्टि शतानि त्रीणीतस्तानि सप्तविंशति शतानि भवन्ति सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः स एषोऽहःसंमानश्चक्षुर्मयः श्रोत्रमयः छन्दोमयो मनोमयो वाङ्मय आत्मा स य एवमेतमहः–संमानं चक्षुर्मयं श्रोत्रमयं छन्दोमयं मनोमयं वाङ्मयमात्मानं वेदाह्नां सायुज्यं सरूपतां सलोकतामश्नुते पुत्री पशुमान् भवति सर्वमायुरेति ॥ ३-२-१ ॥

Hrisva Māndukeya states in this way : In my opinion there are only three forms of the Supreme God in asthi, majjā and parva. There are three hundred and sixty forms of the Supreme God and the right side and three hundred and sixty on the left side. On the whole there are seven hundred and twenty forms. The days and the nights during an year are also seven hundred and twenty. Therefore these seven hundred and twenty forms of the Supreme God are present in seven hundred and twenty days and nights, and are called ahorātra. Therefore, the Supreme God is called ahahsamāna.

The Supreme God has infinite vision, infinite hearing, has an uninterrupted desire, infinite power, infinite capacity to speak. He who knows him in this way will attain sāyujya, sālokya, knowledge and bliss.

उप–अथ कौण्ठरव्यः त्रीणि षष्टिशतान्यक्षराणां त्रीणि षष्टिशतान्यूष्मणां त्रीणि षष्टिशतानि सन्धीनां यान्यक्षराण्यवो चामाह्नानि तानि यान्यूष्मणोऽवोचाम रात्रयस्ता यान् सन्धीनवोचामाहोरात्राणां ते सन्धय इत्यधिदैवतम् ।

अथाध्यात्मं यान्यक्षराण्यधिदैवतमवोचामास्थीनि तान्यध्यात्मं यानूष्मणोऽधिदैवतमवोचाम मज्जानस्तेऽध्यात्ममेष ह वै सम्प्रति प्राणो यन्मज्जैतद्रेतो न ह वा ऋते प्राणाद्रेतः सिच्यते यद्वा ऋते प्राणाद्रेतः सिच्येत पूयेत्र सम्भवेद् यांत्सन्धीनधिदैवतमवोचाम पर्वाणि तान्यध्यात्म् ॥

Now, Kauntharavya states that there are three hundred and sixty forms of the Supreme God in the letter ṇ of the word Viṣṇu. These are designated as akṣara. Similarly, there are three hundred and sixty forms of the Supreme God in the letter ṣ of the word Viṣṇu. These are designated as Uṣmā. There are three hundred and sixty forms of the Supreme God in the connection of these two letters.

The forms of the God and are present in the akṣara ṇ are called ahan and these regulate the days. The forms of the God that are present in Uṣmā i.e., ṣ are called rātri. The connection of these letters is the connection of ahan and rātri. These are adhidaiva forms of the God.

The forms of the God that are stated as present in akṣara in the adhidaiva context are present in asthi and adhyātma context. The forms of the God that are present in Uṣmā in adhidaiva context are present in majjā in adhyātma contest.

Mukhyaprāṇa is especially present in majjā. Therefore Viṣṇu is especially present in majjā. It is majjā that becomes retas. Mukhyaprāṇa is especially present in retas. Without the presence of Prāṇa retas will not become the womb. the retas without Prāṇa, if sprinkled, becomes foul.

The forms of the God that are stated as present in the connection of letters are present in the connection of letters are present in the connection of ahan and rātri.

उप–तस्यैतस्य त्रयस्यास्थ्नां मज्ज्ञां पर्वणामिति पञ्चेतः चत्वारिंशाच्छतानि पञ्चेतस्तदशीतिसहस्रं भवत्यशीतिसहस्रं भा अर्कलिनो बृहतीरहरभि-सम्पादयन्ति स एषोऽक्षरसंमानश्चक्षुर्मयः श्रोत्रमयः छन्दोमयो मनोमयो वाङ्मय आत्मा स य एवमेतदक्षरसंमानं चक्षुर्मयं श्रोत्रमयं छन्दोमयं मनोमयो वाङ्मय आत्मा स य एवमेतदक्षरसंमानं चक्षुर्मयं श्रोत्रमयं

छन्दोमयं मनोमयं वाङ्मयमात्मानं वेदाक्षराणां सायुज्यं सरूपतां सलोकतामश्नुते पुत्री पशुमान् भवति सर्वमायुरेति ॥ ३-२-२ ॥

Five hundred and forty forms of the God present in asthi, majjā and sandhi are on the right side of the body and five hundred and forty on the left side. On the whole there are one thousand and eighty. These forms of the God are present in the Sun and the sacrificial pit of Syena bird form also. These are called Brihati and are conveyed by Brihatisahasra. These make Brihatisahasra hymn, the day and the sacrifice.

The Supreme God present in asthi etc., is same as one present in Uṣmā, akṣara and Sandhi. He has infinite vision, infinite hearing, free will, infinite knowledge, infinite speech. He who knows the Supreme God in this way will attain Sāyujya, Sālokya, knowledge, bliss and a full life.

उप—चत्वारः पुरुषाः इति बाध्वः शरीरपुरुषः छन्दःपुरुषो वेदपुरुषो महापुरुष इति । शरीरपुरुष इति यमवोचाम स एवायं वैहिक आत्मा तस्य योऽयमशरीरः प्रज्ञात्मा स रसः ।

छन्दः पुरुष इति यमवोचामाक्षरसमाम्नाय एव तस्यैतस्याकारो रसः । वेदपुरुष इति यमवोचाम येन वेदान् वेद ऋग्वेदं यजुर्वेदं सामवेदं तस्यैतस्य ब्रह्मा रसः तस्माद् ब्रह्माणं ब्रह्मिष्ठं कुर्वीत यो यज्ञस्योल्बणं पश्येत् ।

महापुरुष इति यमवोचाम संवत्सर एव प्रध्वंसयन्नन्यानि भूतान्यैक्याभावयन्नन्यानि तस्यैतस्यासावादित्यो रसः ।

स यश्चायमशरीरः प्रज्ञात्मा यश्चासावादित्य एकमेतदिति विद्यात् तस्मात् पुरुषं पुरुषं प्रत्यादित्यो भवति ।

Vāyu who is to be approached by those who are bound by transmigration states that there are four Puruṣas viz., Śarīra

Puruṣa, Chandah Puruṣa, Veda Puruṣa and Mahā Puruṣa. He who is stated as Śarīra Puruṣa is Śiva, the abhimāni deity of all bodies. Pradyumna form of the Supreme God who has no prākrita body and who is jñānasvarūpa is the regulator of Śiva.

Śeṣa the abhimāni deity of all Varṇas is Chandah Puruṣa. Vāsudeva present in the syllable 'A' is his regulator. Garuda with whose help one knows Ṛgveda, Yajurveda and Sāmaveda is Veda Puruṣa. Samkarṣaṇa designated as Brahmā is his regulator. He is designated as Brahmā because he is especially present in Brahmā. Therefore, one who is Brahmajñānin should be made Brahmā priest in a sacrifice. He will ward off the possible lapses in the sacrifice.

Chaturmukhabrahmā, the abhimāni deity of Samvatsara, is Mahā Puruṣa. He destroys some and enables some to merge. He puts into hell those who hate God and enables those who love God to go to his world. The Supreme God Pradhyumna who is present in Āditya and who is the regulator of all jīvas is the regulator of this Mahā Puruṣa i.e., Chaturmukhabrahmā.

Aniruddha who is present in all bodies and Pradyumna who is present in Āditya are one. Pradyumna who is present in Āditya makes every one feel that he is before everyone.

उप—तदप्येतदृषिणा उक्तम्—

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।

आप्रा द्यावा पृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ।

इत्येतामनुविधं संहितां सन्धीयमानां मन्य इति ह स्माह बाध्वः ।

This is stated by a sage in a Vedic hymn : The Supreme God present in the Sun arises. He is of the nature of the highest consciousness. He is the director and the ruler of all deities. He gives knowledge to all deities. He illuminates Dyu, Prithivi and Antarikṣa. He is the lord of sentient and non-sentient beings.

I know the four forms of the Supreme God present in these connections between the earlier and the latter syllables of all Vedic words. Thus Vāyu states.

उप–एतामनुविधं संहितां सन्धीयमानां मन्य इति ह स्माह बाभ्वः । एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्त एतमग्नावध्वर्यव एतं महाव्रते छन्दोगा एतमस्यामेतं दिव्येतं वायावेतमाकाशमेतमप्स्वेतमोषधीष्वेतं वनस्पतिष्वेतं चन्द्रमस्येतं नक्षत्रेष्वेतं सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते स एष संवत्सर-संमानश्चक्षुर्मयः श्रोत्रमयश्छन्दोमयो मनोमयो वाङ्मय आत्मा स य एवमेतं संवत्सरसंमानं चक्षुर्मयं श्रोत्रमयं छन्दोमयं मनोमयं वाङ्मयमात्मानं परस्मै शंसति ।

दुग्धदोह्रा अस्य वेदा भवन्ति न तस्यानूक्ते भागोऽस्ति न वेद सुकृतस्य पन्थानमिति ॥ ३-२-३ ॥

Vāyu states that I duly know this Samhitā i.e., the Supreme God Nārāyaṇa is conveyed by the earlier letter, all other forms of the Supreme God are conveyed by the latter letter, and the four forms of the Supreme God are conveyed by the conjunction.

Those who recite Ṛgveda know that this Supreme God is conveyed by Brihatīsahasra, Adhvaryus who are engaged in sacrifice offer oblations to this Supreme God, those who recite Sāmaveda know that this Supreme God is conveyed by the prayer hymns recited in Mahavrita sacrifice, those who have attained highest knowledge know that he is present in Prithivi, Dyuloka, Vāyu, Ākāśa, Ap, plants, trees, the Moon, stars, and in all beings. They declare that he is guṇapūrṇa. He is present in all forms of Chaturmukhabrahmā and regulates him. He has infinite vision, infinite capacity to hear, he has an infallible will, infinite knowledge, infinite speech and infinite power. One who teaches about him to an undeserving person will not get the benefit of his

study of the Vedas, Śāstra, and of all other good deeds performed by him.

Similarly, one who recites Brihatīsahasra etc., prayer hymns to others or functions as priest in Mahavrita etc., sacrifices to others will also lose all benefits of the study of the Veda etc.

उप–तदप्येतदृषिणा उक्तम् यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति।

यदी शृणोत्यलकं शृणोति न हि प्रवेद सुकृतस्य पन्थामिति।

न तस्यानूक्ते भागोऽस्ति न वेद सुकृतस्य पन्थानमित्येतदुक्तं भवति। तस्मादेवं विद्वान्न परस्मा अग्निं चिनुयात् परस्मै महाव्रते न स्तुवीत न परस्मा एतदहः शंसेत् कामं पित्रे वा आचार्याय वा शंसेत् आत्मन एव तत्कृतं भवति।

One who abandons the Supreme God who is within him and who knows all his past deeds shall not get the benefit of his study of the Vedas. Whatever he learns will lead him to the hell. He will not get the benefit of his good deeds. In this hymn it is stated that those who abandon God by teaching him to the undeserving will not get the benefit of their study and good deeds.

Therefore, one should not function as a priest for others, should not recite Mahavrita prayer hymns, and should not recite Brihatisahasra hymns for others. However, one can do these for one's own father or preceptor. Whatever is done for these is done for oneself.

उप–स यश्चायमशरीरः प्रज्ञात्मा यश्चासावादित्य एकमेतदित्यवोचाम तौ यत्र विहीयेते चन्द्रमा इवादित्यो दृश्यते न रश्मयः प्रादुर्भवन्ति लोहिनी द्यौर्भवति यथा मञ्जिष्ठा व्यस्तः पायुः काककुलायगन्धिकमस्य शिरो वायति सम्परेतोऽस्यात्मा न चिरमिव जीविष्यतीति विद्यात् स यत्करणीयं मन्येत तत्कुर्वीत।

'यदन्ति यच्च दूरक' इति सप्त जपेद् 'आदित् प्रत्नस्य रेतसः' इत्येका 'यत्र ब्रह्मा पवमानेति'षड्' 'उद्वयं तमसस्परी'त्येका ।

The Supreme God Pradyumna present in Āditya is present in the eye. Pradyumna present in the eye and Aniruddha present in the heart are one. Aniruddha present in the heart and Pradyumna present in Āditya are one.

When these two–Pradyumna and Aniruddha present in the body are about to leave the body certain inauspicious indications occur. The Sun is seen like moon, the emanation of sun rays is not seen, the sky looks reddish like manjisthā, the bottom of the body opens, the head gets swollen like the nest of a crow and emanates foul smell. These indicate that the God is leaving his body and his death is nearing. Then, he should perform such deeds that will be helpful to him in the other world.

He should recite 'Yadanti yaccha duraka' etc., seven hymns, 'Ādit pratnasya retasah' one hymn, 'Yatra brahmā Pavamāna' etc., six hymns and 'Udvayam tamasaspari' one hymn.

उप–अथापि यत्र छिद्र इवादित्यो दृश्यते रथनाभिरिवाभि व्याख्यायेत छिद्रां वा छायां पश्येत् तदप्येवमेव विद्यात् ।

अथाप्यादर्शे वोदके वा गिह्मशिरसं वाऽशिरसं वात्मानं पश्येद्विपर्यस्ते वा कन्याके जिह्मेन वा दृश्येयातां तदप्येवमेव विद्यात् ।

अथाप्यपिधायाक्षिणी उपेक्षेत तद्यथा वटरकाणि सम्पतन्तीव दृश्यन्ते तानि यदा न पश्येत् तदप्येवमेव विद्यात् ।

अथाप्यविधाय कर्णा उपशृणुयात् स एषोऽग्नेरिव प्रज्वलतो रथस्येवोपलब्धिः तं यदा न शृणुयात्तदप्येवमेव विद्यात् ।

अथापि यत्र नील इवाग्निर्दृश्यते यथा मयूरग्रीवाऽमेघे वा विद्युतं पश्येत् मेघे वा विद्युतं न पश्येन्महामेघे वा मरीचीरिव पश्येत तदप्येवमेव विद्यात् ।

अथापि यत्र भूमिं ज्वलन्तीमिव पश्येत्तदप्येवमेव विद्यादिति प्रत्यक्ष-दर्शनानि ।

If one sees a hole in the Sun as in a chariot wheel, if he sees his own shadow broken into pieces, if he sees in the mirror his head upside down or removed, if he sees the pupils in his eye turned down, if on pressing his eye he does not see white patches, if on pressing his ear he does not hear the sound similar to the sound of burning of fire or arrival of a running chariot, if he sees the fire as blue as the neck of a peacock, if he sees lightning without cloud or if he does not see the lightning when there are clouds, if he sees the sun rays when there are thick clouds, if one sees the earth burning, then, one should realise that his death is near. These are visible indications of the coming death.

उप–अथ स्वप्नाः । पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति वराह एनं हन्ति मर्कट एनमास्कन्दयत्याशु वायुरेनं प्रवहति सुवर्णं खादित्वाऽप-गिरति मध्वश्नाति बिसानि भक्षयत्येकपुण्डरीकं धारयति खरैर्वराहैर्युक्तैर्याति कृष्णां धेनुं कृष्णवत्सां नलदमाली दक्षिणामुखो व्राजयति ।

स यद्येतेषां किञ्चित् पश्येदुपोष्य स्थालीपाकं श्रपयित्वा रात्रीसूक्तेन प्रत्यृचं हुत्वाऽन्येनान्नेन ब्राह्मणान् भोजयित्वा चरुं स्वयं प्राश्नीयात् ।

स योऽतोऽश्रुतोऽगतोऽमतोऽनतोऽदृष्टोऽविज्ञातोऽनादिष्टः श्रोता मन्ता द्रष्टाऽऽदेष्टा घोष्टा विज्ञाता प्रज्ञाता सर्वेषां भूतानामन्तरः पुरुषः स आत्मेति विद्यात् ॥ ३-२-४ ॥

The inauspicious indications in the dream are : seeing a black person with black teeth, being beaten by such a person, being beaten by a boar, being attacked by a monkey, being carried by storm, eating and vomiting gold, eating a big cake of honey, eating the stalks of lotus, holding a red lotus on the head, riding

on a chariot carried by boar or donkey, taking a black cow with a black calf southward wearing a garland of red flowers, these are the inauspicious indications occurring in the dream.

If one happens to see these in the dream, he sould observe fast, get milk and rice cooked in a vessel, offer homa with Rātrisūkta, feed the Brahmanas and eat the residue of homa offering himself.

The Supreme God is unlimited in respect of space, time and attributes, he cannot be heard fully, cannot be comprehended fully, cannot be seen fully, he is absolutely independent, however, he can see all, hear all, comprehend all, he instructs all, he is within all, he is similar in all his forms. One who knows him in this way will attain liberation.

उप—अथ खल्वियं सर्वस्यै वाच उपनिषत् । सर्वा ह्येवेमाः सर्वस्यै वाच उपनिषदः । इमां त्वेवाचक्षते । पृथिव्या रूपं स्पर्शा अन्तरिक्षस्योष्माणो दिवः स्वराः । अग्ने रूपं स्पर्शाः वायोरूष्माणः आदित्यस्य स्वराः । ऋग्वेदस्य रूपं स्पर्शाः यजुर्वेदस्योष्माणः सामवेदस्य स्वराः । चक्षुषो रूपं स्पर्शाः श्रोत्रस्योष्माणो मनसः स्वराः । प्राणस्य रूपं स्पर्शाः अपानस्योष्माणो व्यानस्य स्वराः ।

This Upāsanā is the most secret Upāsanā of the entire speech. All Upāsanās stated earlier also are the secret Upāsanās of the speech. But this Upāsanā is especially so. The form of the Supreme God that is present in Prithivi and designated as Prithivi is conveyed by Sparśa letters, the form of the Supreme God present in Antarikṣa and designated as Antarikṣa is conveyed by Ūṣmā letters, the form of the Supreme God present in Dyu and designated as Dyu is conveyed by Svarās. The form present in Agni is conveyed by Sparśa, the form present in Vāyu is conveyed by Ūṣmā, the form present in Āditya is conveyed by

Svara. The form present in Chakṣus is conveyed by Sparśa, the form present in Srotra is conveyed by Ūṣmā the form present in manas in conveyed by Svara. The form present in Prāṇa is conveyed by Sparśa, the form present in Apāna is conveyed by Ūṣmā, the form present in Vyāna is conveyed by Svara.

उप–अथ खल्वियं दैवी वीणा भवति । तदनुकृतिरसौ मानुषी वीणा भवति । यथाऽस्याः शिरः एवममुष्याः शिरः । यथाऽस्या उदरं एवममुष्या अम्भणम् । यथास्यै जिह्वैवममुष्यैवादनम् । यथास्याः तन्त्रय एवममुष्या अङ्गुलयः । यथास्याः स्वराः एवममुष्याः स्वराः । यथाऽस्या स्पर्शाः एवममुष्याः स्पर्शाः । यथा ह्येवेयं शब्दवती तर्द्मवती एवमसौ शब्दवती तर्द्मवती । यथा ह्येवेयं लोमशेन चर्मणाऽपिहिता भवत्येवमसौ लोमशेन चर्मणाऽपिहिता लोमशेन ह स्म वै चर्मणा पुरा वीणा अपि दधति । स यो हैतां दैवीं वीणां वेद श्रुतवदनो भवति भूमिप्रास्य कीर्तिर्भवति यत्र क्वचार्या वाचो भाषन्ते विदुरेनं तत्र ॥

The bodies of Chaturmukhabrahmā etc., Jīvas is the Vīṇa of the Supreme God Viṣṇu. The ordinary Vīṇa used by men is just an imitation of it. Just as Daivi Vīṇa has a head, the Mānuṣi Vīṇa also has a head, like belly a belly, like tongue a horse faced extend, like fingures the iron strings, like Udātta etc., accents, ṣadja etc., tunes, both are touched. Just as Daivi Vīṇa makes sound and undergoes some twisting, Mānuṣi Vīṇa also produces notes and its ear is twisted, just as Daivi Vīṇa is covered with the skin with the hairs it is covered with deer skin. It is well known that the Mānuṣi Vīṇa is covered with the skin of deer etc.

He who knows this will have his learning firm, will attain fame all over the earth, and will be recognised in the places where learned men discuss.

उप–अथातो वाग्रसो यस्यां संसद्यधीयानो वा भाषमाणो वा न विरुरुचिषेत तत्रैतामृचं जपेद् ।

ओष्ठा पिधाना न कुलीदन्तैः परिवृता पविः ।
सर्वस्यै वाच ईशाना चारु मामिह वादयेत् ॥ इति बह्वृचः ॥ ३-२-५ ॥

Now, the hymn that is the best among the hymns will be stated. While studying, teaching or discoursing, if one is not able to satisfy the listener, then, one should recite this hymn.

The lips are the covers to the female form of the Supreme God designated as Vāk. She is absolutely free from all drawbacks, she is protector, supreme and regulator of all speech. May she prompt me to speak well in this assembly.

उप—अथ हास्मा एतत्कृष्णहारीतो वाग्ब्राह्मणमिवोपोदाहरति । प्रजापतिः प्रजाः सृष्ट्वा व्यस्रंसत संवत्सरः स च्छन्दोभिरात्मानं समदधाद्य-च्छन्दोभिरात्मानं सन्दधात्तस्मात् संहिता तस्यै वा एतस्यै संहितायै णकारो बलं षकारः प्राण आत्मा स यो हैतौ णकारषकारावनुसंहितमृचो वेद सबलां सप्राणां संहितां वेदायुष्यमिति विद्यात् ।

स यदि विचिकित्सेत् सणकारं ब्रवाणी ३ अणकारौँ ३ इति सणकारमेव ब्रूयात् ।

सषकारं ब्रवाणी ३ अषकारौँ ३ इति सषकारमेव ब्रूयात् ।

ते यद् वयमनुसंहितमृचोऽधीमहे यच्च माण्डूकेयीयमध्यायं प्रब्रूमः तेन नोणकारषकारावुपासौ इति ह स्माह ह्रस्वो माण्डूकेयः ।

The Sage Kṛṣṇa son of Hārita stated this Brāhmaṇa that conveys the sarvasabdavāchyatva of the Supreme God and therefore, is the foundation of all speech.

Chaturmukhabrahmā created all living beings. He felt fatigued. Then, he prayed the Supreme God with the hymns of all Vedas and obtained the presence of the Supreme God designated as chandas within his body. Because of this association, the Supreme

God is called Saṁhitā. The strength of the Supreme God Viṣṇu is conveyed by ṇ and his being infinite in respect of space, time and attribute, and being regulator of all is conveyed by ṣ. Similarly wherever two letters have joined he is conveyed in this way. One who knows this truly knows the Supreme God Viṣṇu. He will attain liberation.

In the words other than Viṣṇu, even if ṇ is not found, the strength of Viṣṇu should be envisaged and then only the word should be recited. No doubt should be entertained in this matter. The strength of the Supreme God should be envisaged irrespective of ṇ being actually present or not.

Similarly, infiniteness of the Supreme God in respect of space, time and attributes should be envisaged whether ṣ is actually present or not in a word.

In this way wherever two letters have jointed in a word, the word should be understood as conveying the Supreme God Viṣṇu designated as Saṁhitā. Thus we recite all hymns and all joinings in Vedic words comprehending them as conveying Viṣṇu only. We teach our disciples the hymn seen by Maṇḍūkeya with this meaning. As a result we obtain the Supreme God Viṣṇu whose strength and other attributes are conveyed by ṇ and ṣ as stated above. This is stated by Hṛsva Māṇḍūkeya

उप– अथ यद्वयमनुसंहितमृचोऽधीमहे यच्च माण्डूकेयीयमध्यायं प्रब्रूमः तेन नो णकारषकारावुपाप्ताविति ह्स्माह स्थविरः शाकल्यः ।

एतद्ध स्म वै तद्विद्वांस आहुर्ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे वाचि हि प्राणं जुहुमः प्राणे वा वाचं यो ह्येव प्रभवः स एवाप्ययः । ता एताः संहिता नानन्तेवासिने प्रब्रूयात् नासंवत्सरवासिने नाप्रवक्त्रे इत्याचार्याः आचार्याः ॥ ३-२-६ ॥

Sthavira Śākalya also states that we obtain the Supreme God Viṣṇu, whose strength is conveyed by ṇ and infinite nature is conveyed by ṣ, since we teach the hymns seen by Maṇḍūkeya as conveying the meaning of the name Viṣṇu, his designation Saṃhitā and all such joinings of two letters in all Vedic hymns.

The sages Kāvaṣeyas who know that the name Viṣṇu is supreme and all other words are its exposition state that the study of Veda without the understanding that the entire Veda is an exposition of the meaning of Viṣṇu, and the performance of Aśvamedha etc., sacrifices without the understanding that these are for the worship of Viṣṇu are in vain. Similarly, if we study the hymn Viṣṇu, the study of no other hymn is necessary. If offerings are made by Viṣṇu hymn no other sacrifice such as Aśvamedha is necessary.

We shall offer Prāṇa in vāk reciting the name of Viṣṇu, we shall offer Vāk in Prāṇa remembering the name of Viṣṇu. Viṣṇu is the creator, Viṣṇu is the destroyer.

These saṃhitās should not be taught to a person who is not one's pupil, not to be taught to a person who has not stayed for one year, not to be taught to a person who is not capable of teaching it to others. These are the instructions of the sages who teach them.

इति तृतीयारण्यके द्वितीयोऽध्यायः

इति श्री पाण्डुरङ्गि तमणाचार्यसूनु कृष्णाचार्य विरचिता
श्रीमन्महौपनिषदः आङ्ग्लभाषानुवादः समाप्ता

NOTES AND EXPLANATION

तृतीयारण्यके प्रथमोऽध्यायः

[III-1-1 (a)] Expl.(1) The secret meaning of the letters of the word Viṣṇu is described here. विष्णु नाम निष्टां विद्यां वक्तुमिदमारण्यकम् (T.T.)

(2) अथ श्रोतॄणामधिकार सम्पत्त्यनन्तरम्, अतः मोक्षाख्यप्रयोजनस्य सद्भावात् संहितायाः विष्णुनामाक्षर तत्सन्धिदेवतायाः तद्व्याख्यानरूप वेदाद्यक्षर तत्सन्धि-देवतायाः उपनिषत् रहस्य विद्या उच्यते ।

(3) पृथुत्वात् पृथिवीनामकं पृथिवीस्थं वराहरूपं पूर्ववर्णप्रतिपाद्यं पूर्ववर्णनामकं च । दिवि स्थितं क्रीडनात् द्युनामकं वामनरूपम् उत्तररूपम् उत्तरवर्णप्रतिपाद्यम् उत्तरनामकं च । वायुस्थं वायुनामकं नृसिंहरूपं रूपद्वयसहितत्वात् संहितानामकं संहितास्थं सन्धिप्रतिपाद्यमिति माण्डूकेयो मन्यते ।

(4) आकाशः आकाशनामा नृसिंहः अस्य वर्णद्वयस्य संहिता मध्यदेवतेति माक्षव्यो वेदयां चक्रे ।

(5) (i) स माण्डूकेयो माक्षव्येण स्वपक्षो विपरिहृतो न निराकृतः इति मेने ।

(ii) एते उपासने भगवद्विषयकत्वात् प्राबल्यदौर्बल्याभावाच्च समाने तस्मात् वायुस्थस्य संहितात्वानपायात् अपरिहृत इति मेने (T.T.)

(6) आकाशे विष्णूपासनपक्षस्य प्रबलत्वात् तेन पक्षेण दुर्बलो माण्डूकेयपक्षः परिहृतः इति अगस्त्यः मेने (T.T.)

(7) एवम् ऋषिमतविप्रतिपत्तिमुक्त्वा भगवता महिदासेन स्वपक्ष उच्यते । समानमिति । यस्माद् वायुश्चाकाशश्चेति उपासनाधिष्टानद्वयं समानं तस्मात् उभयं ग्राह्यं भवतीति योज्यम् । (T.T.)

(8) विष्णुनाम्नि षकारस्य णकारस्य च संहिताम् ।
विष्णोस्तु बहुरूपाणां वाचिकां ऋषयो विदुः ॥
तौ च वर्णौ हरेः सम्यक् स्वरूपप्रतिपादकौ ।
बहुधैव स्थितस्यास्य सदैवैकस्वरूपिणः ।

विष्णुनामार्थरूपत्वात् वेदानामपि सर्वशः ।
अन्येषामपि शब्दानां संहिता विष्णुवाचिका ।
तद्वाचिकास्तथा वर्णाः सर्वे लौकिकवैदिका ॥ (M.B)

(b) Expl. (1) The secret meaning of the name Viṣṇu is further described here.

(2) वक्तृत्वात् वायुनामकं मन्तृत्वात् मनोनामकं प्रकर्षेण अननात् चेष्टकत्वात् प्राणनामा ।

(3) (i) मनोनामकं वराहरूपं वाङ्नामकं वामनरूपम् ।

(ii) प्राणाख्यस्य प्राणे स्थितस्य नरसिंहस्य संहितादेवतात्वविषये मतं समानमित्यर्थः ।

(4) स एष देहाख्यः अश्वरथः इन्द्रियाख्याश्वयुक्तो रथः, पृच्छेः पृच्छाविषयस्य उपदेशकस्य हरेः वाहनः ।

(5) प्रकृष्टत्वेन जननात् प्रजा ज्ञानम्, पान्ति शं साधनाश्चेति पशवो वेदाः, स्वर्गलोकेन विष्णुलोकेन ।

(6) मनोवाक् प्रणनामासौ मन आदिषु संस्थितः ।
विष्णुस्तस्य रथो देहः इन्द्रियाश्वः प्रकीर्तितः ॥
पृष्टिः सः पृच्छनीयत्वात् परमात्मा जनार्दनः ।
वक्तृत्वाच्चैव वाङ्नामा मनो मन्तृत्वहेतुतः ॥ (M.B.)

[III-1-2 (a)] Expl. (1) Here the secret meaning of the word Viṣṇu is described mentioning Vṛṣṭi as the conjunction.

(2) पृथिवी–पृथिवी नामकं वासुदेवाख्यं तद्गतं रूपम्, द्यौः – द्युनामकं दिविस्थं संकर्षणाख्यम्, वर्षणात् वृष्टिनामकः वृष्टिस्थः प्रद्युम्नः सन्धिः, परं सस्यादिकं जनयतीति पर्जन्यनामा पर्जन्यस्थः अनिरुद्धः सन्धाता ।

(3) बलवदनूद्गृह्णन् बलवद् यथा भवति यथा अनु वर्षाकालानुसारेण उद्गृह्णन् उद्गर्जन्नपि (T.T.)

(4) वराहो वामनः सिंह इति रूपत्रयं हरेः ।
पूर्वोत्तरार्णमध्येषु स्थितमुक्तं सनातनम्
माण्डूकैर्हि शाकल्यो वासुदेवादिरूपिणं
तेषु चोच्चारके चैव स्थितमाह चतुर्विधं
भूमि द्यु वृष्टि पर्जन्य नाम्योर्व्यादिषु संस्थितम् । (M.B.)

(b) Expl. (1) The secret significance of the human body is described here.

(2) (i) सर्वः पुरुषः - समग्रः पुरुषदेहः आनन्दम् एकोऽवयवी ।

(ii) पादादिकटिपर्यन्तं पूर्वार्धमेव पृथिव्या सरूपं पृथिवीनामकस्य वासुदेवस्य प्रतिमाभूतम् ।

(iii) इदं नाभ्यादिशिरःपर्यन्तं द्युलोकस्य सरूपं द्युनामकस्य संकर्षणस्य प्रतिमाभूतम् ।

(3) आकाशो वर्तते– आकाशनामा नृसिंहोऽस्ति, वायुनामा दाशरथिश्चास्ति ।

(4) दिवि कपिलः, अन्तरिक्षे हंसः, पृथिव्यां जामदग्न्यः (T.T.)

(5) (i) उर्व्यादीनां चतुर्णां च देह एव स्थितिं पुनः ।
अधरार्धस्य चोर्व्याश्च साम्यमन्यस्य वै दिवा ॥

(ii) आकाशस्यान्तराकाशे नृसिंहस्यात्र संस्थितिम् ।
वायोः प्राणात्मतां चैव तत्र दाशरथेः स्थितिम् ।

(iii) सूर्यविद्युद्धुताशानां दृग्हृद्रेतस्सु च स्थितिम् ।
कपिलस्य च हंसस्य जामदग्न्यस्य तेषु च ॥
स्थितिं वदति विद्येयमपि मोक्षप्रदायिनी ॥ (M.B.)

[III-1-3 (a)] Expl. (1) Here the Upāsanās in respect of Samhitā, Pada and Krama are described. अधुना संहिता पदक्रम विषयाविद्या उच्यते ।

(2) निर्भुजम्–संहिताम्, प्रतृण्णम्–पदम्, उभयमन्तरेण–क्रमः ।

(3) पृथिव्यायतनम्–पृथिवीस्थितं पृथिवीनामकवराहविषयम्, दिव्यायतनम्–दिवि विद्यमानः तन्नामकः वामनः तद्विषयम्, उभयमन्तरेण–अन्तरिक्षगततन्नामकनृसिंह-विषयम् ।

(4) अवराभ्याम्–भूम्यन्तरिक्षाभ्याम्, उत्तराभ्याम्–अन्तरिक्षद्युभ्याम् । अच्योष्ठाः च्युतोऽसि ।

(5) पृथिवीस्थो वराहस्तु संहिता देवतोदिता ।
दिविष्ठो वामनश्चैव सम्प्रोक्तः पददेवता ॥
नृसिंहस्त्वन्तरिक्षस्थो भगवान् क्रमदेवता ।
स्वाध्यायमेनं ध्यात्वा यः करोत्यपवदेन्न तम् ॥

(b) Expl. (1) Here the nature of Samhitā, Pada and Krama, the benefits of reciting these and the consequence of talking ill of the reciters of these are described.

(2) पूर्वोत्तरवर्णयोः संधिं विशेषेण वर्तयतीति यत् संहिततया उच्चार्यमाणं निर्भुजस्य रूपं भुजो भङ्ग इति धातोः भञ्जनवर्जितत्वात् ।

(3) अथ शुद्धे असंश्लिष्टे अक्षरे अभिव्याहरतीति यत् तदुच्चार्यमाणं शब्दतत्त्वं प्रतृण्णस्य रूपम्, तृण छेदन इति धातोः । उभयमन्तरेण क्रमस्तु अग्रे उ अतिशयेन अग्र्य एव ।

(4) अन्नाद्यकामः मुक्तौ अन्नाद्यं यद्भोग्यं तत्कामः, स्वर्गकामः मोक्षकामः, उभयकामः – मुक्तितद्गतभोगकामः ।

(5) (i) पृथिवीं देवतां संहिताप्रतिपाद्यां वराहाख्याम् आरः निन्दया प्राप्तोऽसि तस्मात्– पृथिवी देवता त्वा रिष्यति नाशयिष्यति तमसि पातयिष्यतीत्येनं ब्रूयात् ।
(ii) दिवं देवतां वामनम्, अन्तरिक्षदेवतां नृसिंहम् ।

(6) यथा तु कथा– यथाकथञ्चिद् येन केनापि प्रकारेण कोपविषयं वा, द्युतिस्वरूपत्वात् द्युम्नभगवान् तदाज्ञामतिवर्तत इत्यतिद्युम्नः ।

(7) (i) षणयोः सन्धिकरणात् संहिताध्ययनं भवेत् ।
विष्णुस्त्विति यो ब्रूयात् पदाध्यायी भवेत सः ॥
सन्ध्युक्तिश्च विभागश्च द्वयं व्याप्तं क्रमेण तु ।
तस्माद् द्विधापि वचनात् क्रमाध्यायी भवेत् सः ॥

(ii) विष्णुनामात्मकत्वाच्चाथ संहितपदक्रमाः ।
सर्ववेदस्थिता मोक्षतद्योगद्वयसाधकाः ॥ (M.B.)

[III-1-4] Expl. (1) In this Upāsanā Lord Viṣṇu and Mukhya-prāṇa are to be meditated upon as the abode of all.

(2) प्राणः–विष्णुः मुख्यश्च, वंशः–सर्वेषामिन्द्रिय–देवानामाधारः, समधाम्–सन्धितवान् उपासितवानस्मि, शक्नुवन्–ज्ञानसामर्थ्ययुक्तः, अशक्नुवन्तम्–अल्पज्ञान-सामर्थ्यवन्तम् ।

(3) सर्वाधारत्वतो वंश इत्युपासीत यो हरिम् ।
वायुं च मुक्तिमाप्नोति ... (M.B.)

[III-1-5 (a)] Expl. (1) Here, Vedavyāsa and Vāsudeva are stated to have been conveyed by Samhitā according to some sages.

(2) निर्भुजवक्त्राः केचिद् ऋषयः ।

(3) श्वेतद्वीपे सर्वैः मुक्तैः प्राप्यत्वेन समत्वात् सामनामकं वासुदेवाख्यम् ।

(b) Expl. (1) The Ardhanārinara form of the Supreme God, and Rathantara and Bṛhat forms of Lakṣmī and Nārāyaṇa are described here.

(2) पूर्वोत्तरवर्णदेवतयोः बृहद्रथन्तरयोः लक्ष्मीनारायणयोः रूपाभ्यां संहिता-नामकरूपमर्धनारीनराकारं लक्ष्मीनारायणरूपं सन्धीयते ।

(3) (i) रथन्तरसामप्रतिपाद्यायाः रथन्तरनाम्न्याः लक्ष्म्याः स्वरूपं वाग्वै वेदात्मकत्वात् वाङ्नामकं वाचि स्थितम् ।

(ii) बृहत्सामप्रतिपाद्यस्य बृहन्नामकस्य नारायणस्य स्वरूपं प्राणः प्रणेतृत्वात् प्राणनामकं प्राणे स्थितम् ।

(4) देवता पूर्ववर्णस्य लक्ष्मीरेव प्रकीर्तिता ।
नारायणस्तूत्तरस्य तौ वाक् प्राणाभिधौ मतौ ॥
मध्यस्थः संहिता नामा सोऽर्धनारीपुमात्मकः ।
वेदात्मकत्वाद् वाङ्नाम्नी लक्ष्मीरेव प्रकीर्तिता ।
प्राणनामा प्रणेतृत्वात् साक्षान्नारायणः स्वयम् ॥

(c) Expl. (1) Different Samhitā devatas are described here. These Samhitas are called avaraparā Samhitās, because, the gods represented here are big and small in respect of their hierarchical order.

(2) वाग्–रमा, प्राणः–हरिः, स्वर्गो लोकः–शिवः ।

(3) सैषा संहिता अवरपरा अवरपरयोर्मेलनात् ।

(4) अवरस्य परस्यापि संयोगात् संहिता तु सा ।
प्रोक्ताऽवरपरेत्येव वाक् प्राणाख्यौ रमाच्युतौ ।
संहितैका तथैवान्या केशवो वायुसंयुतः ॥
वायुः स पवमानाख्यो देवताश्चाखिला अपि ।
तृतीया संहिता प्रोक्ता देवतास्ताः सशंकराः ।
चतुर्थी संहिता प्रोक्ता शंकरो ब्रह्मणा सह ॥
पञ्चमी संहिता चैव संहिता मोक्षदा इमाः ।

(d) Expl. (1) प्राणस्थः प्रणेतृत्वात् प्राणनामा भगवान् वाचि भवति प्रतिपादकव्यापारप्राचुर्येण तदन्तर्गतो भवति ।

(2) रेल्हि - आस्वादयति अतिसंश्लेषात्, वाग्वै माता व्यञ्जकत्वात्, प्राणः पुत्रः व्यङ्ग्यत्वात् ।

(3) सुपर्णः – सुष्ठु परमानन्दरूपः, अन्वितः – समीपे ।

(4) पञ्चालचण्डो वाचं तु ब्रह्माणीं हि सरस्वतीम् ।
मन्यतोऽस्थाः पुत्रवच्च देवं नारायणं प्रभुम् ॥
वेदैर्हि व्यज्यते विष्णुः सा च वेदाभिमानिनी ।
प्राणस्थो भगवान् विष्णुः प्राणनामा प्रणेतृतः ॥
ब्रह्मणोऽपि पिता नित्यं भगवान् पुरुषोत्तमः ।
उपचर्यते पुत्र इति वेदैर्यद् व्यज्यते हरिः ॥
सा देवी संहिता नाम्नी वाच्योऽस्था विष्णुरेव हि ॥ (M.B.)

(e) Expl. (1) Here the Samhitā of Jāyā, Pati etc., described by a Vedic seer is stated.

(2) जायागतो वासुदेवः पूर्ववर्णप्रतिपाद्यः, पितृगतः संकर्षणः उत्तरवर्णप्रतिपाद्यः पुत्रगतः प्रद्युम्नः सन्धिः, प्रजननकर्मस्थः अनिरुद्धः सन्धानम् ।

(3) सैषा चतुर्मूर्त्यात्मिका संहिता देवता अदितिः ।

(4) तदेतत् सर्वम् ऋषिणा उक्तम्– अदितिर्माता स पिता स पुत्र इति प्रतीकग्रहणम् ।

इति तृतीयारण्यके प्रथमोऽध्यायः ।

तृतीयारण्यके द्वितीयोऽध्यायः

[III-2-1 (a)] Expl. (1) It is stated here that Mukhyaprāṇa is the support of senses and their abhimāni deities.

It is also stated that the Supreme God is conveyed by the Ūṣmā, Sparṣa and Antastha letters, and is present in asthi, majjā and lohita.

(2) (i) गृहस्याच्छादनादीनां मध्यवंशो यथाश्रयः
तथेन्द्रियाभिमान्यादिदेवानां वायुराश्रयः
तेषु सर्वेषु भगवान् बहुरूपो हरिः स्थितः ।

(ii) विष्णुनामाक्षरेष्वेवमन्येष्वपि तदर्थतः
प्राणनामापि भगवान् प्राणस्थश्चोष्मसु स्थितः ।
ऊष्मनामा समर्थत्वात् स एव भगवान् हरिः ।
अस्थिस्थितो हरिः स्पर्शसंस्थितः स्पर्शनामकः
स्पर्शहेतुत्वतः स्पर्शनामा स भगवान् हरिः
मज्जासु स्थः स मज्जाख्यो मदं जनयतीति ह ।
स एव स्वरसंस्थश्च स्वराख्यः स्वरतेः प्रभुः ।
प्रमाणं सारयेद् यस्मात् मांसाख्यो मांससंस्थितः ।
लोहिताख्यो रक्तवर्णो लोहितस्थो जनार्दनः । (M.B.)

(3) यथा शालावंशे सर्वे अन्ये वंशाः समाहिताः एवमस्मिन् प्राणे इन्द्रियाणि शरीरं च पृथक् पृथक् सर्वसमुदायरूपः आत्मा संघातश्च समाहितः । प्राणः तत्स्थः भगवान् प्राणनामा ।

(4) (i) ऊष्मरूपम् ऊष्माक्षरप्रतिपाद्यः ऊष्मनामा ऊष्माक्षरस्थश्च

(ii) अधिकं स्थिरत्वादस्थिनामकम् अस्थिगतं भगवद्रूपं तत्स्पर्शरूपं स्पर्शाक्षर-प्रतिपाद्यं स्पर्शनामकं स्पर्शाक्षरस्थितं च ।

(iii) मदस्य जनकत्वात् मज्जाख्यं मज्जास्थितं भगवतो रूपं स्वररूपं स्वराक्षरप्रतिपाद्यं स्वरतत्वात् स्वरनामकं स्वराक्षरस्थितं च ।

(iv) मां सारयतीति मांसनामकं रक्तवर्णत्वात् लोहितनामकं भगवद्रूपम् अन्तस्थ-रूपम् अन्तस्थाक्षरप्रतिपाद्यम् अन्तः स्थितत्वात् अन्तस्थनामकम् अन्तस्थाक्षरस्थितं च ।

(b) Expl. (1) The glory of the Supreme God having seven hundred and twenty forms is described here. His presence in three hundred and sixty days and nights is also described.

(2) अधिकं स्थिरत्वात् मदस्य जननात् परज्ञानत्वाच्च अस्थिमज्जापर्व-नामकभगवद्रूपसंघस्य मध्ये दक्षभागे त्रीणि शतानि षष्ठिश्च वामभागे त्रीणिशतानि षष्ठिश्च एवं भागद्वयस्थितानि भगवद्रूपाणि सप्तशतानि विंशतिश्च । संवत्सरस्य अहोरात्राण्यपि सप्तशतानि विंशतिश्च । अतः भगवतः रूपाणि अहोरात्राणि । अहार्यत्वाद् रतिप्रदत्वाच्च अहोरात्रनामकानि तत्स्थितानि । अत तव भगवान् अहः संमान उच्यते । अतः अध्यात्मगतानि विष्णुरूपाणि अहोभिः समसंख्याकानि ।

(3) चक्षुर्मयः पूर्णदर्शनशक्तिमान्, श्रोत्रमयः पूर्णश्रवणशक्तिमान्, सत्यकामत्वात् छन्दोमयः, पूर्णमन्तृत्वशक्तिमत्वात् मनोमयः, पूर्णवक्तृत्वशक्तिमत्वात् वाङ्मयः ।

(4) पुत्री भवति ज्ञानपुत्रवान् भवति, पशुमान्–पीयमानस्वरूपसुखवान् भवति ।

[III-2-2 (a)] Expl. (1) The forms of the Supreme God present in ṇ and ṣ in the word Viṣṇu are described here. These are also present in ahan and rātri.

(2) अत्र अक्षरशब्देन विष्णुनामगतं णकाररूपं स्पर्शाक्षरमुच्यते । तथा च अक्षराणां णकारगतानाम् अक्षरनामकानां भगवद्रूपाणां षष्ठ्युत्तराणि त्रीणि शतानि तथा ऊष्मणां विष्णुनामगतषकाररूपोष्माक्षरगतानां समर्थत्वादूष्मनामकानां भगवद्रूपाणां त्रीणि षष्ठिशतानि तथा सन्धीनां षणयोः सन्धिगतानां सन्धिनाम्नां विष्णुरूपाणां त्रीणि षष्ठिशतानि । सम्भूय अशीत्युत्तरसहस्रसंख्याकानि सन्ति ।

(3) यान्यक्षराणि तद्गतानि तन्नामकानि भगवद्रूपाणि अवोचाम तानि अहानि अहार्यत्वादहर्नामकानि संवत्सराहर्नियामकानि । एवं यानूष्माणः अवोचाम ताः रात्रयः । यान् सन्धीनवोचाम अहोरात्राणां ते सन्धयः इति व्याख्येयम् ।

(4) यान्यक्षराणि अधिदैवतमवोचाम तानि अध्यात्ममस्थिगतानि अस्थि-नामकानि । यानूष्माणः अधिदैवतमवोचाम ते मज्जानः अध्यात्ममित्यप्येवं व्याख्येयम् ।

(5) प्राणो वायुः मज्जा मज्जायां विशेषतः सन्निहितः तस्मात् प्राणो विष्णुः मज्जायां विशेषतः सन्निहितः ।

(b) Expl. (1) The thousand and eighty forms of the God present in asthi, majjā and sandhi are described here. It is also stated that the same are present in the Sun, and the sacrifice. These are conveyed by Bṛhatīsahasra.

(2) अस्थ्यादित्रयान्तर्गतस्य तन्नामकस्य हरेः रूपाणि देहे दक्षिणभागे पञ्चशतानि चत्त्वारिंशत् वामभागे पञ्चचत्त्वारिंशदधिकपञ्चशतानि सन्ति । सम्भूय अशीत्युत्तरसहस्रं भवति । एत एव अशीत्युत्तरसहस्रसंख्याकाः भगवत्प्रादुर्भावाः अर्कलिनः अर्के सूर्ये श्येनाकार चितौ च निलीनत्वेन अदृश्यत्वेन स्थिताः । त एव बृहतीः पूर्णत्वात् बृहत्याख्याः बृहतीसहस्रप्रतिपाद्याश्च । बृहतीसहस्रम् अहश्च अभिसम्पादयन्ति । अहःशब्देन यज्ञः दिवसश्च उभौ अभिप्रेतौ ।

(3) अयमत्र विवेकः । एते भगवतः प्रादुर्भावाः पुरुषशरीरे स्थित्वा वाक् प्रेरकतया बृहतीसहस्रं सम्पादयन्ति सूर्ये स्थित्वा दिवसान् सम्पादयन्ति चितौ स्थित्वा यज्ञान् सम्पादयन्तीति ।

स एषः अस्थ्यादिगतो भगवान् अक्षरसंमानः ऊष्माक्षरसन्धिभेदेन त्रिविधवर्ण-गतरूपसमसंख्याकः । अशीत्युत्तरसहस्रसंख्याकरूपवानिति यावत् ।

[III-2-3 (a)] Expl. (1) The four Puruṣas and the four forms of the Supreme God regulating them are described here.

(2) (i) शरीरपुरुषः – दैहिक आत्मा सर्वदेहाभिमानी शिवः, अशरीरः– प्राकृतशरीररहितः प्रज्ञात्मा–प्रकृष्टज्ञानरूपः अनिरुद्धनामा हरिः, रसः–नियामकत्वेन स्थितत्वात् साररूपः ।

(ii) छन्दःपुरुषः अक्षरसमाम्नायः – सर्वे वर्णाः, तदभिमानी शेष एव, अकारः – अकारगतवासुदेवः रसः ।

(iii) वेदपुरुषः – सर्ववेदाभिमानी गरुडः, ब्रह्मा–ज्ञानबृंहणात् ब्रह्माख्यऋत्विक् संस्थितत्वाच्च ब्रह्माख्यः संकर्षणः रसः, उल्बणं-क्रूरं दोषम्, कर्तृकरणादिवैगुण्यप्रसक्तिम् ।

(iv) महापुरुषः संवत्सरः – संवत्सराभिमानी ब्रह्मैव ।

(3) (i) अन्यानि भूतानि– कांश्चित् प्राणिनः प्रध्वंसयन्, अन्यानि भूतानि कांश्चित् प्राणिनः ऐक्याभावयन्– लीनभावमापादयन् ।

(ii) अन्यानि भूतानि भगवद्विरोधीनि भूतानि प्रध्वंसयन् तमसि पातयन्, अन्यानि भूतानि मुक्तियोग्यजीवान् ऐक्याभावयन्– मोक्षे स्वान्तः स्थनैक्यं प्रापयन् ।

(4) आदित्यः – आदित्यमण्डलस्थः प्रद्युम्नः, अनिरुद्धः प्रद्युम्नः इति रूपद्वय-मत्यन्ताभिन्नम्, उपलक्षणमेतत् संकर्षणवासुदेवावप्यभिन्नौ ।

(b) Expl. (1) A Vedic hymn glorifying the four forms of the Supreme God present in the connections of earlier and latter syllables of Vedic words are described here.

(2) चित्रम्– अतिशयितचिद्रूपत्वात् परमचेतनत्वात् चित्तरं तदेव चित्रम्, अनीकम्– अननात् चेष्टकत्वात् अन्, ईशितृत्वात् ई, कर्तृत्वात् कमिति ।

(3) मित्रस्य वरुणस्य अग्नेः उपलक्षणमेतत् सर्वदेवानां चक्षुः ज्ञानदाता, अप्राः स्वप्रकाशेन अपूरयत् ।

(4) एतां संहितां वैदिकपूर्वोत्तरवर्णसन्धिरूपां सन्धीयमानां सन्धितामहं मन्ये ।

(5) यदा चतुर्विधो विष्णुः संहिता देवतेति ज्ञायते तथा पूर्ववर्णस्य नारायणो देवता उत्तरवर्णस्य समस्ताः प्रादुर्भावाः इति ज्ञायते तदा ।

(c) Expl. (1) The importance of the realisation of the fact that the Supreme God is conveyed by Samhitā, Bṛhatīsahasra etc., hymns and is present in Prithivi, Dyuloka etc., is brought out here.

(2) चतुर्विधः विष्णुः संहिता देवता, पूर्ववर्णस्य नारायणो देवता, उत्तरवर्णस्य समस्ताः प्रादुर्भावाः देवताः ।

(3) (i) बह्वृचाः – ऋग्वेदिनः, महत्युक्थे – बृहतीसहस्रे, मीमांसन्तेतत्प्रतिपाद्यं जानन्ति ।

(ii) अध्वर्यवः अग्नौ इष्टिकानिर्मितचितिस्थे मीमांसन्ते उपासते ।

(iii) छन्दोगाः महाव्रते महाव्रताख्यस्तोत्रे मीमांसन्ते तत्प्रतिपाद्यदेवतां जानन्ति ।

(iv) एतमेवं ब्रह्म गुणपूर्णात्मक इत्याचक्षते ।

(4) स एष भगवान् संवत्सरसंमानः संवसतां रतिदातृत्वात् संवत्सरो ब्रह्मा स च अनन्तमूर्तिः सन् अनन्तजगदधिष्ठाय तन्नियामको भवति भगवांश्च तस्य ब्रह्मणः अनन्तरूपेषु स्वयं तावद्रूपैः तन्नियामकतया स्थित इति संवत्सरसंमान इत्युच्यते ।

(5) परस्मै– अयोग्याय शंसति उपदिशति । तथा परस्मै आचार्यपितृभ्यामन्यस्मै तत्क्रियमाणे महाव्रताख्ये कर्मणि शंसति । बृहतीसहस्रादिस्तोत्रेण इत्यर्थः ।

(6) (i) दुग्ध एव न तु दोग्धव्यो दोह येषामिति तथोक्ताः फलाधायकाः न भवन्तीत्यर्थः ।

(ii) अनूक्ते अधीते शास्त्रे भागः फलमपि नास्ति ।

(iii) सुकृतस्य गंगास्नानादिकर्मणः पन्थानं मार्गं फलमिति यावत् ।

(7) (i) एवं चतुर्विधो विष्णुः संहिता देवता यदा
ज्ञायते पूर्ववर्णस्य रूपं नारायणाभिधम् ।
प्रादुर्भावाः समस्ताश्च चरमार्णस्य देवताः ।
तदा तु संहितां सम्यक् मन्येऽहं सन्धितामिति ॥

(ii) संवसद्रतिदातृत्वाद् ब्रह्मा संवत्सराभिधः
नियामकः स जीवानां सर्वेषां प्रभुरीश्वरः ।
अनन्तमूर्तिर्ब्रह्मासौ अनन्तजगदास्थितः
नियामकस्तस्य विष्णुः तावद्रूपेण संस्थितः ॥

(iii) य एनं वक्तव्ययोग्येभ्यः योऽथ चैनं महाव्रते ।
कर्मण्याचार्यतोऽन्यस्य शंसेत पितृतोऽथवा
महाव्रतेन स्तोत्रेण स्तुवीतैनमथापि वा
महाव्रते चितिं वापि कुर्यान्नास्य फलं श्रुतेः
सुकृतस्य फलं चैव नासौ सम्यगवाप्स्यति ॥ (M.B.)

[III-2-4 (a)] Expl. (1) Here the disadvantages of instructing undeserving persons are explained. A Ṛgvedic hymn in support of this is quoted.

(2) सचिविदम् – सचिः कर्मसञ्चयः । सम्पूर्वकचिनोतेः किः । तं वेत्तीति सचिविद् । प्रीत्या एकदेहस्थितत्वात् सखायं नारायणम् ।

(3) अलकम्– अरकम् अरतिरूपान्धतमः प्राप्तिसाधनमेव शृणोति श्रुतं सर्वम् अन्धंतमः प्राप्तिसाधनमेव भवतीत्यर्थः ।

(4) कर्मसञ्चयवेत्तारं त्यजेन्नारायणं हि यः ।
प्रीत्यैकदेशसंस्थत्वात् सखायमिति चोदितम् ॥
न विद्यायाः फलं तस्य श्रुतं च नरकावहम् ।
नैव प्राप्नोति सुकृतं संस्थागात् परमात्मनः । (M.B.)

(5) Abandoning God is of four types:

Denying the very existence of the God, considering other gods as equal or superior to him, considering that his qualities are also changing, considering that one can get liberation without his grace and such other thoughts that affect the supremacy of God are Mukhyatyāga abandoning God in the primary sense.

मुख्यत्यागः :–

मुख्यत्यागो हरेरेष यन्नास्तीति वदेदमुम् ।
तत्समं वाऽधिकं वापि ब्रूयादैक्यमथापि वा ॥
ऐश्वर्यादिगुणानां वा ह्रासं नास्तित्वमेव वा ।
तत्प्रसादं विना मोक्षं ब्रूयाद् वा कस्य चित् क्वचित् ॥
ऐक्यं वा ब्रह्मशर्वादेः मुक्तावैक्यमथापि वा ।
व्यत्यासं चावताराणां जीवाभेदममुष्य वा ।
व्यत्यासं चावताराणां जीवाभेदममुष्य वा ॥
भेदज्ञानं तद्गुणानां तेन वाऽथ मिथोपि वा ।
तथैव तत्क्रियाणां च तद्रूपाणामथापि वा ॥
तद्देहस्य प्राकृतत्वम् अचिदानन्ददेहताम् ।
अतद्वशत्वं कस्यापि कदाचित् क्वचिदप्युत ॥ (M.B.)

अचिन्त्य विभवेऽप्यस्मिन्नसम्भवनिरूपणम् ।
स एष मुख्यतस्त्यागो वासुदेवस्य कीर्तितः ॥

(6) Considering the world as unreal, forgetting God, talking ill of his devotees, entertaining doubts in respect of Vedantic doctrines etc., also amount to abandoning God. This is the second way of abandoning God.

द्वितीयः त्यागः-

रमाब्रह्मादिकानां च तारतम्यानभिज्ञता ।
संशयश्चोक्ततत्त्वेषु जगन्मिथ्यात्वदर्शनम् ॥
अस्मृतिर्वासुदेवस्य तद्भक्तानां च निन्दनम् ।
द्वितीय एष त्यागस्तु विष्णोरेव प्रकीर्तितः ॥ (M.B.)

(7) Performing prohibited deeds and avoiding prescribed duties is also abandoning God. This is the third way of abandoning God.

Instructing the undeserved, functioning as priest or reciting Bṛhatīsahasra etc., hymns for others is the fourth way of abandoning God.

In the present context the fourth way of abandoning is mentioned in Aitareya.

तृतीयः त्यागः, चतुर्थः त्यागः-

निषिद्धकर्मकरणं विहितस्य च वर्जनम् ।
त्यागस्तृतीयो हि हरेः चतुर्थोऽयोग्यपूरुषे
उपदेशः केशवस्य यथाशास्त्रोदितक्रमात् ॥
आचार्यपित्रोरन्यत्र तथैव च महाव्रते ।
हौत्रौद्गात्राध्वर्यवाणि त्याग एवं चतुर्विधः ॥ (M.B.)

(b) Expl. (1) Here the inauspicious indications of a dying person are described.

(2) तौ– अनिरुद्धप्रद्युम्नौ देहे हृदयचक्षुषोः स्थितौ, विहीयेते– शरीरादपगच्छतः,

(3) वायति–वाति, सम्परेतः – मृतप्रायः ।

(4) सूर्यमण्डलगो विष्णुः देहे चक्षुषि संस्थितः ।
अनिरुद्धश्च हृदये न च भेदोऽनयोः क्वचित् ।
द्विरूपः स यदा विष्णुरपगच्छति देहतः ।
तदैव दुर्निमित्तानि जायन्ते नान्यदा क्वचित्
तस्मात् तेषां दर्शने तु कर्तव्यं पारलौकिकम् ।
सर्वमेव जपेच्चैव यदन्तीत्यादिका ऋचः ॥ (M.B.)

(c) Expl. (1) Some indications of the coming death are described here.

(2) वटरकाणि–वर्तुलाः अर्चिषः अंशाः

(d) Expl. (1) (i) The inauspicious indication in the dream are described here.

(ii) The nature of the Supreme God is fully described.

(2) रात्रिसूक्तेन प्रत्यृचं हुत्वा – रात्रिसूक्तप्रतिपाद्य – रात्रिशब्दवाच्यस्त्री रूपभगवन्मूर्तिं दुर्गां चोद्दिश्य हुत्वा ।

(3) देशतः कालतः गुणतश्च सन्ततत्वात् अतिपूर्णत्वात् अतः शब्दवाच्यः, अश्रुतः– साकल्येन श्रोतुमशक्यः, अगतः – साकल्येनावगन्तुमशक्यः etc., अनतः – कस्याप्यप्रह्व स्वतन्त्रः इति यावत् समः – सर्वरूपेषु एकप्रकारः, आत्मा – सर्वजीवनियामकः ।

[III-2-5 (a)] Expl. (1) This Upāsanā relates to the forms of the Supreme God conveyed by all the letters consisting of Sparśa, Ūṣmā and Svara. These directly convey the Supreme God. Therefore, this Upāsanā is most secret and sacred.

(2) अथ खलु इयं वक्ष्यमाणा सर्वस्याः वाचः उपनिषत् रहस्यरूपा लौकिक–वैदिकसर्ववाग् विषयका । विष्णुशब्दार्थप्रतिपादकत्वात् सर्ववाचाम् ।

यद्यपि सर्वा हि एव पूर्वोक्ताः विद्याः विष्णुशब्दार्थत्वात् सर्वस्याः वाचः उपनिषद्रूपाः तथापि तदपेक्षया मुख्यत एव सर्ववाग्विषयकत्वात् इमां वक्ष्यमाणां त्वेव सर्वस्याः वाचः उपनिषदिति सर्वेपि ज्ञानिनः आचक्षते ।

(3) एवमधिलोकमधिदैवमधिवेदमधीन्द्रियमधिप्राणं पञ्चविधानि पृथिव्यादि-नामकरूपत्रिकाणि स्पर्शाद्यक्षरदैवतानि ज्ञेयानि ।

(b) Expl. (1) The bodies of Jīvas are considered as Vīṇa and compared with the musical instrument Vīṇa here.

(2) तस्य विष्णोरयं देहो वीणा साक्षात् प्रकीर्तिता ।
दैवी वीणा ततः सेयं लोकसिद्धा तु मानुषी ॥
ब्रह्मादिदेहान् यो वेद विष्णोर्वीणेति भक्तितः ।
विद्यापूर्णमुखः स स्याद् भूमिपूरितकीर्तिमान् ॥ (M.B.)

(3) दैवी-देवस्य विष्णोः सम्बन्धिनी वीणा, अम्भणम्–अभिरभिशब्दे शब्दोत्पत्तिस्थानमधोभागस्थमन्तरवकाशोपेतं बृहदवयवान्तरं, तद्वती–कर्णपीडनादि-हिंसावती ।

(c) Expl. (1) A hymn that is to be recited to achieve efficiency in learning, teaching and discoursing in an assembly is mentioned here.

वाग्रसः वाक्सारः मन्त्रविशेषः निरूप्यते ।

(2) पविः इति वाङ्नाम अतः वाचि संस्थितस्य स्त्रीरूपस्य भगवतः प्रतिपादिका इयं ऋक् ।

(3) ओष्ठौ अपिधाने न अपिधान इव आच्छादनवस्त्रवत् वर्तेते यस्याः सा ओष्ठापिधाना न इत्युच्यते । अत्र न इति भिन्नमेव पदं सामर्थ्यात् पिधानपदेन अन्वेति । (न इति इवार्थकः)

(4) लीनाशेषकुत्सितवत्वात् कुली, सर्वपालकत्वात् सर्वस्मात् विशिष्टत्वाच्च पविः वाङ्नाम्नी भगवन्मूर्तिः चारु यथा भवति तथा मामिह सभायां वादेयत् ।

(5) ध्यात्वा नारायणं देवं स्त्रीरूपं वाचि संस्थितम् ।
औष्ठापिधानेत्येषा हि ऋक् सारो वाचः प्रकीर्तितः ॥
विष्णोर्हि वाचि संस्थस्यैवोष्ठावेतौ पिधानवत् ।
कुलीतिचोक्तो भगवान् प्रलीनाशेषकुत्सितः ॥

पाति सर्वं विशिष्टश्च सर्वस्मादित्यतः पविः ।
सर्ववागीश्वरो विष्णुः स्त्रीरूपो मां सुवादयेत् ॥ (M.B.)

[III-2-6 (a)] Expl. (1) The significance of ṇ and ṣ in the name Viṣṇu is explained here.

(b) Expl. (1) The benefits of understanding of the significance of ṣ and ṇ are further described here.

(2) संवत्सरः – कालाभिमानी संवसद्रतिदाता प्रजापतिः ब्रह्मा, व्यस्रंसत – श्रान्तोऽभवत्, छन्दोभिः सर्ववेदैः ।

(3) ब्रह्मणा स्वदेहे सन्धितत्वादेव भगवान् संहिता इत्युच्यते ।

(4) प्राणः –रमाब्रह्माद्यखिलप्रणेतृत्वम्, आत्मा – आत्मत्वम्, गुणतः कालतः देशतः आततत्वमित्येतत् षकारः ।

(5) वयं किमर्थाः किं प्रयोजनार्थिनः सन्तः अध्येष्यामहे । विष्णुनामार्थानु-संधानपूर्वकविष्णुमन्त्रजपादेरेकस्यैव अधिकत्वात् विष्णुनामव्यतिरिक्तवेदाध्ययनेन किं प्रयोजनम् ? किमर्था वयं वक्ष्यामहे यज्ञैर्वा नः किं प्रयोजनं भवेत् ?

(6) वाचि प्राणं जुहुमः विष्णवे नमः इति मन्त्रमेव जपन्तः प्राणवृत्तिं जपाख्यवाग्व्यापारे नियोजयामः ।

प्राणे वा वाचं जुहुमः प्राणे वाचो होमो नाम मौनमेव । तथा च मौनेन विष्णुशब्दार्थं ध्यायेम वेत्यर्थः ।

(7) संहिताः – पूर्वोत्तरवर्णसन्धिप्रतिपाद्यानि संहितानामकानि भगवद्रूपाणि ।

(8) विष्णुनाम्नि णशब्देन विष्णोर्बलमुदीर्यते ।
विष्णुनाम्नि षकारेण रमाब्रह्मेशपूर्विणः ॥
प्रणेतृताखिलस्यैव विष्णोरुक्ता तथात्मता ।
आततत्वं सर्वगुणैर्देशतः कालतस्तथा ॥
आत्मशब्दोदितं तच्च षशब्देनाभिधीयते । (M.B.)

(9) विष्णुनामोदितो योऽर्थः तद्व्याख्यान्यदूषचोऽखिलम् ।
संहिताख्यानि विष्णोस्तु रूपाण्येतानि सर्वशः ॥

(10) (i) सर्वैश्च वैदिकपदैरपि लोकशब्दैः
मेघाग्निवारिधितलादिरवैश्च सर्वैः ।
एकोऽभिधेयपरिपूर्णगुणः प्रियोऽलं
नारायणो मम सदैव स तुष्टिमेतु ॥ (M.B.)

(11) भाष्यकारैः श्रीमध्वाचार्यैः स्वावतारत्रयनिरूपणम् ।
यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट् तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुः
मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥ (M.B.)

आङ्ग्लभाषानुवादोऽयं मध्वभाष्यानुसारतः ।
खण्डार्थांश्च समालोक्य राघवेन्द्रयतेस्तथा ।
दशोपनिषदां सारं ज्ञातुमिच्छावतां कृते ।
पाण्डुरङ्गिकुलोत्पन्नकृष्णाचार्येण निर्मितः ॥

इति श्रीमन्महैतरेयोपनिषदि तृतीयारण्यके द्वितीयोऽध्यायः ।

इति श्रीमन्महैतरेयोपनिषत् समाप्ता ॥

इति श्रीपाण्डुरङ्गि तम्मण्णाचार्यसूनु कृष्णाचार्यविरचिता श्रीमन्मध्वभाष्यानुसारिणी
श्रीमन्महैतरेयोपनिषदांग्लभाषा टिप्पणी समाप्ता

उपनिषद्वचनानुक्रमणिका

ईशावास्योपनिषत्

तलवकारोपनिषत्

काठकोपनिषत्

षट्प्रश्नोपनिषत्

आथर्वणोपनिषत्

माण्डूक्योपनिषत्

तैत्तरीयोपनिषत्

ऐतरेयोपनिषत्